51

मागधम्

संस्कृत-प्राकृत-विभागस्य संस्कृत-शोधवाङ्मयस्य
षष्ठोदयः
पाटलिपुत्रे परीक्षिताः

संस्कृत-प्राकृत-विभागः,
एच० डी० जैनकालेजः, आरा
मगध विश्वविद्यालयः

डॉ. श्री महेन्द्रमुकुन्द गोस्वामी
को शुभकामनाओं के साथ।

डॉ. [illegible]

१४/११/६३

मागधम्

संस्कृत-प्राकृत-विभागस्य संस्कृत-शोध-वाङ्मयस्य

षष्ठोदयः

पाटलिपुत्रे परीक्षिताः

•

संरक्षकः

कुलगुरुः, शिक्षाशास्त्री श्रीसच्चिदानन्द सिनहा

मगधविश्वविद्यालयस्योपकुलपतिः

प्रेरकः

अनेकग्रन्थप्रणेता, प्रतिभामूर्त्तिः श्रीजगदीशपाण्डेयः

आरास्थहरप्रसाददासजैनकालेजस्य

प्राचार्यः

सम्पादकः

लब्धस्वर्णपदकः, प्रो० डॉ० नेमिचन्द्र शास्त्री

एम्० ए० (संस्कृत-प्राकृत-हिन्दी), पी-एच० डी०, डी० लिट्०

ज्योतिषाचार्यः, न्याय-काव्यज्योतिषतीर्थश्च

आरास्थ एच्० डी० जैनकालेजस्य संस्कृत-प्राकृत-विभागाध्यक्षः

उपसम्पादकः

प्रो० डॉ० रामनाथपाठकः 'प्रणयी'

एम्० ए० (संस्कृत-प्राकृत), पी-एच० डी०, साहित्य-व्याकरणायुर्वेदाचार्यः

आरास्थ एच्० डी० जैनकालेजस्य प्राध्यापकः

प्रकाशिका
बाणभट्ट-परिषद्
एच० डी० जैनकालेज:
आरा (बिहार)

षष्ठोदय:
ख्रीष्टाब्द: १९७३

मुद्रक:
बाबूलाल जैन फागुल्ल:
महावीर प्रेस
भेलूपुर, वाराणसी–१

मागधम्

संस्कृत-प्राकृत-विभागस्य संस्कृत-शोधवाङ्मयस्य

षष्ठोदयः

पाटलिपुत्रे परीक्षिताः

संस्कृत-प्राकृत-विभागः,

एच० डी० जैनकालेजः, आरा

मगध विश्वविद्यालयः

ख्रीष्टाब्दः १९७३

विक्रमाब्दः २०३०

विषयानुक्रमणिका

सम्पादकीयम्

'पाटलिपुत्रे परीक्षिताः'

विशेषांकस्य सन्दर्भे सर्वप्रथमं पाटलिपुत्रस्य वैभव-महत्त्वयोरुपरि विचारः परमावश्यकोऽस्ति। प्राचीनभारतस्य शिक्षा-व्यवसाय-राजनीतिकेन्द्रेषु पाटलिपुत्रस्य प्रमुखगणनाऽऽसीत्। 'मंजुश्री'-मूलकल्पे पाटलिपुत्रं तत्कालीनं शिक्षाकेन्द्रं कथितवानस्ति। पौराणिकशैल्या वर्णयता लिखितम्—"पुष्पपुरे शूरसेनानन्तरं नन्दो राजा भविष्यति। तत्र मगधराजधान्यामनेकविचारशीलाः विद्वांसो राजसभायां भविष्यन्ति। राजा धनेन तेषां सम्मानं करिष्यति। बौद्धब्राह्मणो वररुचिः तस्य मन्त्री भविष्यति राज्ञः परममित्रं पाणिनि-नामक एको ब्राह्मणो भविष्यति।"[1] उपर्युक्तोद्धरणेनैतत् स्पष्टमस्ति यत् पाटलिपुत्रं नन्दमौर्ययोः समये शिक्षाज्ञानयोः परममहत्त्वपूर्णं केन्द्ररूपमासीत्।

पाटलिपुत्रस्य महत्त्वम्

इतिहासः साक्ष्यं बिभर्त्ति यत् गङ्गाशोणयोः संगमे स्थितस्य पाटलिपुत्रस्य प्राचीनसमयेऽद्वितीयं स्थानमासीत्। प्राचीने योरोपीयेतिहासे रोमस्य यत्स्थानमस्ति, तदेव स्थानं भारतवर्षे पाटलिपुत्रस्य वर्त्तते। ई०पू० पञ्चम्याः शताब्द्याः प्रारभ्य (ई० सन्) षष्ठीं शतीं यावत् पाटलिपुत्रस्येतिहास एव भारतवर्षस्येतिहासोऽस्ति। कालेऽस्मिन् पाटलिपुत्रस्य नृपैः न केवलं भारतवर्षेऽपितु भारताद्बहिरपि स्वसाम्राज्यस्य विस्तारो विहितः। पूर्वपश्चिमदिशोः सर्वत्र स्वशक्तिविस्तारं विधाय वृहत्तरः भारतस्य स्थापना तैर्व्यधायि। पाटलिपुत्रस्य श्रमणैः अफगानिस्तान-लंका-नेपाल-तिब्बत-तुर्कीस्तान-चीन-जापान-बर्मा-इण्डोचाइना-जावा-सुमात्रादिसुदूरदेशेषु भारतीय सभ्यतासंस्कृति-धर्माणाञ्च विस्तारोऽकारि। एकसहस्रवर्षसुदीर्घकाले पाटलिपुत्रं सम्पूर्णेशियाकेन्द्रभूतमासीत्। राजनीति-शिक्षा-धर्मदृष्ट्या पाटलिपुत्रेण समस्तभारतोपरि शासनं कृतम्।

प्राचीनषोडशजनपदेषु मगधस्य स्थानं सर्वोपरि विद्यते। मगधस्य प्राचीना राजधानी गिरिव्रजमासीत्। परमेतन्नगरं गंगोत्तरे विद्यमानवज्जिसंघस्याक्रमणैः

---

१. पाणिनिकालीनम् भारतवर्षम्, मोतीलाल बनारसीदास, वाराणसी, प्रथम संस्करणम् पृष्ठ १५ से उद्धृत।

सुरक्षितं नासीत् । एतस्योरि निरन्तरं वर्ज्या (वज्जियों के) णामाक्रमणमभूत् । अत एवैकदा गिरिव्रजे महानग्निदाहोऽजनि । फलतः गिरिव्रजस्योत्तरस्यामनतिदूरे नवीनमेकंनगरं विम्वसारेण निर्मितं, यस्य नामकरणं राजगृहं विहितम् । राजगृहस्य निर्माणं दुर्गरूपेण कृतम्, येन वर्ज्याणामाक्रमणैः सुरक्षितं तिष्ठेत् । उद्देश्येऽस्मिन् सफलताप्यवाप्ता तथा वज्जिसंघमगधयोर्मध्ये संधिरभवत्, वैवाहिक सम्बन्धोऽपि-स्थापितः । वज्जि-कुमार्याः चेल्लनायाः विवाहो विम्बिसारेण सह सम्पन्नोऽभूत् ।

बिम्वसारः द्वापञ्चविंशतिवर्षाणि यावत्राज्यमकरोत् । अस्य ज्येष्ठपुत्रस्य नाम दर्शक आसीत् । पितरि वृद्धे जाते, सम्पूर्णं राज्यकार्यं दर्शक एव सम्पादय न्नासीत् । परं दर्शको यावद्राज्यमकरोत्, तावत्पितुर्जीवनकाल एव । बिम्बिसारानन्तरं मगधस्य राज्यसिंहासनेऽजातशत्रुः समासीनोऽभवत् । स च पितरं निहत्यांगंमगध-ञ्च द्वयमपि जनपदं प्राप्तवान् । बिम्बिसारः स्वराज्यशासनस्यान्तिमवर्षेषु अजातशत्रुं चम्पायां शासने नियुक्तवान् । मगधस्य शासनं राजा स्वयं स्वजेष्ठपुत्रस्य दर्शकस्य सहायतयाऽकरोत् । अजातशत्रुः अङ्गजनपदस्य शासनेन सन्तुष्टोनासीत् । अत एवासौ स्वपितरं विम्बिसारं निहत्य मगधस्यापि शासनं प्राप्तवान् ।

अजातशत्रोः पश्चात् तस्यपुत्र 'उदायी' भद्रः राज्यशासनारूढोबभूव । उदायीभद्रः स्वपितुः मृत्योरनन्तरं चम्पां राज्यगृहञ्च शून्यमिवामन्यत । स स्वपितुः सभास्थानं क्रीडास्थानं शैन्यकक्षादिकञ्च वीक्ष्य पूर्वस्मृतेः जागरणेनोद्विग्नोऽतिष्ठत् । अत एवासौ निजामात्यैः सह नूतननगरनिर्माणार्थं परामर्शं चकार । राजनैतिकदृष्टया-प्येतदुचितमासीत्, यत् मगधस्य विस्तृतसाम्राज्यस्य राजधानी राजगृहादन्यत्र स्थापिता भवेत् । अजातशत्रुणा विजितप्रदेशानां शासनं राजगृहतो संभवं नासीत् । अतएव एतदावश्यकमासीत् यद्विशालमगधजनपदस्य राजधानिकैतादृशे नगरे स्थापिता स्यात्, यतोऽङ्गवंगविदेहप्रदेशाः समीपवर्तिनो भवेयुः । फलत उदायी विविधनैमित्तिकानाहूय नवराजधानिकायोग्यस्थानचयनार्थं प्रेरणां गृहीतवान् ।

पाटलिपुत्रस्य स्थापना

अमात्याः नैमित्तिकाश्च भ्रमन्तो गङ्गातटमुपागमन् । पाटलसज्जितं छवियुक्तं पाटलवृक्षसमन्वितं पाटलिग्राममवेक्ष्य ते चकिताः बभूवुः । तरुशाखायां 'चास' नाम-पक्षी मुखं विवृत्योपविष्ट आसीत् । कीटाः स्वयं तस्य मुखे समागत्य पतन्ति स्म । घटनामिमामवलोक्य ते विचारितवन्तो यत् अत्र नगरनिर्माणेन राज्ञे लक्ष्मीप्राप्तिर्भ-विष्यति । फलतः पाटलिग्राममेव समृद्धं विधाय ते 'पाटलिपुत्रं विहितवन्तः ।

महात्मनो बुद्धस्य समये पाटलिपुत्रमेको लघुजनपद आसीत् । तदानीं मगधस्य राजधानी राजगृहमासीत् । राजगृहतः कुशीनगरं गच्छता बुद्धेन पाटलिग्रामे विश्रामो विहितः । तदानीं राजाजातशत्रुः पाटलिग्रामस्य परिखानिर्माणं कारय-

न्नासीत् । मगधस्य प्रधानामात्यो वर्षकारः कार्येस्मिन्नियुक्तोऽभवत् । बौद्धसाहित्यस्य जैनसाहित्यस्य चाध्ययनेन ज्ञायते यत् 'उदायी'-द्वारा पाटलिपुत्रस्य निर्माणात्पूर्वमपि पाटलिग्रामस्य राजनैतिकमहत्त्वं वर्धमानमासीत् । ततः शनैः शनैः 'उदायी'-कारणात् पाटलिपुत्रस्य समृद्धिः वृद्धिगता तथाऽसौग्रामः भारतवर्षस्य प्रधाननगरमभवत् । पुष्पसमृद्धिकारणात् एवैतत् पुष्पपुरं कुसुमपुरञ्चापि कथ्यते स्म ।

पाटलिपुत्रस्य राजनैतिकगौरवम्

हेमचन्द्रराय चौधरी मते[1]नहर्यङ्ककुलस्य विम्बिसारस्य पश्चात् उदयी, अनिरुद्धः, मुण्डः, नागदर्शकश्च राजसिंहासने समासीना अभवन् । शिशुनागः महान् प्रभावकः राजासीत् । देवदत्तरामकृष्णभण्डारको लिखितवान् यत् नायं केवलं कोशलस्यापितु अवन्त्या अपि स्वामी बभूव[2] । शिशुनागः पंचनदं राज्यस्थानञ्च विहाय समस्तमुत्तरं भारतं निजाधीनं चकार । महावंशटीकानुसारं शिशुनागेन मगधस्य विकासार्थं विविधाः प्रयत्नाः कृताः । शिशुनागपुत्रेण काकवर्णेन मगधसाम्राज्यस्य वृद्ध्यर्थं विविधाः प्रयासाः विहिताः । ब्रह्माण्डपुराणे काकवर्णस्य कार्याणामुल्लेखो विद्यते ।[3] एतेनैतद्ध्वन्यते यत् काकवर्णो मगधे शिक्षा-साहित्ययोः पूर्णं विकासं कृतवान् । शिशुनागवंशे मुण्डः पाटलिपुत्रस्य विकासे विशेषयोगदानं कृतवान् । एतद्वंशस्य पश्चात् नन्दवंश-साम्राज्यं प्रारभ्यते । नवनन्दैः पाटलिपुत्रस्य समृद्धौ चमत्कार उदपादि । महापद्मो महापद्मपतिर्वा महानन्दिपुत्रः आसीत् । जैनपरम्परानुसारं शूद्रोऽयमासीत् तथा मगधराजकुमाराणां संरक्षको नियुक्तोऽभवत् । कथितमस्ति यदेकदा नन्दः सम्पूर्णनगरं स्वपुरीषेणाच्छादितं ददर्श । अन्येद्युः स स्वस्वप्नं स्वपुरोधसे कथितवान् । पुरोधा एतत्स्वप्नाभिप्रायमवगत्य स्वकन्ययासह नन्दं विवाहितवान् । अयंनन्दः शिशुनागवंशानन्तरं मगधस्य शासको निर्वाचितोऽभवत् ।[4]

पाटलिपुत्रसम्बन्धे प्राप्ततथ्यानि

पाटलिपुत्र सम्बन्धेऽनेक किंवदन्त्यः साहित्यिकोल्लेखाश्च प्राप्यन्ते । बुद्धो भविष्यवाणीं कृतवान् यत् प्रसिद्धस्थानेषु, हट्टेषु नगरेषु च पाटलिपुत्रं सर्वश्रेष्ठं भविष्यति, परं जनानलान्तरिककलहैरेतत्संकटग्रस्तं भविता । बुद्धकाले पाटलिपुत्रमेकोलघुग्राम आसीत् । परमुदयिनैतन्नगरं विशालं विहितम् ।

१. कलिपाठ की भूमिका, परिच्छेद, ४२ ।
२. इंडियनकल्चर भाग १, पृष्ठ १६ ।
३. ब्रह्मपुराण २६।२०।२८ ।
४. परिशिष्ट पर्व ६।२३१–३२ ।
५. महावग्ग ६।२,८७, महानिब्बाणसुत्त, दीघनिकाय, पृष्ठ १२३ (राहुलसंस्करण)

ह्वेनस्वाङ्गानुसारं ब्राह्मणशिष्यस्यैकस्य विवाहः खेलरूपेणैकया पाटलिशाखया विहितः। सायंकाले कश्चन वृद्धोमनुष्यएकया स्त्रिया श्यामया कन्यया च सहात्रागतः पाटलिनीचैश्च तेन रात्रिविश्रामोऽकारि। ब्राह्मणकुमारेणास्याः कन्यायाः पुत्र उत्पादितः।[1] अतएव चास्य ग्रामस्य नाम पाटलिपुत्रं बभूव। अन्यन्मतमस्ति यदेकेनार्येण मातृपूजकवंशस्यैकया कन्ययासह विवाहःकृतः, वंशपरम्परानुसारञ्चास्य नगरस्य नाम पाटलिपुत्रं रक्षितम्।

वाडेलस्य[2] मतमस्ति यत्, पाटलिनरकविशेषोऽस्ति तथा पाटलिपुत्रस्यार्थः नरकात् पितुरुद्धारकः भवति। अस्य नगरस्य प्राचीनं नाम कुसुमपुरं पुष्पपुरञ्चाप्यास्ताम्। यूनानदेशीयाः नगरमिदं 'पल्लीवोथरा' तथा चीनदेशीयाः 'पलीनं' कथयन्ति।

यदा तक्षशिलायां विदेशिनामाक्रमणकारणात् ब्रह्मविद्यायाः प्रबलता ह्रासोन्मुख्यभवत्, तदा जनाः पूर्वदिशं प्रयाताः, तथा भारतस्य प्राचीनां राजधानीं पाटलिपुत्रमुपगताः।

श्री दामोदरगुप्तः कुट्टनीमतकाव्ये पाटलिपुत्रस्य शिक्षादृष्ट्या विशेषमहत्त्वं प्रतिपादितवान्। एतच्च सरस्वतीकुलगृहमभिहितम्। पाटलिपुत्रे सम्पूर्णशास्त्राणां ज्ञातारः महान्तो विद्वांसो निवसन्तिस्म। तत्स्थानं सारस्वतानां प्रमुखकेन्द्रतामुपगतम् शास्त्रार्था इह निरन्तरमभवन्। दामोदरः काश्मीरराजस्य जयापीडस्य (ई० सन् ७७-९-८१२) समकालीन आसीत्। अयं तन्मन्त्री आसीत्।

अस्ति महीतल-तिलकं सरस्वतीकुलगृहं महानगरम्।
नाम्ना पाटलिपुत्रं परिभूतपुरन्दरस्थानम्॥
त्रिभुवनपुरनिष्पादनकौशलमिव पृच्छतो विरिंचस्य।
दर्शयितुं निजशिल्पं वर्णकमिव विश्वकर्मणा विहितम्॥
अश्रेयोभिरनाश्रितमभिभूतं नाभिभूतिदोषेण।
न स्वीकृतमुपसर्गैः कलिकालमलैरनालीढम्॥

× × × ×

तिष्ठन्तु सकलशास्त्र-व्यालोकनविमलबुद्धयो विप्राः।
सदसद्गणनिर्णीतौ ललना अपि निकषभूमयो यत्र॥

× × × ×

---

१. वाटरस २।८७।
२. रिपोर्ट ऑन एक्सकेमेशन एट पाटलिपुत्र कलकत्ता १९०३।

संयमनमिन्द्रियाणामिनोपघातग्रहस्तमिस्रस्य ।
स्तब्धत्वं तालतारी हारलतास्तरलसंगतायस्मिन् ।।

× × × ×

तस्मिन्मखशतपूतः पुरुहूत इव द्विजन्मनां प्रवरः ।
गुरुरिव विद्यावसतिर्वसतिस्म पुरन्दरो नाम्ना ।।

× × × ×

श्रुतिभेदेषु विवादो नो रिक्थविभागमन्युना कलितः ।
तेजस्विता हविर्भुजि न शमैकरतेषु भूमिदेवेषु[1] ।।

अर्थात्–पाटलिपुत्रं पृथिव्यास्तिलकं सरस्वत्याः कुलगृहं तथा स्वसौन्दर्येणामरावतीमपि तिरस्कुर्वदासीत् । इदममंगलैरनासृतं पराभवदोषैर्मुक्तं सर्वप्रकारोपद्रवैः पृथक् कलिकालदोषैश्च रहितमासीत् । पाटलिपुत्रे शिक्षायाः एतावानधिकःप्रचार आसीत् यत् पुरुषाणां का वार्त्ता ? नार्योऽपि सम्पूर्णशास्त्रचर्चानिपुणा आसन् । अत्रेन्द्रियाणि नियन्त्रितान्यभवन् । विभिन्नशास्त्राणि पाठ्यन्तेस्म । तथा सुखं शान्तिश्च पूर्णरूपेण विद्यमाने आस्ताम् ।

एवं प्रकारेण पाटलिपुत्रे पुरन्दरसदृशः शताधिकयज्ञै पवित्रः बृहस्पतिसमानो विद्वान् ब्राह्मणश्रेष्ठः पुरन्दरनामा द्विजो न्यवसत् । तस्मिन् युधिष्ठिरस्य सत्यता, महादेवस्य कामजयिता, ब्राह्मणो जितेन्द्रियता, बृहस्पतेः पाण्डित्यञ्च विद्यमाना न्यासन् ।

पाटलिपुत्रे निरन्तरं शास्त्रार्था अभवन् । वेदवेदांगादिविषयाणां कथाः निरन्तरं प्रवर्त्तमाना आसन् ।

दामोदरगुप्तेनास्मिन्नेव काव्ये पाटलिपुत्रे सम्पन्नानां गोष्ठीणामपि चर्चाकारि । गोष्ठीष्विमासु शास्त्रार्थचर्चाः कलाचर्चाश्चाजस्रमभवन् । लिखितमस्ति—

पश्यन् विदग्धगोष्ठीरभ्यस्यन्नायुधानि विविधानि ।
शास्त्रार्थानधिगच्छन् विलोकयन् कौतुकान्यनेकानि ।।
जानन् पत्रच्छेदनमालेख्यं सिक्थपुस्तकर्माणि ।
नृत्यं गीतोपचितं तन्त्रीमुरजादिवाद्यभेदांश्च ।।
बुध्यन् वंचकभंगीर्विटकुलटानर्मवक्रकथितानि ।
बभ्राम सुहृत्सहितः सुन्दरसेनो महीमखिलाम् ।।

—कुट्टनीमतम् २३५–३७

---

१. कुट्टनीमतकाव्यम्, इण्डोलॉजिकल बुक हाउस, वाराणसी, पद्यसंख्या—१७६ से १७८ तक, १८१, १९०, १९३, १९९ ।

विदुषां गोष्ठीं पश्यन्, विविधानि शस्त्राण्यभ्यस्यन् शास्त्राणामभिप्रायं जानन्, नानाविधकौतुकाश्चर्याणि विलोकयन् पत्रच्छेदनकलामालेखचित्रकर्म सिक्थपुस्त-कर्माणि च कुर्वन्, नृत्यगीततन्त्रीमुरजादिवाद्यविशेषेषु निपुणतां प्राप्नुवन् हास्य-व्यङ्ग्ये प्रवृत्तिं बुध्यन् सुन्दरसेनः मित्रेण सह पाटलिपुत्रे भ्रमणं कर्त्तुं प्रारब्धवान् । नगरेऽस्मिन् आचारव्यवहारनिपुणाः, शास्त्रज्ञाः, कलामर्मज्ञाः जनाः निवसन्ति स्म ।

निस्सन्देहं पाटलिपुत्रं गौतमबुद्धकालादेव भारतस्य महानगरं मन्यतेस्म[1] । स एतन्नगरस्याभ्युदयं विचारयन् स्वशिष्यमानन्दमुक्तवान् यन्नगरमिदं शीघ्रमेवा-गामिनि समये भारतस्य सर्वश्रेष्ठं नगरं भविष्यति[2] । तत्कालीना अनेक व्यापारि-वर्गाः नगरेऽस्मिन्नागत्य गच्छन्ति स्म । अत एवैतद् वाणिज्यस्य महत्केन्द्रभूतमासीत् । इह देशस्य सुदूरभागेभ्यो वस्तुनो मुद्रिताः ग्रन्थयः निरन्तरमायान्त्य आसन् । प्रामाणिकतायै इमाः मुद्राः गणविकेतॄणां समक्षं त्रोट्यन्ते स्म । एतदुपरान्तं गणविक्रेतारः पण्यजातं साधारणविक्रेतॄणां हस्तेषु विक्रीणन्ति स्म । मुद्राणां निरन्तरं त्रोटनात् पाटलिपुत्रं पुष्पभेदनं कथ्यते स्म[3] ।

बौद्धसाहित्याज्ज्ञायते यत् वाराणस्याः एकेन धनाढ्येन पाटलिपुत्रे–'छोटमुखी' नामकएको विहारः निर्मापितः । अस्मिन् गौतमबुद्धेनानेकसारगर्भितभाषणानि कृतानि, यैः प्रभाविता अनेकजनाः बौद्धधर्मे दीक्षिता अभवन् । नन्दकाले, मौर्यकाले चैतन्नगरं प्रतिष्ठां परामध्यगच्छत् ।

मौर्यकाले नगरमेतत् स्वाभ्युदयस्य पराकाष्ठामुपगतम् । यूनान देशीयो लेख-कोमेगास्थनीजो लिखितवान्—यत् पाटलिपुत्रं भारतस्य प्रमुखनगरमस्ति । एतन्नगरं शिक्षा-व्यवसाय-राजनीतिदृष्टया भारतस्य सर्वश्रेष्ठं केन्द्रनगरम् । इदं सार्धनवमील गायतं सपादत्रयद्विमीलं विस्तृतञ्चास्ति । अस्य शासनं परिषदैकया सम्पद्यमानामासीत् ।

विनयटीकानुसारं पाटलिपुत्रे चत्वारि प्रधानद्वाराण्यासन् । एतद्द्वारद्वाराऽशोकस्य राजकोपे प्रत्यहं चत्वारिंशल्लक्षकार्षापणान्यागच्छन् । एष आयो वहिरागत-व्यापारिभिः नगरद्वारिप्रदत्तनगरकर(चुंगी) शुल्केभ्योऽभवत् । मौर्यराजेन प्रजा-लाभार्थं पाटलिपुत्रे महामात्यानां नियुक्तिः कृता । इमे महामात्याः द्विप्रकारका आसन्—

(१) नगलकः ।

(२) नगलवियोहालकः ।

---

१. दिव्यावदान पृ० ५४४ ।

२. इदं अग्गनगरं भविस्सति–दीघनिकाय २, १६, १–२६ ।

३. पाटलिपुत्रं प्राप्त भेदनम्–दीघनिकाय २।१६।१।१६ ।

इमौ द्वावपि महामात्यौ नगरस्य न्यायशासनमकार्ष्टाम् । मौर्यकाले पाटलिपुत्रं विपश्चितामक्षवाट आसीत् । अत्र सर्वेषां विषयाणां विशेषज्ञान्यवसन् ।

मौर्याणामधःपतनानन्तरं शुंगैः पाटलिपुत्रे स्वराजधानी स्थापिता । पुष्यमित्र-शुंगस्य समकालीनो लेखकः पतञ्जलिरस्य नगरस्य प्राकाराणां प्रासादानाञ्चोल्लेखं कृतवान्[1] । शुंगकाले तक्षशिला-मथुरा-साकेतवत् पाटलिपुत्रेऽपि यवनैराक्रमणमकारि । युगपुराणस्य वर्णनेनानुमीयते यदैराक्रमणकारिभिरिहत्याः नागरिकाः परं पीडिताः । यतस्ते रक्षार्थं व्याकुला अभवन्[2] । अत्रेदमुल्लेखनीयमस्ति यत् उपद्रव एष शीघ्र-मेव शान्तोजातः । युगपुराण एवेत्थमस्ति—

तेषामन्योन्यसम्भावाद् भविष्यति न संशयः ।
आत्मचक्रोत्थितं घोरं युद्धं परमदारुणम् ॥[3]

अर्थात् पारस्परिककलहकारणात् आक्रमणकारिणोनगरं विहाय स्वदेशं परा-वर्तिताः । फाहियानस्य वर्णनादपि ज्ञायते यत् पाटलिपुत्रस्य साहित्यिकं सांस्कृतिकञ्च महत्त्वमत्यधिकमासीत् । मुद्राराक्षसनाटकस्याध्ययनादपि अवगम्यते यत् पाटलि-पुत्रस्य रक्षार्थं राक्षसमंत्रिणा पूर्णा व्यवस्था व्यधायि । शिलालेखैरेतत्प्रमाणीक्रियते यत् पाटलिपुत्रे बुद्धिजीविनां मण्डलीषु विद्वासः कविराजोपाधिनालङ्क्रियन्ते स्म । समुद्र-गुप्तोऽप्येतदुपाधिधारी आसीत्—"विद्वज्जनोपजीव्यानेककाव्यक्रियाभिः प्रतिष्ठित-कविराज शब्दस्य" । समुद्रगुप्तेन बह्वो विद्वांसउच्चपदे प्रतिष्ठापिताः । हरषेणः तस्य महासंधिविग्रहिको दण्डनायकः कुमारामात्यश्च आसीत् । चन्द्रगुप्तविक्रमा-दित्योऽपि काव्यस्य परमप्रेम्यासीत् । 'कथासरित्सागरे'ऽयं पाटलिपुत्रस्यास्य सम्राट् कथितोऽस्ति । उदयगिरेरेकस्मिन् गुहालेखेऽयं व्याकरणन्याययोर्लोकनीतेश्च मर्मज्ञः पाटलिपुत्रनिवासी च कथितो वर्त्तते । लिखितमस्ति—शब्दार्थन्यायलोकज्ञः कविः पाटलिपुत्रकः ।

वामनः काव्यालङ्कारसूत्रवृत्तौ चन्द्रगुप्तपुत्रः चन्द्रप्रकाशः विदुषामाश्रयदाता-लिखितो वर्त्तते—

"सोऽयं सम्प्रति चन्द्रगुप्ततनयः चन्द्रप्रकाशो युवा,
जातो भूपतिराश्रयः कृतधियां दिष्टयाकृतार्थश्रमः ।

---

१. पाटलिपुत्रकाः प्रासादाः, पाटलिपुत्रकाः प्राकाराः, महाभाष्य भाग, २ पृ० ३२१ (कीलहार्न)

२. ततः पुष्पपुरे प्राप्ते कर्दमे प्रथिते हिते ।
आकुलाः विषयाः सर्वे भविष्यन्ति न संशयः ॥ युगपुराणम् पृ० ३३

३. युगपुराणम् पृ० ५५ ।

अत्रेदं विचारणीयमस्ति यत् अभिलेखेषु चन्द्रगुप्तविक्रमादित्यपुत्रस्य कुमारगुप्त प्रथमस्य 'कुलामलचन्द्र'—गुप्त-कुलव्योमशशि-प्रभृतयः उपाधयोऽङ्किताः लभ्यन्ते। इमाउपाधयः चन्द्रप्रकाशनाम्ना पर्याप्तंसाम्यं रक्षन्ति। अस्यां स्थितौ वामनस्य चन्द्रप्रकाशस्यैकतां पाटलिपुत्रनरेशेन कुमारगुप्तेन सह निर्धारयितुं शक्यते। एतद्द्वारा विदुषां संरक्षणमाश्चर्यजनकं नास्ति। ज्यौतिषशास्त्रस्य प्रवीणो विद्वान् आर्यभट्टः गुप्तबन्धुभिः सह सम्बद्ध आसीत्। अयं पाटलिपुत्रे शिक्षां प्राप्तवान्। कामसूत्रस्य रचयिता वात्स्यायनोऽपि पाटलिपुत्रनिवासी आसीत्। सुप्रसिद्धसाहित्यकारः दार्शनिकश्च विद्वानश्वघोषः कुषाणकाले पाटलिपुत्रे न्यवसत्। बौद्धिकक्षेत्रे पाटलिपुत्रस्य ख्यातिः सर्वाधिकासीत्। अतएव राजशेखरेण काव्यकाराणां परीक्षास्थानमुज्जयिनी तथा शास्त्रकाराणां परीक्षास्थानं पाटलिपुत्रं प्रत्यपादि। पाटलिपुत्रे विदुषामेका मण्डली आसीत्, या ग्रन्थकाराणां कृतीनां परीक्षामकरोत्। पाटलिपुत्रस्यैतद्विद्वन्मण्डलीद्वारा स्वीकृतौ प्राप्तयामेव ग्रन्थानां मान्यताऽभवत्। दण्डी 'स्वदशकुमारचरिते' पाटलिपुत्रं समस्तनगरललामभूतं कथितवान्—अस्ति समस्त नगरीनिकषायमाणा शश्वदगण्यपण्यविस्तारितमणिगणादि—वस्तुजातव्याख्यातरत्नाकरमाहात्म्या मगधदेश-शेखरीभूता पुष्पपुरीनाम नगरी।[3]

पाटलिपुत्रे शास्त्रकार-परीक्षा

राजशेखरेण काव्यमीमांसायामुक्तं यदुज्जयिन्यां काव्यकारपरीक्षैवं पाटलिपुत्रे शास्त्रकारपरीक्षाऽभवताम्। कालिदासः, भर्तृमेण्ठः, अमरः, रूपः आर्यसूरः, भारविः, हरिश्चन्द्रः, चन्द्रगुप्तश्च कवयः उज्जयिन्यां परीक्षिता अभवन्। पाटलिपुत्रे—उपवर्षः वर्षः, पाणिनिः, पिंगलः, व्याडिः, वररुचिः, पतञ्जलिश्च परीक्षितास्तथात उत्तीर्णास्ते सर्वत्र यशोऽर्जितवन्तः। लिखितमस्ति—

> अत्रोपवर्ष वर्षाविह पाणिनिपिङ्गलाविह व्याडिः,
> वररुचिपतञ्जली इह परीक्षिताः ख्यातिमुपजग्मुः।[4]

राजशेखर उक्तवान् महानगरेषु काव्यशास्त्रयोः परीक्षायै विद्वत्सया आयोजिता अभवन्। परीक्षोत्तीर्णा. विद्वांसः रथोपरि नगरे भ्राम्यन्ते स्म, पट्टबन्धसत्कृताश्च क्रियन्तेस्म। निःसन्देहं पाटलिपुत्रे शास्त्रकारपरीक्षाऽभवत्। नन्दयुगे मौर्य युगे च इदं नगरं देशस्य प्रसिद्धं विद्याप्रमुखमासीत्। 'सिंघली' महावंशस्य 'अत्थपकासनी' टीकायां

---

१. सरकार सेलेक्ट इंस्क्रिप्शंस, पृ० २५९।

२. वही पृ० २७२।

३. दशकुमारचरितम्, पृ० १।

४. काव्यमीमांसा, दशम अध्याय, कविचर्चा, राजचर्चा, वि० रा. प. संस्करण पृ० १३५।

चाणक्यस्यैकस्यां जीवनचर्चायां प्रतिपादितमस्ति यत् स शास्त्रपरीक्षोद्देश्येन पाटलिपुत्रमगच्छत्।

पाटलिपुत्रस्येयं संस्था मौर्यकालेऽपि जीविताऽसीत्। एतद्यवनराजदूतस्य मेगास्थनीजस्य विवरणे ज्ञायते। संवत्सरारम्भे सम्राडेकां महतीं सभामाहूय तस्यां विदुषः दार्शनिकांश्च निमन्त्रितानकरोत्। यो विद्वान् कस्मिंश्चिन्नवे विषये शास्त्र-रचनामकरोत्, कृष्यै पशु-सुधाराय वा कमपि नवमुपायं प्रकटमकरोत्, जनताहित-वृद्धौ वा कमपि नवं शोधं विहितवान् स विपश्चित् तां कृतिं शोधं वा सर्वेषां सम-क्षमरक्षत्। देशस्य सम्राट् तस्याः सभायाः संरक्षकोऽभवत्।

एतस्याः सभायाः कार्यं प्रायः तदेव ज्ञायते, यद्धि राजशेखरेण पाटलिपुत्रे 'शास्त्रकारपरीक्षे' ति नाम्नाऽभिहितम्। पाणिनेः 'सभाराजमनुष्यपूर्वा' (२।४।२३) सूत्रेणापि राजसभायां शास्त्रकारपरीक्षायासंकेत उपलभ्यते। एतत्सूत्रव्याख्यायां पतञ्जलिः मौर्यकालीनचन्द्रगुप्तसभायाः शुंगकालीनपुष्यमित्रसभायाश्चोल्लेखं कृतवान्[3]। चन्द्रगुप्तात्पूर्वं नन्दराजकालेऽपि पाटलिपुत्रे विद्वत्समारोहः विदुषामेकत्र सम्मेलनञ्चाभवताम्। मेगास्थनीजो लिखितवान्––'यः इमासु सभासु ध्रुवसत्यस्य प्रतिपादनं करोति, तं पुरस्कर्त्तु सर्वविधैः करैः मुच्यते स्म।" एतत्सम्बन्धे पत-ञ्जलेरपि शब्दएको विचारणीयोऽस्ति। अयं १।१।७३ सूत्रस्य भाष्ये सभासन्नयने भवः सभासन्नयनः' उदाहरणं दत्तवान्। पाणिन्यनुसारं सन्नयनस्यार्थः सम्माननं सम्मान-करणं वा विद्यते (सम्मानोत्संजनाचार्यकरणज्ञानभृतिनिगणनव्ययेषु नियाः) १।३।३६ सभायां शास्त्रस्य सफलप्रतिपादनं सन्नयनं कथ्यते स्म तदेव च तच्छास्त्रस्य तच्छास्त्रप्रतिपादकस्यच विदुषः सम्मानमभवत्। एवं प्रकारेणानुमीयतेयत् 'सभा-सन्नयन' शब्दः पाणिनिकालीन आसीत्। यः राजसभायां प्राप्तसफलोत्पन्न-सम्मानितपुरस्कारकृते प्रयुक्तोऽभवत्।

एतत्सम्मानस्यार्थिकस्वरूपस्य परिज्ञानं शूआन-चुआङ्स्योल्लेखैः प्राप्यते। अष्टा-ध्यायीशास्त्रे साङ्गोपांगव्युत्पन्नेभ्यो विद्वद्भ्यएकसहस्रमुद्रादानादेशः राज्ञोऽभवत्। पाणिनिः एवं विद्याचारनियतद्रव्याय 'धर्म्य' शब्दस्य प्रयोगं कृतवान्। एवं हि य एवं विद्याचारनियतधर्म्यं स्वीकरोतिस्म, स 'हारी' (सम्मानद्रव्यस्यपुरस्कार-द्रव्यस्य) वा नेता कथ्यते स्म। (सप्तमो हारणो धर्म्येऽहरणे, २।२।६५) काशिकायां लिखितमस्ति "हारीतिदेयं यः स्वीकरोति, सोऽभिधीयते धर्म्यमित्या-चारनियतं देयमुच्यते। धर्मोऽनुवृतआचारः, तस्मादनपेतं, तेन वा प्राप्यमिति।" एतेन स्पष्टमस्ति यत् पाणिनिकाले पाटलिपुत्रे विद्वत्सभाऽभवत्, यस्यां विद्वांसः

१. स्त्राबो, १५।१ मैक्रिंडिल, 'मेगस्थने' उद्धरण, ३३, दियोदोरकाउल्लेख।
२. महाभाष्यम् १।१।६८। वार्तिक–७

२

तत्कृतयो वा पुरस्कृता अभवन् । पतञ्जलिः ६।२।६५ सूत्रस्य भाष्ये 'वैयाकरणहस्ति' उदाहरणं दत्तवान्, येन ज्ञायते यत् वैयाकरणैः एतत्प्रथाधारे नियतदेयद्रव्यरूपेण हस्ती प्राप्यते स्म । भाषायां 'सभासन्नयन' सदृश-शब्दानां चरितार्थता वैयाकरण-हस्ति-सदृशप्रयोगेभ्य आसीत् । व्याकरणस्य पाण्डित्याय हस्तिपुरस्कारस्य कल्पना प्राच्यदेश एव संभवाऽसीत् । यत्र कौटिल्यानुसारं सर्वश्रेष्ठाः करिणः प्राप्यन्ते स्म । कौटिल्यः स्वयमपि विद्वद्भ्यः एकसहस्रकार्षापणं पूजावेतनस्य कृते लिखितवान् ।[१] अतएवैतत्स्पष्टमस्ति यत् पाटलिपुत्रे शास्त्रकारपरीक्षाऽभवत्तेपुरस्कृताश्चाभवन् विद्वांसः । मंजुश्रीमूलकल्प-राजशेखर-सोमदेव-तारानाथाना-मनुश्रुतिभिरपि सिद्ध्-यति यत्प्राचीनभारते पाटलिपुत्रं विद्यायाः समृद्धं केन्द्र मासीत् । अत्र विभिन्न शास्त्राणां ज्ञातारः विद्वांस आयन्ति स्म । पण्डितैः तेषां कृतयः प्रशंसिता अभवन्, ते च सम्मानिता अजायन्त ।

राजशेखरः यस्यां शास्त्रकारपरीक्षायां ध्यानाकर्षणं कृतवान्, सा नन्दमौर्ययो र्युगे प्रचलितासीत् । चाणक्यः अस्याः शास्त्रपरीक्षासभायाः यशः श्रुतवान् । अत एव स स्वयंख्यातिलाभार्थं पाटलिपुत्रे उपस्थितोऽभवत् । पाटलिपुत्रस्यैषा परम्परा गुप्तकालं यावत् प्राचलत् । पाटलिपुत्रस्य यशश्चापि विद्या क्षेत्रे विकसदासीत् ।

राजशेखरोल्लिखिताः सर्वे आचार्याः शास्त्रकाराः सन्ति । एतेषां सम्बन्धे विचारः, पाटलिपुत्रेण सहैतेषां सम्बन्धनिर्धारणञ्चास्मिन्सन्दर्भे परमावश्यकमस्ति ।

उपवर्षः

मीमांसायाः वेदान्तस्य च सूत्राणां भाष्यकररूपेणोपवर्षस्य प्रसिद्धिरस्ति[२] । शङ्कराचार्यः शब्दविषये आचार्योपवर्षस्य मतस्य प्रमाणं प्रदत्तवान्[३] । कृष्णदेव-तन्त्रचूडामणौ कथितमस्ति यत् मीमांसासूत्रवृत्तिमयं लिखितवान् । शावरभाष्ये उपवर्षस्योदाहरणानि प्राप्यन्ते । कथासरित्सागरे उपवर्षसम्बन्धे कथितमस्ति यत् कात्यायनेन सहास्यकन्यायाः उपकोशायाः परिणय आसीत्—

> इन्द्रदत्तो मया पृष्टस्ततः केयं भवेदिति,
> उपवर्षसुता सेयमुपकोशेति सोऽब्रवीत् ॥
> सा सखीभिश्च मां ज्ञात्वा प्रतिपेशलया दृशा ।
> कर्षन्ती मन्मनः कृच्छ्रादगच्छद् भवनं निजम् ॥[४]

---

१. विकसदासीत् ।

१. शाङ्करभाष्य ३।३।५३, जैकोवी अमरीकी प्राच्यपरिषद्, पत्रिका सन् १९१२, पृ० १५ ।

२. शारीरिक भाष्य ३।३।५३, १।३।२० ।

३. कथासरित्सागर, चतुर्थ तरंग, श्लोक ४–५ ।

कथासरित्सागरस्योक्ततथ्यस्य पुष्टिः भोजस्य शृङ्गारप्रकाशीयदूताध्यायेनापि भवति। ग्रन्थेऽस्मिन् कथितमस्ति यत् वररुचिगुरुरुपवर्पः स्वकन्याया उपकोशायाः विवाहं वररुचिना कात्यायनेन वा सह कथं सम्पादितवान्।

उपवर्पः व्याकरणसूत्रप्रणेतुः पाणिनेः गुरोः वर्पस्य भ्राता मतोऽस्ति। अवन्ती सुन्दरी कथासारे व्याडि-इन्द्रदत्तोपवर्षाणां समुल्लेख आयातोऽस्ति। एतेनैतत्प्रतीयते यत् उपवर्पः व्याकरणशास्त्रस्य मीमांसाशास्त्रस्य च ज्ञाता आसीत्। समय एतस्य (ई० पू०) चतुर्थी शताब्दी सम्भाव्यते। पाटलिपुत्रे व्याकरणशास्त्रस्य शिक्षा विशेष-रूपेण दीयते स्म, यतो सुदूरदेशेभ्यश्छात्राः अध्ययनार्थमायान्तिस्म। वर्षोप-वर्षो भ्रातरावास्ताम्। कथा सरित्सागरानुसारं वर्षः ज्येष्ठ आसीदुपवर्षश्च कनिष्ठ आसीत्।

महामहोपाध्यायः हरप्रसाद शास्त्री उपवर्षोपवर्षपाणिन्यादि नामानि कालक्रमा-नुसाराणि स्वीकृतवान्। यतः मगधवासिनः, कालक्रमस्येतिहासस्य च सज्ज्ञानवन्त आसन्[1]। अतएवोपवर्षस्य समयः पाणिनेः पूर्णं प्रतीयते।

पतञ्जलेः महाभाष्यादिदं ज्ञायते यत् तदानीं पृथ्व्याः त्रिपु लोकेपु वेद-वेदाङ्गोप-निपद्-इतिहास-पुराण-व्याकरणादिविषयाणां विस्तारो जात आसीत्। लिखित-मस्ति—"सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः साङ्गाः सरहस्याः बहुधा विभिन्नाएकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेद एकविंशतिधा बाह्वृच्यं नवधा-थर्वणो वेदो वाकोवाक्यमितिहासः पुराणं वैद्यकमित्येतावान् शब्दस्य प्रयोग विषयः (भाष्यं पस्पशाह्निकम्)" एतेनोद्धरणेन स्पष्टमस्ति यत् पाणिनेः पूर्वमेव समस्तशास्त्राणि प्रचारमागतान्यासन्। पाटलिपुत्रे एतेषां सर्वेषां शास्त्राणां परीक्षा सम्पन्ना जायते स्म।

जातकानामध्ययनेनापि ज्ञायते यत् तक्षशिलाया श्छात्राः अनेकविषयाणां ज्ञानार्थं देशभ्रमणाय निःसरन्तिस्म तथा ते पाटलिपुत्रे समागत्य परीक्षिता अभवन्। शालातुरे जन्मावाप्य पाणिनिरपि स्वक्षेत्रस्य प्रसिद्धेऽस्मिन् शिक्षास्थाने शिक्षार्थंगतो भवेत्। महावग्गे लिखितमस्ति यत् पाटलिपुत्रस्य राजवैद्योजीवकस्तक्षशिलायामा-युर्वेदस्य विशेषाध्ययनार्थं गतवान् तथा समाप्तेऽध्ययने यदासौ परावर्तनायाचार्या दत्तुमतिं याचितवान् तदाचार्य उवाच यत् तक्षशिलां परितोऽन्विष्य कामपि वनस्पति मीदृशीमानय यौपधिकार्ये प्रयुक्ता न स्यात्। जीवको मासपर्यन्तं वनस्पत्यन्वेषण-कार्यमकरोत्, परं नैतादृशी वनस्पतिर्लब्धा यौपधिकार्ये न गृहीता भवेत्। तक्ष-शिलामभितः नैतादृशी वनस्पतिरस्ति, यौपधिकार्ये न प्रयुज्यते। आचार्य उत्तरमेवं विधं श्रुत्वा प्रसन्नो जातस्तथाजीवकं पाटलिपुत्रगमनायानुमतिं ददौ।

---

१. मागधम् लिटरेचर, कलकत्ता, सन् १९२३, पृ० २३।

वस्तुतः तक्षशिला पाटलिपुत्रञ्च शिक्षायै परं प्रसिद्धे आस्ताम् । नन्दराज्यकाले पाटलिपुत्रे विदुषामेका महती मंडली आसीत्, या नवीनरचनानां परीक्षामकार्षीत् सर्वे लेखकाः स्वकृतीः पाटलिपुत्रस्य विद्वन्मण्डली-निकटे प्रेषयन्तिस्म । परीक्षितासु ताः प्रसिद्धिमाप्नुवन्तिस्म । उपवर्षः पाटलिपुत्रनिवासी आसीत् । एतस्य रचनानां परीक्षा पाटलिपुत्रे सम्भाव्यते । व्याकरणशास्त्रापेक्षयाऽयं मीमांसाशास्त्रस्य विशेषज्ञातासीत् । एतस्य यावतीनां रचनानां निर्देशो विद्यते, ताः सर्वाः मीमांसा सम्बन्धिन्यः सन्ति । महामहोपाध्यायः हरप्रसादशास्त्री इमं वास्तविकं जनं स्वीकृतवान्, न काल्पनिकम् । 'कथासरित्सागरे' 'वृहत्कथामञ्जर्याञ्च' उपवर्षस्योल्लेख-आयाति ।

वर्षः

'वर्ष'-सम्बन्धे कथासरित्सागरे कथितमस्ति यत् अयं पाणिनेः गुरुः आसीत् । लिखितमस्ति—

अथ कालेन वर्षस्य शिष्यवर्गो महानभूत् !
तत्रैकः पाणिनिर्नाम जडवुद्धितरोऽभवत् ।।
स शुश्रूषापरिक्लिष्टः प्रेषितः वर्षभार्यया ।
अगच्छत्तपसे खिन्नो विद्याकामो हिमालयम् ।।
तत्र तीव्रेण तपसा तोषितादिन्दुशेखरात् ।
सर्वविद्यामुखं तेन प्राप्तं व्याकरणं नवम् ।।
ततश्चागत्य मामेव वादायाह्वयते स्म सः ।
प्रवृत्ते चावयोर्वादे प्रयाताः सप्तवासराः ।।
अष्टमेऽह्नि मया तस्मिञ्जिते तत्समनन्तरम् ।
नभःस्थेन महाघोरो हुङ्कारः शम्भुना कृतः ।।
तेन प्रणष्टमैन्द्रं तदस्मद्व्याकरणं भुवि ।[1]
जिताः पाणिनिना सर्वेमूर्खीभूताः वयं पुनः ।।

अर्थात् पाणिनेः गुरोः नाम वर्ष आसीत् । वर्षशिष्येषु पाणिनिरपेक्षाकृत-मन्दबुद्धिरासीत् । किन्तु तीव्रतपसा शङ्करं प्रसाद्य स वरदानस्वरूपं व्याकरण-माप्तवान् । प्राप्ते व्याकरणे स सर्वप्रथमं स्व-सहपाठिनं कात्यायनं समाह्वयत । सप्त-दिनं यावत् निरन्तरं प्रवृत्ते शास्त्रार्थे कात्यायनः पाणिनिं पराजितवान् तदाकाश-स्थितः शङ्करः हुंकृतवान्, येन पृथिव्यामैन्द्रं व्याकरणमनश्यत् । तदध्येतारश्च मूर्खाः अजायन्त ।

एतेन कथांशेनापि वर्षोपवर्षयोरस्तित्वं सिध्यति । कतिपयविदुषामनुमान-

१. कथासरित्सागर, चतुर्थ तरंग, श्लोक २०-२५, वि० रा० प० पटना ।

मस्ति यत् वर्षः सम्भवतः अजातशत्रोः मन्त्रिणः वर्षकारादभिन्नोऽस्ति । वर्षः प्रतिभाशाली चिन्तनशीलश्च विद्वानासीत्, नात्र सन्देहः ।

पाणिनेः शास्त्रम्

भारतवर्षे व्याकरणमुत्तरा विद्या पड़्विधेषु वेदाङ्गेषु च प्रधानं मन्यते (व्याकरणं नामेयमुत्तरा विद्या भाष्यम् १।२।३२, प्रधानञ्च षट्पु अङ्गेषु व्याकरणम्) भाषायाः वर्गीकरणे प्रकृति-प्रत्यययोश्च विश्लेषणे यादृश्युन्नतिरस्मिन् देशेऽभवत्, नान्यत्र तादृशी । संस्कृतस्य वैयाकरणैः मूलशब्दानां रूपाणि पृथक् कृतानि, धातुप्रत्यययोः भेदाः ज्ञाताः ।, प्रत्ययार्थाः निश्चिताः, शब्दविद्यायाश्च तादृशं शास्त्रं निर्मितं यस्योपमा नान्यत्र प्राप्यते ।

पाणिनिः व्याकरणशास्त्रस्याद्वितीयो विद्वानस्ति । एतदष्टाध्यायी विशालतया, क्रमबद्धतया, विराटकल्पनयाच भारतीयमस्तिष्कस्य सर्वश्रेष्ठा कृतिः प्रमाणीक्रियते । पाणिनिः संस्कृतभाषाया अमरतां प्रदत्तवान् । स हि तादृशान् नियमान् प्रवर्त्तितवान् यैर्भाषायाः रूपमटकात् कटकपर्यन्तं हिमालयात् कन्याकुमारी पर्यन्तञ्चैकविधमेवातिष्ठत् ।

पाश्चात्यविदुषां दृष्टिर्यदा पाणिनिशास्त्रे समापतिता तदा ते तदालोकेनाभिभूताः जाताः । वेवरः स्वसंस्कृतभाषाया इतिहासे सर्वश्रेष्ठव्याकरणरूपेणाष्टाध्यायीं स्वीकृतवान्। गोल्डस्टर मतेन पाणिनिशास्त्रं संस्कृतभाषायाःस्वाभाविकं विकासं प्रस्तौति। एतच्छास्त्रमभितः प्राचीनकालादेवान्यमहत्त्वपूर्णग्रन्थानां रचना जायमानासीत् । भारतीयशास्त्रीयपरम्परायाः भूमौ पाणिने र्मूलं सर्वाधिकमन्तर्गतमस्ति । पाणिनेः सूत्रमतिसंक्षिप्तमस्ति । तेषां लघुतायै ये ये विविधोपायाः अङ्गीकृताः, ते तस्य मौलिकबोधं प्रकटयन्ति, सत्यामपि संक्षिप्तसरण्यां सूत्राणि परं स्पष्टानि सरलानि च सन्ति। एवन्त्वष्टाध्याय्याः रचनायाः पूर्वमपि शब्द-विद्यायाः पूर्णप्रचारप्रसारावास्ताम्, परमष्टाध्यायीसदृशबृहत्सर्वांगपूर्णशास्त्रे समक्षमागते प्राचीनग्रन्थाः लुप्ता अभवन् ।यास्कनिरुक्तस्य सत्ता तु वैदिकार्थानां विवृत्यै एव सुरक्षिताऽभवत् ।

यास्क-पाणिन्योः समये याः चरणसंज्ञकवैदिकसंस्थाः आसन्, तासां परिषत्सु अनेकप्रकारैः शब्दानां ध्वनिनियमानामूहापोहोऽभवत् । चरणपरिषदामतिरिक्ता अपि कियन्त आचार्याः शब्दविद्याविषये ग्रन्थान् रचितवन्तः । पाणिनिः तस्याः समस्तसामग्र्याः पृष्ठभूमिरूपेण ग्रहणं विधाय स्वशास्त्रस्य प्रणयनं कृतवान् । असौ स्वसमयस्य वार्तालापस्य (सर्वसाधारणजनव्यवहारस्य) भाषायाः शोधं विधाय स्वसामग्र्याः संकलनं कृतवान् । तस्य समक्षं संस्कृति-वाङ्मयस्य लोकजीवनस्य च वृहद्भाण्डारो विवृत आसीत् । एष भाण्डारो नित्यप्रयुज्यमानैः शब्दैः पूर्ण आसीत् । अस्य भाण्डारस्य यो शब्दः शब्दार्थरचनादृट्या किमपि निजं वैशिष्ट्यमवहत्

तस्योल्लेखं सूत्रेषु गणपाठेऽपि कृतो विद्यते । तत्कालीनजीवनस्य विशदविवेचनमष्टाध्याय्याः सूत्रेष्वायातमस्ति ।

पाणिनेः शैल्याः विशेषताऽस्मिन् वृत्तेऽस्ति यत् स धातुभ्यः शब्दनिर्वाचनपद्धतिं स्वीकृतवान् । एतदर्थं तेन लोके प्रचलितधातूनां महान् संग्रहोधातुपाठे विहितः । अद्यापि देशस्यास्यार्यभाषाणां क्षेत्रीयभाषाणां च तुलनात्मकाध्ययनाय पाणिनिद्वारा संगृहीतो धातुपाठः धातूनामर्थानाञ्चदृष्ट्या परममूल्यवानस्ति । अन्यत्र पाणिनिना: यथा धातुभ्यः सञ्ज्ञाशब्दाः निष्पादिताः, तेषां प्रक्रियाः अङ्किताः कृदन्तानां दीर्घासूची प्रदत्ता, तया लोकभाषायाः लोकसाहित्यस्य लोकजीवनस्य च सम्यगध्ययनं कर्त्तुं शक्यते ।

पाणिनिः पूर्वप्रचलितमतानामप्युल्लेखं कृतवान् तथा यत्र विरोधीनि मतानि विलोकितानि, तत्र तेन मध्यमार्गः स्वीकृतः । लोके शब्दानां महान् भाण्डारोऽस्ति । भाण्डारेऽस्मिन् कियन्तः शब्दाः एतादृशाः सन्ति, येषु धातुप्रत्यययोः सम्बन्धो घटितो न भवति । एतादृशेषु शब्देषु हठात् प्रत्ययमारोप्य तेषां सिद्धिः न केवलं क्लिष्टकल्पनास्ति, प्रत्युत यदा-कदा व्याकरणशास्त्रस्योपहासोऽपि विद्यते । एतादृशाः शब्दाः लोके स्वयं उत्पद्यन्ते, अर्थैः सह तेषां सम्बन्धो युज्यते तथा ते लोकानां कण्ठे स्थित्वा व्यवहारे आयान्ति । तेषां कृते लोक एव प्रमाणमस्ति । एतादृशान् शब्दान्-पाणिनिः संज्ञाप्रमाणानभिहितवान् । केचन एतादृशोऽपि शब्दाः सन्ति, येषु व्याकरणस्य नियमानां प्रवृत्तिर्न भवति । ते यादृशाः सन्ति, तादृशा एव लोककण्ठे विद्यमानाः सन्ति । एतादृशाः शब्दाः यथोपदिष्टाः प्रामाणिकतां गताः सन्ति ।

उणादिप्रत्ययाः पाणिनिना स्वशास्त्रे प्रमाणभूताः स्वीकृताः, परं क्रमानुसारं तेषां व्यवस्था न विहिता । 'उणादयो बहुलम्' (३।३।१) सूत्रं लिखित्वा तेन उणादिशैल्या शब्दनिष्पादनस्य प्रक्रिया स्वीकृता । परं 'बहुलम्' उक्त्वा दीर्घस्वातन्त्र्यमपि प्रदत्तम् । लोकप्रचलितशब्देभ्योमान्यतापि तेन प्रदत्ता ।

शब्दस्यार्थः व्यक्तिः, जातिर्वेति प्राचीनविवाद आसीत् । महाभाष्ये विस्तृत शास्त्रार्थोऽस्मिन् विषये दत्तोऽस्ति । आचार्यवाजप्यायनस्य मतमासीत्—

आकृत्यभिधानाद्वैकं विभक्तौ वाजप्यायनः (१।२।२४।३५) अर्थात् गोशब्दस्यार्थः गोजातिमात्रमस्ति । आचार्यः व्याडिः—द्रव्याभिधानं व्याडिः(१।२।६४।४५) अर्थात् 'गो' शब्दः व्यक्तिरूपस्य केवलस्यैकस्य गोर्वाचकः । पाणिनिरुक्तयोः द्वयोः मतयोः सत्याभासमवाप्य द्वाभ्यामपि मान्यता प्रदत्ता, लिखितञ्च—'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् (१।२।५८) तथा सरूपाणामेकशेष एक विभक्तौ (१।२।६४) सूत्रे लिखिते । प्रथमसूत्रे जातिमात्रं शब्दस्यार्थः कथितो द्वितीये च द्रव्यस्यैक व्यक्तेर्वा

शब्दस्यार्थो निगदितः। पतञ्जलिः महाभाष्यस्य प्रारम्भे 'पस्पशाह्निके' एतत्संम्बन्धे पाणिनेः स्थितिं विवृतवान्। एवं प्रकारेण पाणिनेर्महच्छास्त्रमष्टाध्यायी महत्त्वपूर्णग्रन्थोऽस्ति। वर्नेलः लिखितवान् यत्सार्धद्विसहस्रवर्षपरम्परानन्तरं मष्टाध्याय्याः पाठः यावान् प्रामाणिकः शुद्धश्च प्राप्यते, तावान्प्रामाणिकः शुद्धश्च नान्यस्य कस्यचन संस्कृतग्रन्थस्य मिलति[1]।

अष्टाध्याय्याः सूत्रेषु भूगोलेतिहाससंस्कृतिसम्बन्धिन्योऽनेकप्रकाराः सामग्र्यो लभ्यन्ते। निःसन्देहं पाणिनेः प्रादुर्भावः भाषायाः संकटकालीनपरिस्थितौ बभूव। यास्कस्य समयएव वैदिकभाषायाः युगः समाप्त आसीत्। नवाः नवाः ग्रन्थाः अध्ययन-विषयाः जायमानाः आसन्। गद्य-पद्ययोरेका नवीना भाषाशैली सम्मुख मागच्छन्त्यासीत्। तस्याः भाषायाः विस्तारक्षेत्रमुत्तरस्यां कम्बोजादारभ्य पश्चिम-दिशि कच्छकाठियावाडं यावत् दक्षिणदिशि अस्मकं यावत् एवं पूर्वदिशि कलिंगं 'सूरमसमसमस्य पर्वतीयप्रदेशं' यावच्च व्याप्तमासीत्। विशालेऽस्मिन् प्रदेशे क्षेत्रीयभाषाअपि विकसिता आसन्। परमेकच्छत्रसाम्राज्यस्य पटवन्धः संस्कृत-मूर्घ्न्यासीत्। संस्कृतभाषा-साहित्ययोः प्रचारः सर्वत्र दृश्यमान आसीत्। पाणिनेः यशः सर्वत्र व्याप्तमासीत्। अतएव काशिकाकारेण लिखितम्—'पाणिनिशब्दो लोके प्रकाशते (२।१।६) अर्थात् पाणिनिः समस्तलोके व्याप्तोऽस्ति।

पाणिनेर्जीवनम्

पाणिनेर्जीवनविषये अत्यल्पा सामग्री प्राप्तास्ति। पतञ्जलिचरित्रानुसारमसौ पणिनामकमुनेः पुत्र आसीत्। तत्पत्न्याः नाम दाक्ष्यासीत्। लिखितमस्ति—

पणीतिकश्चिन्मुनिरस्तिपूर्वं स पाणिनिं नाम कुमारमाप।
स्वतुल्यनाम्ना तनयेन सोऽपि दाक्षीमुदूढां दृढमभ्यनन्दत्॥

भाष्यकारेणाप्ययं दाक्षीपुत्रः कथितोऽस्ति। दाक्षी-पुत्रस्योल्लेखः पाणिनि-शिक्षायामपि प्राप्यते। 'यशस्तिलकचम्पौ' पणिपुत्रोऽयं[3] कथितोऽस्ति। पुरुषोत्तमदेवस्य 'त्रिकाण्डशेषकोषे' पाणिनिः पाणिनः, आहिकः, दाक्षी-पुत्रः, शालंकी तथा शालातुरीयशब्दाः पर्यायवाचिनोमताः सन्ति। 'वैजयन्ती'—कोशेऽपि शालातुरीयस्येमे सर्वे शब्दाः पर्यायवाचिनः स्वीकृताः सन्ति।

---

१. ऐन्द्रव्याकरण पर विचार, पृ० ३१।
१. प्रदीप, १।१।७३ वा० ६।
२. पणिपुत्र इव पदप्रयोगेषु, आश्वास २, पृ० २३६।

'गणरत्नमहोदधौ' शालातुरः पाणिनेरभिजनः कथितोऽस्ति। शलातुरः एकोग्राम आसीत्। एतत्स्थानमिदानीमटक समीपे 'लाहुरम्' कथ्यते। एतेनैतज्ज्ञायते यत् पाणिनिः लाहुरं परित्यज्यान्यत्र न्यवसत्।

पाटलिपुत्रस्य परीक्षायाः पश्चात् पाणिने यशः सर्वत्र व्याप्तमभवत् तथा स-शास्त्रकारपदवीमवाप। सम्भवतः स नन्दाश्रित आसीत् तथा पाटलिपुत्रेऽष्टाध्याय्याः रचनायाः पश्चात् स पाटलिपुत्रे न्यवसत्। कतिपयविदुपामनुमानमस्ति यत् सकौशाम्ब्यां प्रयागे वा निवासमकरोत्[1]।

डॉ० वासुदेवशरण अग्रवालः शालातुरीयस्य सांस्कृतिकं विश्लेपणं कुर्वन् लिखितवान् यत् यस्य पूर्वजानां शालातुरात् निकासोऽभवत्, स शालातुरीयः उच्यते स्म। इमौ द्वावपि शब्दौ पाणिनेः सूत्रे (४।३।९४) आयातौस्तः। अतएवास्य स्थानस्य प्राचीनता निश्चितास्ति वलभ्याः एकस्मिन्नभिलेखे पाणिनिशास्त्रं शालातुरतन्त्रं कथितमस्ति[2]।

चीनी यात्री श्यूआन् चूआङ् मध्यएशियाक्षेत्रस्य स्थलमार्गेणागच्छन् शालातुरे स्थितवान्। स लिखितवान् यत् उद्भाण्डात्प्रायः विंशति-लि (मीलचतुष्टय) दूरे शलातुरस्थानमासीत्। एतत्तदेव स्थानमस्ति यत्रमुनिः पाणिनिरजनि। यः शब्द विद्यायाः रचनां कृतवान्। एतस्य चीनीयात्रिण एतदपि कथनमस्ति यत् शलातुरस्य जनाः पाणिनिशास्त्रस्याध्येतार आसन्। तेषामुदात्तगुणानां प्रशंसामकुर्वन्। एका-प्रतिमापि तस्य स्मृतौ निर्मापिताऽसीत्, साच तत्कालं यावत् विद्यमानासीत्। अभि-धानचिन्तामणौ तट्टीकायाञ्च पाणिनेः शालातुरीयत्वस्य कथनं प्राप्यते। शाला तुरीय-दाक्ष्यो-अभिधान चि०, तथा गान्धार प्रदेश विशेष शालातुर ग्राम जातत्वा-देवास्य तथा इति—अभि० टी०। श्यूआन् चूआङः पाणिनेः व्यक्तित्वे प्रकाशं निक्षिपन् लिखितवान्—"अतिप्राचीनकाले साहित्यस्य परमविस्तारआसीत्। काल-क्रमेण संसारस्य ह्रासोऽभवत् तथा सर्वमेव शून्यंजातम्। तदा देवाः ज्ञानरक्षार्थं पृथिव्यामवतारं गृहीतवन्तः। एवं प्रकारेण प्राचीनव्याकरणसाहित्ययोः जन्म बभूव। तदनतरं भाषा (व्याकरणम्) विस्तारमवाप तथा प्राचीनसीमानमतिक्रान्तवती।

---

१. कौशाम्बी दी वर्थ प्लेस ऑफ कात्यायन, दि वार्तिककार ऐण्ड दि एवोड आफ दि सेज भारद्वाज ऐण्ड प्रोवेब्ली ऑफ वार्तिककार ट्रू वेण्ट कइ दि नेम भारद्वाज आर इन दि मध्यदेश, दि प्रोवेविल एवोड ऑफ सूत्रकार, लेक्चर्स आन पतञ्जलि, पार्ट १, पृ० १६।

२. शिलादित्य सप्तम का लेख, फ्लीट—गुप्त शिलालेख, पृ० १७५।

ब्रह्मदेव-देवेन्द्रशक्रौ आवश्यकतानुसारं शब्दानां रूपाणि स्थिरीकृतवन्तौ। ऋषयः स्वमतानुसारं पृथक्-पृथक् व्याकरणं लिखितवन्तः। मनुष्यास्तेषामध्ययनं कुर्वन्त आसन्। परं ये मन्दबुद्धय आसन्, ते तेन कार्यक्षमतां नाप्नुवन्तः। पुनः मनुष्याणामायुरपि न्यूनं भूत्वा शतवार्षिकं जातम्। एतस्मिन्नवसरे महर्षिः पाणिनिः जन्म लेभे। जन्मकालादेव सर्वेषु विषयेषु तस्य ज्ञानं वर्धमानमासीत्। समयस्य मन्दतामव्यवस्थाञ्च वीक्ष्य पाणिनिः साहित्यस्य दैनिकव्यवहारस्य च भाषायाः अनिश्चितेष्वशुद्धेषु च प्रयोग-नियमयोः सुधारं वांछितवान्। तस्येच्छासीद्यद् नियमाः निश्चिताः भवेयुः, अशुद्धप्रयोगाश्च शुद्धाः स्युः। स शुद्धसामग्रयाः संग्रहाय यात्रां कृतवान्। तदानीं स ईश्वरदेवेनसह मिलितवान्। तेन स्वीया योजनाभिहिता। ईश्वरदेव उक्तवान्—यदिदमद्भुतमस्ति। अहमस्मिन् तव साहाय्यं करिष्यामि। ऋषिः पाणिनिः ततउपदेशमवाप्यैकान्तस्थाने गतः। तत्रासौ निरन्तरं श्रमं चकार, स्वसम्पूर्णायाः शक्त्याः तेन प्रयोगश्चविहितः। एवं प्रकारेणानेकशब्दानां संग्रहं विधाय तेन व्याकरणस्यैकोग्रन्थो विरचितः, यः सहस्रश्लोकप्रमाण आसीत्। आरम्भात्तत्कालं यावत् अक्षराणां शब्दानाञ्च विषये यावज्ज्ञानमासीत्, ततो न किमप्यपहाय सम्पूर्णा सामग्र्यस्मिन् सन्निवेशिताभवत्। समाप्ते ग्रन्थे, ग्रन्थोऽसौ राज्ञे समर्पितः, येनायं परंसम्मानितोऽभवत्। आज्ञापितञ्च तेन राज्ञा तस्य ग्रन्थस्य समस्तराज्ये प्रचारार्थं शिक्षार्थञ्च। एतदपि प्रचारितमभवत् यद्य इमं ग्रन्थमाद्यन्तं कण्ठाग्रं करिष्यति, स एक सहस्रमुद्राभिः पुरस्कृतो भविष्यति। तदारभ्यायं ग्रन्थ आचार्यैः स्वीकृतः तथाऽविकलरूपेण सर्वहिताय वंशान्तरेभ्योऽपि सुरक्षितो विहितः। एतदेवकारणमस्ति यत् अस्य नगरस्य विद्वांसोद्विजाः व्याकरणशास्त्रस्य निष्णाताः वंशपरम्पराया अपि पण्डिताः सन्ति, तेषां प्रतिभा च परमोत्कृष्टा विद्यते[1]।"

ह्यूआन् चूआङ् महोदयस्यैतत्कथनेन निम्नलिखितनिष्कर्षाः प्राप्यन्ते।

(१) वैदिकवाङ्मयस्य विस्तारः।

(२) व्याकरणस्य मूलस्य प्रारम्भः।

(३) ऐन्द्रव्याकरणस्योत्पत्तिः।

(४) विभिन्नव्याकरणानांकारणादुत्पन्नाऽव्यवस्था।

(५) संकटकाले पाणिनेर्नवव्याकरणस्य प्रादुर्भावः।

(६) एतद्व्याकरणस्य राजसभाद्वारा सम्मानप्राप्तिः।

(७) पाणिनिव्याकरणस्यरचनायामीश्वरदेवस्य सहयोगः प्रेरणा च।

चीनीयात्रिण एषा यात्रा खीष्टाब्दस्य सप्तम्यां शताब्द्यामभूत्। अतः स्पष्ट-

१. सियुकि, पृ० ११४–११५।

मस्ति, यत् शूआन चूआङ्महोदयस्य यात्राकाले पाणिनेर्यशः ऐतिहासिकतथ्यञ्च विद्यमानमासीत् । तस्योक्तकथनस्य पुष्टिः पतञ्जलिवचनैरपि भवति । पतञ्जलिना प्राचीनशास्त्राणामुत्पत्तिः, साहित्यस्यविस्तारः, ऐन्द्रव्याकरणात् पाणिनेश्च पूर्वाचार्याः, शब्दविद्यायाः तत्कालीना परिस्थितिः, पाणिनिमहेश्वरौ, पाणिनिकृतः प्रयत्नः, अष्टाध्याय्याः परिमाणम्, इत्यादीनि तथ्यानि निबद्धानि । इमानि सर्वाणि तथ्यानि शूआङ् चूआङ्महोदयस्य वर्णनेन सह मिलन्ति ।

केचन विद्वांसः पाणिनेर्गुरोर्नाम वर्षम्, भ्रातुर्नाम पिंगलम्, प्रमुखशिष्यनाम कौत्सञ्च वर्णयन्ति । कथासरित्सागरे एतत्कथितमस्ति यत् तपस्यया शब्दशास्त्रज्ञानेऽधिगते सर्वप्रथमं पाणिनिः स्वसहपाठिनं कात्यायनमाह्वयत । सप्तदिनानि यावत् शास्त्रार्थे जाते कात्यायनः पाणिनिं पराजितवान् । तदाकाशस्थितेन शङ्करेण क्रोधेन हुँकारः कृतः, येन पृथ्व्यामैन्द्रव्याकरणं विनष्टम् । तदध्येतारश्च शास्त्रशून्याः बभूवुः । कात्यायनः स्वपरिवार-निर्वाहाय हिरण्यगुप्तनामकवैश्यनिकटे किञ्चिद्धनसंग्रहंविधाय स्वयं तपसा शंकरं प्रसादयितुं हिमालयं गतः । अतीते दीर्घकाले प्रसन्नः शङ्करः तस्मै पाणिनीयं व्याकरणं प्रकाशितवान् । पत्तञ्जलिचरिते कथितमस्ति यत् यदा कात्यायनः पाणिनिसूत्रेषु दोषदर्शकवार्त्तिकाणां रचनां कृतवान्, तदा पाणिनिः नितरां क्रुद्धो बभूव, कथितवाञ्च यत्त्वया ममप्रभावमजानतैव 'उक्तानुक्तदुरुक्तेश्चिन्ताश्रमो व्यर्थमेवाकारि । अहं तव शरीरपतनाय शपामि । श्रुत्वैतत् कात्यायनोऽपि क्रुद्धो बभूव, शप्तवाञ्च यत् मया शङ्करप्रसादादेव वार्तिकाणां रचनाकारि । त्वयाऽजानतैव शापोदत्तोऽतस्तवापि मस्तकं विदीर्णं भविष्यति ।

पतञ्जलिचरितस्य कथासरित्सागरस्यचोक्तकथायां कियती प्रामाणिकता विद्यते नैतद्वक्तुं शक्यते । परमेतावन्निश्चितमस्ति यत् कात्यायन-पाणिनी समकालीनौ प्रतीयेते । कतिपये विद्वांसः व्याडिं दाक्षायणञ्च पाणिनेः मातुलपुत्रौ मन्यन्ते । काशिकापूर्व-पाणिनीयापरपाणिनीयोदाहरणैः पाणिनेः दीर्घजीवनस्य कल्पना क्रियते । स स्वयं शिक्षक आसीत् । स स्वशिष्येभ्योऽष्टाध्याय्याः शिक्षां दत्तवान् । तस्य शिष्यमण्डली विस्तीर्णासीत् । विद्यालयेषु तद्ग्रन्था अपि पाठ्यन्ते स्म । महाभाष्यस्यौदनपाणिनीयोदाहरणेनेदं ध्वन्यते यत् महाविद्यालयेषु अष्टाध्याय्या अध्येतृभ्यश्छात्रेभ्यो भोजनं दीयते स्म । नात्र संदेहो यत्पाणिनेः अष्टाध्याय्याः प्रचारः तदीयजीवनकालएवाभवत् । महाभाष्ये—'सर्ववेदपारिषदं हीदं शास्त्रम् (भा० २।१।५८) उदाहरणमायातमस्ति । एतेन ज्ञायते यत् सर्ववैदिकशाखानामध्ययनायैतद्ग्रन्थाध्ययनक्षेत्रं कामपि विशेषवैदिकपरिषदं यावत् सीमितं नासीत् । किन्तु प्रत्येकचरणाचार्यकुलेऽध्ययनमस्य प्रचलितमासीत् । एतदेवकारणमस्ति, यत् बहुलमन्यतरस्याम्, उभयथा वा एकेषामादिवैकल्पिकनियमाः पाणिनेः समन्वयायां प्रकाशं प्रक्षिपन्ति । वरनेल्लोऽष्टाध्यायीं स्वपूर्ववर्त्तिसमस्तव्याकरणेभ्योऽतिशयं युक्तां स्वीकृतवान् ।

पाणिनेर्महत्त्वञ्च सार्वकालिकमङ्गीकृतवान्[1]। मैक्समूलरोऽपि पाणिनेर्लोकप्रियतां स्वीकृतवान्। पाटलिपुत्रेणसह पाणिनेः सम्बन्धञ्चाप्यङ्गीकृतवान्।[2]

पाणिनेः समयः

पाणिनेः समयोपरि डॉ० के० बी० पाठकः, भण्डारकरः, रायचौधरी, ग्रियर्सनः, मैकडानलः, वेवरः गोल्डस्टुकरः, डा० वासुदेव शरण अग्रवालप्रभृतयो विद्वांसश्च विचारितवन्तः। गोल्डस्टुकरस्य कथनानुसारं पाणिनेः समयः खीष्टाब्दपूर्व सप्तमी शती विद्यते। श्रीरामकृष्णगोपालभण्डारकरस्यापि मतमेतदेवास्ति। श्री पाठकः पाणिनिं खीष्टाब्दात् पूर्व सप्तमशताब्द्या अन्तिमचरणे तीर्थङ्करमहावीरस्य जन्मनः किञ्चित्पूर्व मनुते।[3] श्रीदेवदत्त रामकृष्ण भण्डारकरः पाणिनेः कालं खीष्टाब्दस्य सप्तमीं शतीं स्वीकृतवान्[4]। अनन्तरमसौ संशोध्य खीष्टाब्दस्य षष्ठ्या. शताब्द्याः मध्यभागं स्वीकृतवान्।[5] शारपैन्तीए-मतेन तिथिरियं ५५० खीष्टाब्दात् प्राक् संभाव्यते।[6] रायचौधरी कथयति यत् ईरानी द्वारा गान्धार विजयस्य युगे समाप्ते पाणिनेः समयः सम्मान्यते। यस्य सम्भावना षष्ठ्याः शताब्द्याः पूर्वं चतुर्थ्याः शताब्द्याः पूर्वं वर्तते। पञ्चम्यां शताब्द्यां तत्समये स्वीकृते सर्वेषां प्रमाणानां संगतिर्भवति।[7]

ग्रियर्सनस्य मतमस्तियत् अशोकस्य धर्मलेखस्य पाणिनेश्चमध्ये शत-सार्धशत-वर्षयोरन्तरालो भवितुमर्हति। अशोकस्याभिलेखेषु पाणिनिशब्दानां प्रतिबिम्ब दर्शनं जायते। अतएव तत्समयस्य खीष्टाब्दात्पूर्वं ४०० वर्षसमीपे मान्यता तर्कसंगतास्ति। मैक्डोनलः भारतीयवाङ्मयस्य तिथीनां निर्धारणं कुर्वन् पाणिनेः समयं खीष्टाब्दात्पूर्वं ५०० वर्ष समीपे स्वीकृतवान्। वेवरः पाणिनेः समयं सिकन्दरस्य भारतागमनात् पश्चात् अङ्गीकृतवान्।[8]

पाणिनेः ग्रन्थस्याध्ययनेन या भौगोलिकी राजनैतिकी च सामग्र्यौ लभ्येते, तदाधारे पाणिनेः समयः खीष्टाब्दात् पूर्वं ७००-५०० सम्भाव्यते। पाणिनिः कस्य-

---

१. ऐन्द्रव्याकरण पर विचार पृ० ३८।
२. संस्कृत साहित्य का इतिहास, पृ० १४२।
३. भण्डारकर इंस्टीच्यूट की पत्रिका ११।८३।
४. सन् १९१८ ई० कारमाइकेल व्याख्यान, पृ० १४१।
५. प्राचीन भारत मुद्राशास्त्र सन् १९२१ ई०, पृ० ४६।.
६. जे० आर० ए० एस्० १९१३, पृ० ६७२-६७४।
७. वैष्णवधर्म का प्राचीन इतिहास, सन् १९३६, पृ० ३०।
८. भारतीय साहित्य का इतिहास पृ० २२२।

चन नंदवंशिनो राज्ञः समकालीन आसीत् । एष समयः ई० पू० पञ्चम्या; शताब्द्याः मध्यभाग आसीत् । केचन विद्वांसोऽष्टाध्याय्यां प्राप्त'यवन' शब्देन पाणिनेः समयं ख्रीष्टाब्दात्पूर्वं ३५० समीपे मन्वते । एतेन शब्देन ते सिकन्दरस्याक्रमणमनुमीय पाणिनेः समयं ख्रीष्टाब्दात्पूर्वं ३२७ निकटे स्वीकुर्वन्ति । गोल्डस्टुकरः स्वीकृतवान् यत् पाणिनिः केवलमृग्वेद-सामवेद-कृष्णयजुर्वेदैरेवपरिचित आसीत् । आरण्यकोपनिषद्-प्रातिशाख्य-वाजसनेयीसंहिता-शतपथ-ब्राह्मणाथर्व वेददर्शन-ग्रन्थानां तत्परिचयो नासीत् । केवलं यास्क एव पाणिनेः पूर्ववक्ताऽभवत् । परं गोल्डस्टुकरस्यैतन्मतं ग्राह्यं नास्ति । पाणिनिः ऋग्वेदं मैत्रेयाणीसंहितां काठकसंहितां तैत्तरीयसंहितामथर्ववेदं सामवेदं पैपलादशाखाप्रभृतिं सम्यक् जानातिस्म । अतएव पाणिनेः समयः उपनिषदां पश्चादेव सम्भाव्यते । नात्र संदेहोयत् पाणिनिकालीनसाहित्यपरिधिः वैदिकग्रन्थेभ्योऽग्रे गतआसीत् । वेद-वेदाङ्गसाहित्यस्यापि पर्याप्तविकासः सञ्जात आसीत् । व्याकरणग्रन्थेषु नामिकाख्यातिकनामकयोः विशिष्टग्रन्थयोः, याज्ञिकसाहित्यस्य,तथा तद्व्याव्याख्यानानुव्याख्यानादीनामत्यधिकविकासः पाणिनेः समय एवाभूत् । एषः वैदिकसाहित्यस्योत्तरकालीनविकासस्यान्तिमचरणः प्रतीयमानोऽस्ति । नैतावदेव, प्रत्युत पाणिनिः महाभारतस्यमूलस्योपवृंहितस्वरूपस्यापि ज्ञातासीत् ।[१] एतदतिरिक्तं पाणिनिः नटसूत्र-शिशुक्रन्दीययमसमीयेन्द्रजनीयसदृशनितान्तलौकिक काव्यग्रन्थानामप्युल्लेखं कृतवान् । यच्छिष्टप्रयुक्तसंस्कतभाषायाः नूतनयुगाभिधानं लप्प्स्यते । पाणिनेः समयं यावत् 'अनुष्टुप्' श्लोककाव्यरचनायाः सूत्रशैल्याश्च पूर्णरूपेण विकासोऽभवत् । पाणिनेरध्ययनेनैतत्स्पष्टमस्तियत् पाणिनेः समयेन सूत्रकालीनेन भाव्यम् ।

भाण्डारकरः केचनान्यविपश्चितश्चैतन्मतं व्यक्तंकृतवन्तो यत् पाणिनिः दक्षिणभारतस्य ज्ञानेनापरिचत आसीत् । परं न सतर्कः पुष्टोऽस्ति । यतः पाणिनिः दक्षिणभारतं तत्सामाजिकप्रथाश्च पूर्णरूपेण जानति स्म । कात्यायनयुगे संस्कृतभाषा दक्षिणभारते व्याप्तासीत् । एतदेवकारणमस्ति यत् पतञ्जलिना स दक्षिणात्योऽभिहितः—"प्रियतद्धिताः दाक्षिणात्याः" । पाणिनि-कात्यायनयोः यदि समयान्तरं न मन्येत, तदापि निश्चितमेतद्यत् पाणिनिः दक्षिणभारतस्य ज्ञातासीत् । अयं समुद्रतटवर्तिमध्यसमुद्रवर्त्तिद्वीपानामुल्लेखातिरिक्तं ऐनानसानां मध्यभूभाग'मन्तरयन' देशं लिखितवान् (८।४।२५) । एष दक्षिणदिशे संकेतोऽस्ति । योहि कर्करेखायाः दक्षिणप्रदेश आसीत् । अवन्ती-जनपदस्य दक्षिणदिशि 'अश्मक' जनपदस्योल्लेखः सूत्रे समायातोऽस्ति, यस्याभिज्ञानं सर्वसम्मत्या गोदावरीतटे स्थितेन प्रतिष्ठानेन पोदन्यपुरराजधान्याः भूभागेन वा क्रियते । पूर्वजनपदेपुकलिंगस्यापि सूत्रे पूल्लेखं

---

१. उत्गीकर भण्डारकर स्मृतिग्रन्थ, पृ० ३४० ।

कृतवान् यतोदक्षिणभारतस्य यातायातमार्गं प्राप्यते स्म। अतएव दक्षिणविपये पाणिनेः भौगोलिकं मौनमेवंविधंनास्ति, येन कापि परिणतिः न प्राप्यते।

पाणिनिः मंखलिगोशालनामकमाचार्यं मस्करिपरिव्राजकं स्वीकृतवान्। ह्यार्नलिमतानुसारं गोशालसमयः खीष्टाब्दात्पूर्वं ५०० निकटे विद्यते जैनसाहित्या लोके गोशालस्तीर्थंकरमहावीरस्य समकालीनः कथयितुं शक्यते। भगवतीसूत्रानुसारं गोशालः श्रावस्त्यां स्वमृत्योः पोडशवर्षपूर्वं नियतिवादस्य स्थापनं कृतवान्। मंखलि-गोशालो बुद्धस्य समकालीन आसीत्। अतएव पाणिनेः पूर्वं बुद्धमहावीरयोः जन्मनी जात आस्ताम्। स्वीकृतेऽस्मिन् तथ्ये पाणिनेः कियन्तः शब्दाः स्ववास्तविकपृष्ठभूमौ ज्ञातुं शक्यन्ते। डॉ० वासुदेवशरण अग्रवालो लिखितवान्—"निर्वाण-कुमारी श्रमणा-संचीवरयते (३।१।२०) निकायनामकधार्मिकसंघाश्च, यत्र औतराधारीय' स्याभावआसीत् बुद्धधर्मेण सह सम्बद्धा आसन्। पुरा धार्मिकाचार्याः स्वसंघस्य गणस्य वा निर्माणमकुर्वन्, यस्य ते स्वयं स्वामिनोऽभवन्। बौद्धसंघः बुद्धानन्तरं यस्मिन् रूपे विकसितोऽभवत्, तेन संघस्य स्वामित्वे प्रकाशः लक्ष्यते। संघस्य सर्वे सदस्याः विनयनियमानां सर्वोपरिप्रमाणं मन्वते स्म। संघस्यानुशासनं सर्वे भिक्षवः सम्मानपूर्वकं स्वीकुर्वन्तिस्म। तेपूच्चनीचभेदाः नासन्। अतएव पाणिनिः यं संघमभिलक्ष्य संकेतं कृतवान्, स संघः धार्मिकसंघ एवासीत्, न राज-नैतिकसंघः। अतएव पाणिनेः समयः बुद्धकालानंतरं संभाव्यते।

पाणिनिना ४।३।३४ सूत्रे दशनक्षत्राणां सूची दत्ता। अस्यां सूच्यां स श्रविष्ठा नक्षत्रं सर्वस्मात् पूर्वं रक्षितवान्। शेपनामसु क्रमाभावो विद्यते, तथापि श्रविष्ठा-नक्षत्रादेव सूच्यारम्भः सकारणः प्रतीयते। वेदाङ्गज्यौतिषेऽपि नक्षत्राणांगणना श्रविष्ठा नक्षत्रादेव कृताप्रविद्यते। महाभारते गणनेयं श्रवणनक्षत्रादस्ति। गर्गमता-नुसारं कर्मकाण्डे कृतिकायाः ज्यौतिषे श्रविष्ठायाश्च नक्षत्रगणनाभवत्। श्रावि-ष्ठायाएव द्वितीयंनाम 'धनिष्ठा' विद्यते। वेदांगज्यौतिषे एतदेवनक्षत्रं प्रथमनक्षत्रं स्वीकृतमस्ति।

इदानीमेतदेव विचारणीयमस्ति यत् धनिष्ठादिगणना कियत्कालं यावत् प्रच-लितासीत् तथा कदा तस्य स्थानं श्रवणादिः गृहीतवान्। यद्येतस्य ज्ञानं जायेत, तदा पाणिनेः समयस्य ज्ञानं भवितुं शक्यते। महाभारते कथितमस्ति यत् धनिष्ठा-स्थाने श्रवणस्य गणनायाः श्रेयो विश्वामित्रस्यास्ति। कीथो लिखितवान् यत् विश्वामित्रः कश्चन ज्यौतिषस्य संस्कर्त्ताचार्य आसीत्। यः विगतधनिष्ठा-स्थाने यतः क्रान्तिवृत्तमग्रगाम्यभवत्, श्रवणं वास्तविकस्थित्यनुसारं प्रथमं स्वीकृतवान्[1]।

---

१. जे० आर० ए० एस० १९१७ ई० पृ० ३९।

योगेशचन्द्रः ज्योतिषगणनाधारेण कथितवान् यत् खीष्टाब्दात् पूर्वं पञ्चमशत्यां श्रवणनक्षत्रं तत्स्थाने समागतमासीत् यत्र पुरा श्रविष्ठासीत् । अतएव खीष्टाब्दात्पूर्वं ४०१ वर्षसमीपे 'श्रवणादीनि ऋक्षाणि' एष उल्लेखः कृतो भवेत् । एवम्प्रकारेण श्रविष्ठादिनक्षत्रसूच्याः मस्करीपरिव्राजकस्य च द्वयोः प्रमाणयोराधारे पाणिनेः समयः खीष्टाब्दात्पूर्वं ५००-४०० मध्ये सम्भाव्यते ।

बौद्ध-ब्राह्मण-साहित्ययोः प्राचीनानुश्रुतिरस्ति यत् पाणिनिः कस्यापि नन्द-वंशिनो राज्ञः समकालीन आसीत् । तिब्बती विद्वान् तारानाथः पाणिनि-नन्द-राजयोः समसामयिकतां स्वीकृतवान्[1] । सोमदेवः कथासरित्सागरे (१०।६३–१०।८१) क्षेमेन्द्रश्च वृहत्कथामञ्जर्य्याञ्च लिखितवन्तौ यत् पाणिनिः नन्दराजसभायां पाटलिपुत्रं गतवान् । बौद्धग्रन्थ 'मंजुश्री' मूल-कल्पेनापि समर्थनमेतस्य भवति । लिखितमस्ति यत्—

तस्याप्यनन्तरो राजा नन्दनामा भविष्यति,
पुष्पाख्ये नगरे श्रीमान् महासैन्यो महाबलः
भविष्यति तदा काले ब्राह्मणस्तार्किको भुवि,
तैः परिवारितो राजा वै ।
तस्याप्यन्यतमः सख्यः पाणिनिर्नाम माणवः ॥[2]

अर्थात् पुष्पपुरे नन्दो राजा भविष्यति, पाणिनिनामा तस्यान्तरंगःसखा भविष्यति । मगधस्य राजधान्यामनेकतार्किकब्राह्मणाः राज्ञः सभायां भविष्यन्ति । राजा च तान् दानैः मानैश्च सम्मानितान् विधास्यति ।

श्यूआन् चूआङ महोदयोऽपि शालातुरे पाणिनेः जीवन-सामग्रीं संगृहीतवान् । तदनुसारं ग्रन्थरचनानन्तरं पाणिनिस्तमादाय देशस्य तत्कालीनसम्राजः सभायां गतवान् । यस्तदीयग्रन्थमतिशयं सम्मानितवान् तथा तत्प्रचारार्थं शिक्षणार्थ-ञ्चादिष्टवान्[3] । यद्यपि सम्राजस्तद्राजधान्याश्चनोल्लेखो विद्यते, तथापि तेन राज-सभायां गमनस्यानुश्रुतेरांशिकं समर्थनं भवति । राजशेखरोऽपि पाणिनेः सम्बन्धं पाटलिपुत्रस्य शास्त्रकारपरीक्षया समं स्वीकृतवान् । पाटलिपुत्रे एवंविधा विद्वत्सभा खीष्टाब्दात्पूर्वं चतुर्थ्यां शताब्द्यां, यूनानी राजदूतस्य मेगास्थनीजस्य काले, आसीत् । एवं पाणिनिविषयकानुश्रुतेः व्यापकं समर्थनं भारतीय-चीनी-यूनानी स्रोतोभिः कतिपयैः जायते । यद्यपि पाणिनिः गान्धारदेशनिवास्यासीत्, परं तत्समये

---

१. तारानाथः, बौद्धधर्मस्येति हासः, १६०८ ।

२. मंजुश्री मूल कल्पः, पटलः ५३, पृ० ६११–१२, जायसवालकृत उसका अध्ययन पृ० १४ ।

३. सियुकि पृ० ११५ ।

प्राच्योदीच्य योः परमघनिष्ठसम्वन्ध आसीत्। तत्परम्परोपनिपद्युगादेवायान्त्यासीत्। यथा पाणिनिः शलातुरात्पुष्पपुरमागतवान्। तथैव चाणक्योऽपि तक्षशिलायाः पुष्पपुरमागच्छत्।

नन्दराजैः सह विदुषां सम्वन्ध आसीत्। नन्दानां राज्यकालश्च खीष्टाब्दात् पूर्वं ३२५-४७५ मध्येऽस्ति। पुराणानुसारं शिशुनागवंशिन उदयानन्तरं नन्दवर्द्धनः, ततः महानन्दी, पश्चात् महापद्मः तत्पुत्राश्च नृपाः वभूवुः।

तिथयो निम्नांकिताः सन्तिः—

(१) नन्दिवर्धनः ४७५–४४५ ख्रीष्टाब्दात् प्राक्
(२) महानन्दी ४४५–४०३ ,,
(३) महापद्मः ४०३–३७५ ,,
(४) महापद्मपुत्राः ३७५–३२५ ,,

तारानाथः एतस्याः पौराणिकपरम्परायाः निष्कर्षं निष्कासितवान् यत् नन्दवंशिनः सम्राजः महापद्मनन्दस्य पिता नन्दः पाणिनेः मित्रमासीत्। महनन्दिनोनाम केवलं नन्दो महानन्दो वासीत्। अयमेव पाणिनेः समकालोनः तथा तस्य संरक्षको मगधसम्राट् आसीत्, यस्य समयः ख्रीष्टाब्दात्प्राक् पञ्चमशताब्द्याः मध्ये विद्यते। पाणिनेः सम्वन्धेऽन्यत् यत् साक्ष्यं प्राप्तमस्ति, तस्यापि तिथिक्रमेणानेन संगतिर्जायते।

व्याकरणग्रन्थेभ्यो नन्दानां सम्बन्धे काचित् ज्ञातव्यताधिगम्यते। 'नन्दोपक्रमाणिमानानि (काशिका २।४।३१) एतेन ज्ञायते यत् केनचित् नन्दराजेन मापतुला-साधनानि निश्चितानि प्रतिमानितानि च कृतानि। महानन्दः स्वसाम्राज्यस्यावश्यकतानां पूर्त्यै एवं कृतवान्, यदसंभवं नास्ति (६।२।१३३) उदाहरणाय नन्दपुत्रोऽपि अतिप्राचीनमहत्त्वपूर्णमुदाहरणं वर्तते। अयं नन्दपुत्रः कोऽस्ति ? विचारणायां ज्ञायते यत् नन्दिवर्द्धनः प्रथमो नन्दराज आसीत् तत्पुत्रो महानन्दी महानन्दो वा नन्दपुत्र आसीत्। कियतां विपश्चितां कथनमस्ति यत् कलिंगराजस्य खारवेलस्याभिलेखे नन्दस्योल्लेख आयातोऽस्ति। यदि खारवेलसमयः १६५ ख्रीष्टाब्दात्प्राकृ मन्येत, तदा नन्दराजसमयः ४६५ ख्रीष्टाब्दात्प्राक् प्रतीयते। एवं प्रकारेण पाटलिपुत्रे मगधसिंहासनोपरि नन्दवर्धन आसीन आसीत्। अस्यैव नन्दराजस्य पुत्रः व्याकरणोदाहरणे नन्दपुत्रः कथितोऽस्ति।

पाणिनेः राजनैतिकसामग्र्याः उपरि विचारणया प्रतीयते यत् तदानीं मगधः एको राजजनपद आसीत्। अंष्टाध्याय्या अनुसारं मगध-कोशल-अवन्ती-कलिंग सूरमसण-अश्मक-कुरु-पाञ्चाल-जनपदाः स्वाधीनाः वृद्धिगताः भवन्त आसन्। अजातशत्रुः मगधसिंहासने समासीनः सन् काशीं कोशलं चाधिकृतवान्। परमेषाल्प

कालीना स्थितिरासीत्। नन्दिवर्द्धनः महानन्दी वा अस्य विशेषविस्तारं न कृतवान्। अस्योत्तराधिकारी महापद्मो बभूव। पुराणानुसारं स क्षत्रियराजानां प्रमुखजनपदान् साम्राज्याधीनान् कृतवान्। कौशल-पांचाल-काशी-हैहय-कलिंग अश्मक-कुरु-मिथिला-शूरसेनावन्ती-जनपदानां स्वातन्त्र्यमापहृत्य तान् स्वसाम्राज्याधीनान् विधाय स एकराट् सञ्जातः। अतएव महापद्मः परशुरामवत् सर्वक्षत्रान्तको निगदितोऽस्ति। एवं प्रकारेणाष्टाध्याय्यामस्याः राजनैतिक स्थित्याः चित्रणमायातमस्ति, तेन ख्रीष्टाब्दात्प्राक् ४५०-४०० वर्षमध्यस्थितेन भाव्यम्। डॉ० अग्रवालः पाणिनि-संघानामध्ययनं कुर्वता व्यलेखि—"महानन्दिना सह पाणिनेः संघानामध्यनेनेयं तिथिः संगता जायते। ४६० ख्रीष्टाब्दात् प्राक् गान्धारजनपदः स्वाधीनोऽभविष्यत्। पाणिनिः प्रायः ख्रीष्टाब्दात् प्राक् ४४८–४३० मध्ये स्वग्रन्थस्य रचनायाः अनन्तरं पाटलिपुत्रस्य यात्रां कृतवान् भवेत्। तदानीं तदायुः पञ्चाशत् वर्षीयं मन्यते, तदा तस्य जन्म ख्रीष्टाब्दात् ४८० वर्ष-समीपेऽनुमीयते। अष्टाध्यायीसदृश-शास्त्रस्य रचना चत्वारिंशत्पञ्चाशद्वर्षायुर्मध्ये सम्भाव्यते। तदर्थमावश्यकवुद्धेः परिपाकः, गम्भीरचिन्तनं दीर्घकालीन-सामग्री-संकलनम्, स्वानुभवाधारे साधिकारविश्लेषणञ्चायुष एतस्मिन्नेव भागे सम्भाव्यन्ते। तज्जीवनकालावधेः सप्तविंशतिवर्षकल्पनया पाणिनेः समयः ख्रीष्टाब्दात् प्राक् ४८०-४८१ वर्षकालोऽनुमीयते।"

पाणिनि-कौटिल्ययोः तुलनात्मकाध्ययनेन स्पष्टं ज्ञायते यत् कौटिल्यस्य भाषायाः पाणिनेः शब्दावल्या सह घनिष्ठः सम्बन्धो वर्तते। उभावपि लेखकावनेक समानसंस्थाभिः परिचितावास्ताम्। थीमे महोदयः सत्यमेव लिखितवान् यदर्थशास्त्रस्य भाषा यद्यपि बहुषु अंशेषु प्राचीनास्ति, परमष्टाध्याय्याः भाषा पश्चात्कालीनो विद्यते। कियन्तस्तु पाणिनेः शब्दा एतादृशाः सन्ति, येषां सर्वोत्तमा व्याख्या कौटिलीयार्थशास्त्रेणैव भवति। मैरेय-कापिशायन-देवपथ-आक्रन्द-युक्तारोहि-उपनिषद्-विनय-वैनयिक-परिषद्-अषडक्षीण-व्युष्ट-माहिष-अध्यक्ष-युक्त-योजन-शतिकदूत-विषय-आर्यकृत-पारिखेयीभूमि-पुरुषप्रमाण-हस्ति-प्रमाणादिशब्दाः अष्टाध्याय्यामर्थशास्त्रेच समानरूपेण प्रयुक्ताः लभ्यन्ते। अतः कौटिल्यस्य समयः पाणिनेः शत-सपादशतवर्षपश्चादेव सम्भाव्यते। अष्टाध्याय्यां यासां प्राचीनमुद्राणामुल्लेखः प्राप्यते, तासां निर्देशः कौटिलीयार्थशास्त्रे न प्राप्यते। सुवर्ण-शाण-शतमान-नामिकाः प्राचीनाः मुद्राः कौटिल्यस्याविदिता आसन्। विंशतिक-त्रिंशतिक-नाम्न्यौ महत्त्वपूर्णे मुद्रे पाणिनिनोल्लिखिते, ययोर्ज्ञानं कौटिल्यस्य नासीत्। अतएव भारतीयमुद्राणामालोकेऽपि पाणिनिसमयः ख्रीष्टाब्दात् पूर्वं पञ्चमी शताब्दी सिद्ध्यति।

पाणिनेः शब्दावल्याः अध्ययनेन ज्ञायते यत् तस्य भाषा जातकानां भाषापेक्षया पौर्वकालिकी वर्तते। कतिपयशब्देषु उभयोराश्चर्यजनकं साम्यमस्ति।

उदाहरणार्थं द्वैपवैयाघ्र-पाण्डुकमलसदृशान् शब्दान् ग्रहीतुं शक्यते । एतच्छ्रेण्याः शब्दाः उभयोरपि ग्रन्थयोः समानरूपेण प्रयुक्ताः सन्ति । अतएव संक्षेपेण पाणिनेः कालः ख्रीष्टाब्दात् पूर्वं पञ्चम्याः शताब्द्याः मध्यभागोऽस्ति ।

कविः पाणिनिः वैयाकरणपाणिनिश्च

भाष्ये सूत्रकारस्य विशेषणरूपेण कविशब्दः प्रयुक्तोमिलति (१।४।५०)। कैयट-नागेशाभ्यां कविशब्दार्थः मेधावी स्वीकृतोऽस्ति । पाणिनिः जाम्बवतीविजय' नामककाव्यस्य प्रणेता मन्यते । परं पुष्टप्रमाणाभावे कविरूपेण वैयाकरणपाणिनेः सिद्धिर्न भवति । यतो नैतन्नामकं किमपि काव्यमुपलब्धं विद्यते न च पाणिनेर्नाम्ना सूक्तिसंग्रहेषु तच्छलोका एव उद्धृता लभ्यन्ते । श्लोकानां शैली परमर्वाचीना विद्यते। भण्डारकरः क्षितीशचन्द्रचट्टोपाध्यायश्चापि एतदुपरि विस्तरेण विचार्य एतमेव निष्कर्षं निष्कासितवन्तौ यत् पाणिनेः कवि-सम्भावना कल्पनामात्रमस्ति । 'जाम्ब-वती विजयम्' पातालविजयनामकं काव्यं वा अष्टम-नवम-शताब्द्याः कस्यचन कवेः रचना सम्भाव्यते ।

वैयाकरणपाणिनिना 'अष्टाध्याय्यतिरिक्तानि धातुपाठ-गण-पाठ-शिक्षापंचपाद्यु-णादिसूत्राण्यपि रचितानि स्युः । यद्यपि राजशेखरः पाणिनिं कविं वैयाकरणञ्चो-भयमपि मनुते । लिखितमस्ति—

> नमः पाणिनये तस्मै यस्मादाविरभूदिह,
> आदौ व्याकरणं काव्यमनुजाम्बवतीजयम् ।
>
> —राजशेखरः

क्षेमेन्द्रोऽपि "पाणिनेरुपजातिभिः" द्वारा पाणिनिं कविमङ्गीकृतवान् । परंपुष्ट-प्रमाणाभावे कविः पाणिनिः वैयाकरणपाणिनिश्च नाभिन्नः स्वीक्रियते ।

अष्टाध्यायी

वैयाकरणपाणिनेर्यशोऽ'ष्टाध्यायी'-ग्रन्थोपरि समाश्रितमस्ति । ग्रन्थेऽस्मिन् ३९८१ सूत्राणि १४ प्रत्याहारसूत्राणि च सन्ति । ग्रन्थएषोऽष्टाध्यायेषु विभक्तो विद्यते । पाणिनिः अष्टाध्याय्यां संस्कृतभाषायाः शब्दानां विश्लेषणं विधाय तेषां साधुत्वं दर्शितवान् । प्राचीनव्याकरणं यत्र शब्दानामन्वाख्यानं विदधाति, तत्रा-ष्टाध्याय्यां साधुशब्दानां परिज्ञानं भवति । अष्टाध्याय्यां पद-सिद्धयपेक्षया शाब्दि-कोपादानानां क्रमिकोल्लेखोपरि विशेषं ध्यानं दत्तमस्ति । यदि पदसिद्धिरेव पाणिने-रभीष्टमभविष्यत्तदा यया रीत्याशुपदनिर्माणं भवति, तस्या एवं रीत्याआश्रयं पाणिनि-रग्रहीष्यत् । एवं सति, अष्टाध्याय्यां समासानन्तरं समासान्तानां तद्धितप्रकरणेन सह सम्बद्धपदानां शत्व-णत्वविधिक्रमोऽभविष्यत् । यत एवं विधप्रकरण-सन्निवेशे न शीघ्रं

पदनिर्माणं जायते। अर्वाचीनव्याकरणेषु च सैव पद्धतिः दृश्यते। पाणिनिद्वारा-प्रकरणक्रम एवं प्रकारेण सज्जितो विद्यते यत्-पूर्णाष्टाध्यायीज्ञानं विना नैकमपि पदं निर्मातुं शक्यते, वाक्यनिर्माणं तु दूरे तिष्ठतु। अतो मन्यते यत् पाणिनिनानाज्ञा-तभाषायाः शिक्षा दत्ता। प्रत्युत सुज्ञातभाषायाः शब्दानां सूक्ष्मविश्लेषणं कृतम्। येन संस्कृतशब्दानां साधुत्वमवगम्यते।

पाणिनीयदृष्ट्या विचारेण अष्टाध्याय्याः त्रिषु भागेषु विभागंकर्त्तुं शक्यते। प्रथमभागे (१।२।अध्याये) पाणिनिः वाक्येभ्यः पदानां संकलनं कृतवान्, ततो द्वितीयभागे (३ + ४ अध्याययोः) तेषां पदानां प्रकृति-प्रत्यययोः विश्लेषणं विहितवान् एवं तृतीयभागे (६—७ अध्याययोः) पुनरागमादेशादीनां विधानंकृत्वा विशिष्ट प्रकृति-प्रत्ययान् संयोज्य पदनिर्माणं चकार। तृणाद्यंशाः (अष्टमाध्यायस्य २—४ पादाः) ऐच्छिकाः सन्ति। अर्थात् विशिष्टसंकेतं विधाय त्रैपादिकविषयाणां सन्निवेशं सप्तमे षष्ठेवाध्याये कर्तुं शक्यते। परमाचार्यः लाघवाय नैत्रं विहितवान्। अष्टमा-ध्यायस्य प्रथमपादे पदकार्यमस्ति।

अष्टाध्याय्यां प्रत्येकप्रकरणे सूत्रक्रमसंगतिश्चार्वाचीनव्याकरणसदृशी नास्ति। यद्यपि प्रथमाध्यायेऽष्टाध्याय्याः सामान्यपदानां संकलनमस्ति, तथापि पद-विवरणात् प्राक् कासाञ्चनावश्यकसंज्ञानामुल्लेखः कृतो विद्यते। पदविभागभूतान्यपि नामानि संज्ञाशब्देनाभिधीयन्ते। अतएव प्रथमाध्यायं संज्ञाऽध्यायं वक्तुं शक्यते। भाष्ये 'संज्ञाविकारश्चायम् (१।४।१) उक्त्वा प्रथमाध्यायः संज्ञाध्यायः कथितोऽस्ति। नागेशभट्टस्य—तस्मात्संज्ञाप्रकरणे प्रथमाध्याये—(५।२।१२२) उद्योतेनापि मतस्यैतस्य पुष्टिर्भवति। प्रथमाध्यायस्य चतुर्थपादेषु संज्ञानांविवरणमस्ति। परमेतेषां चतुर्णामपि पादानां संज्ञासु काचित् विलक्षणता विद्यते।

व्यापित्वदृष्ट्या संज्ञाः द्विप्रकाराः भवन्ति—सर्वशास्त्रव्यवहार्याः, प्रकरण-नियताश्च। अष्टाध्याय्याः प्रारम्भे वृद्धि-गुणादीनां यासां संज्ञानां विवरणमायात-मस्ति, ताः सर्वशास्त्रव्यवहार्याः सन्ति। परं तृतीये षष्ठे वाऽध्याये व्यवहृताः संज्ञाः तत्प्रकरणेभ्यो नियताः सन्ति। यथा—'उपपदम्' (३।१।९२) 'अभ्यासः' (६।१।४) एवमेवान्या अपि अध्यायान्तरीयसंज्ञाः सन्ति। एतासां संज्ञानां संज्ञिनः स्व-स्वप्रकरणे नियताः वर्तन्ते। अतएवाभ्याससंज्ञायाः व्यवहारोऽष्टमाध्यायस्य द्वित्व प्रकरणे (८।१।१) न भवति। यद्यपि स्थलयोरुभयोरपि द्वित्वरूपः सामान्यो धर्मोऽस्ति। अन्याध्यायान्तरीयसंज्ञानां विषयेऽपि तथ्यमिदमेवविद्यते। पतञ्जलिना संज्ञाः 'कृत्रिमाकृत्रिमरूपेण' विभक्ताः सन्ति। विभागएषोऽर्थवत्तादृष्ट्या विद्यते।

अष्टाध्याय्या आरम्भो वृद्धिसंज्ञया भवति। वृद्धिशब्दो मङ्गलार्थोऽस्ति। अतः सर्वादौ अस्योपन्यासः कृतोऽस्ति। व्याकरणप्रक्रियायां गुणवृद्धि-साहचर्यं

परमप्रसिद्धमस्ति । अतो वृद्ध्यनन्तरं गुणसंज्ञाया उल्लेखः, गुणवृद्धि-संज्ञयोः पश्चात् १।१।३ सूत्रे परिभाषैका कथिता विद्यते । अष्टाध्याय्यां सर्वत्र संज्ञापरिभाषा-सूत्राणां मिश्रितः पाठोऽस्ति । व्यवहारदृष्ट्या संज्ञा-परिभाषे भिन्नपदार्थौ स्तः । विधिसूत्राणां व्यापारे काऽप्यसमञ्जसता बाधा मा भवेदिति तथा च लाघवाय संज्ञापरिभाषासूत्राणां रचना क्रियते । 'लघ्वर्थं संज्ञाकरणम्' 'अनियमे नियमकारिणी परिभाषा' एवं प्रकारेण संज्ञापरिभाषयोः व्याख्या विहिता विद्यते । सूत्राणि षड्वर्गेषु विभक्तानि सन्ति—

१. संज्ञासूत्रम्,
२. परिभाषासूत्रम्
३. विधिसूत्रम्
४. नियमसूत्रम्
५. अतिदेशसूत्रम्
६. अधिकारसूत्रम्

वस्तुतः संज्ञासु परिभाषासु चैतादृशी समानता विद्यते, यत् कदाचित् संज्ञासूत्र-परिभाषा-सूत्रयोर्निर्णये सन्देहो जायते । संज्ञापरिभाषयोः पूर्णतया विजातीयपदार्थत्वे कदापि नोभाभ्यामेवमविशेषबोधोऽभविष्यत् । उभयोः पदार्थयोरसाधारणसादृश्य एव संशय उत्पद्यते । कैयटेन संज्ञा-परिभाषयोः पदार्थत्वेऽपि परस्परसंबद्धता स्वीकृता । स लिखितवान्—'संज्ञापरिभाषयोः परार्थयोरपि परस्परसम्बन्धदर्शनात् (उद्योतः ५।१।१) अतएव संज्ञापरिभाषयोरेकत्र पाठो दोषावहो नास्ति । पाणिनिः गुणवृद्धिसंज्ञानन्तरं प्रगृह्यसंज्ञा—(१।१।११) विभाषा संज्ञाना (१।१।४५)-(१।१।४४)श्च निर्देशं कृतवान् । सम्प्रसारणसंज्ञानन्तरं 'आद्यन्तौ टकितौ'—सूत्रेण परिभाषाप्रकरणस्य प्रारम्भं विहितवान् । कारणमेतस्यास्ति यत् 'सम्प्रसारण'—संज्ञायां यणः स्थाने विधीयमानेत्येवंविधोऽर्थो विधीयते । विधीयमानरूपो धर्मः आदेशे तथागम एव दृश्यते । अतः सम्प्रसारणसंज्ञानन्तरमादेशागमसम्बन्धिनीनां परिभाषाणां विवरणं कृतमस्ति ।

आगमादेशसम्बद्धपरिभाषानन्तरं 'लोप'-टि-उपधादिसंज्ञानां कथनमस्ति । द्वितीयपादारम्भे 'ङित्-कित्'-प्रत्ययसम्बन्धि - निर्देशानन्तरमतिदेशप्रकरणारम्भः कृतोवर्तते । अतिदेशः संज्ञायाः नास्ति कोऽपि विजातीयः पदार्थः । यथार्थतोऽयमारोपितसंज्ञा एवास्ति । अतः संज्ञाधिकारे प्रकरणस्यास्य नास्ति पाठोऽसंगतः । पश्चात् अपृक्तसंज्ञा (१।२।४१) कर्मधारय (१।२।४२) संज्ञोपसर्जनसंज्ञादीनां विधानमस्ति । पाणिनिसिद्धान्तानुसारं पदं चतुर्विधं पञ्चविधं वा भवति । तेषु पदेषु यन्मुख्यमस्ति, तस्योल्लेखः प्रातिपदिकनाम्ना कृतोऽस्ति । पाणिनिना यत् प्रातिपदिकमभिहितम्,

यास्केनाख्यातं तदेव नाम—'यत्प्रातिपदिकं प्रोक्तं तन्नाम्नो नातिरिच्यते ।—शब्द शक्ति-प्रकाशिका-१४ । नाम्नोऽस्य चत्वारोभेदाः सन्ति—

१. नाम

२. आख्यातम्

३. उपसर्गः

४. निपातः

प्रातिपदिकस्य विचारेण सहैकशेषस्य विचारः प्रारब्धोऽस्ति । तृतीयपादे धातोरुल्लेखो विद्यते । धातूपग्रहयोर्मध्ये—'इति' संज्ञाया अपि प्रकरणमायातमस्ति चतुर्थपादेऽवशिष्टसंज्ञानां निर्देशाः लभ्यन्ते । एतास्वेकलघुसंज्ञादिसंज्ञाः मुख्याः विद्यन्ते । निपातोपसर्ग-वाक्य-पुरुपसंज्ञा-वचनसंज्ञादोनामपि कथनमस्ति ।

द्वितीयाध्यायस्य प्रथमपादे समासस्य संज्ञा—'समर्थः पदविधिः,(२।१।१) सूत्रेण दत्ता विद्यते । व्याकरण-शास्त्रानुसारं वाक्यं द्विविधं भवति—व्यासरूपं समास-रूपञ्चेति । समासरूपवाक्यस्य लक्षणम् 'एकार्थीभावापन्नः' अर्थात् समुदायशक्ति-युक्तपद-समुदायः विशेपसमासरूपवाक्यमस्ति । एतस्मिन् द्वितीयाध्याये समासविधायक सामान्यसूत्राणां तथा तत्सम्बन्धिस्वराणं निर्देशोऽस्ति तत्पुरुषसमासस्य नियमने 'विभक्तिसहभावितत्पुरुपसामानाधिकरण्य-घटित-तत्पुरुषयोः' कथनमायातं विद्यते । 'शेपो बहुव्रीहिः' (२।२।२३) इति सूत्रेण बहुव्रीहिसमासस्य नियमनं प्रारभ्यते ।

द्वितीयाध्यायस्य तृतीयपादे सुब्विभक्तीनामर्थः तद्विधानानि चायातानि सन्ति । विभक्तीनां निर्देशक्रमे द्वितीया-चतुर्थी-तृतीया-पञ्चमी-सप्तमी-प्रथमा-षष्ठी'-विभक्ती-नामनुशासनमस्ति । कानिचनैवंविधानि स्थलानि सन्ति, यत्र चतुर्थी-द्वितीयायाः बाधिका भवति तथा केपुचन विशेषस्थलेपु सप्तमी चतुर्थ्याः बाधिका भवति। तृतीय-पञ्चम्योर्विपयेऽपि नैतदेव प्रवर्तते । अतः स्पष्टमस्ति यत् क्रमेऽस्मिन् विप्रति-षेधनियमोऽनुस्यूतोऽस्ति । षष्ठी सर्वान्ते विद्यते यत इयं सर्वाभ्यो वलिष्ठा व्यापकतमा चास्ते । चतुर्थपादे समाससम्बद्धलिंग-वचनानां निर्देशोऽस्ति । 'लुक्प्रकरण'-तद्धित-प्रत्यय-प्रकरणानि चास्मिन्नेव पादे समाहितानि सन्ति ।

तृतीयाध्याये विशिष्टपदानां विश्लेपणं प्राप्यते । 'प्रत्ययः' इतिसूत्रेण प्रत्यय-निर्देशः कृतोऽस्ति । एतन्निर्देशद्वारा च प्रत्ययस्य प्रकृतिसापेक्षत्वेन प्रकृतेरपि ग्रहणं कृतं विद्यते । अनन्तरं प्रत्ययसम्बन्धिमुख्यस्वरस्योल्लेख आद्युदात्तश्च (३।१।३) सूत्रद्वारा आयातोऽस्ति । नागेशोऽस्यौचित्योपरि विचारं कुर्वन् लिखितवान्—एवं च शेपनिघातद्वारा आगमानुदात्तत्वसिद्धये एवात्रास्य सूत्रस्य पाठः (उद्योतः) प्रकरणेस्मिन् 'धातुनामसर्वमूलत्वात्' सिद्धान्तानुसारं प्रथमं धातुसम्बन्धिप्रत्ययानां नियमनमस्ति । धातुः द्विप्रकारो भवति—मौलिक : कृत्रिमश्च । मौलिकास्तु भ्वादयो धातवः सन्ति । एपु मूलधातुषु प्रत्ययं योजयित्वा ये नवाः धातवः निर्मीयन्ते, ते

कृत्रिमाः धातवः कथ्यन्ते । इमे द्विप्रकारा धातव एव कृदन्तशब्दानां मूलानि सन्ति । अतः कृत्प्रत्ययस्य प्रारम्भात् पूर्वं धातूनामेषां विवरणं दत्तमस्ति । एतदनन्तर-मात्मनेपद-परस्मैपद-विधायकान्यनुशासनानि आयातानि सन्ति । तृतीयाध्यायस्या-स्मिन्नेव पादे प्रथमे कृत्-कृत्यौ द्वाविमौ भेदौ कृत्प्रत्ययानां विहितौ स्तः । कृत्-कृत्ययोः मौलिकः कश्चन भेदोऽस्ति । कृत्यप्रत्ययेषु कालावलम्बिबोध आवश्यको नास्ति । प्रत्युतैषु प्रत्ययेषु विध्यादि-प्रकाराणां भावकर्मणश्च बोधः प्रबलोऽस्ति । अतएव कृत्प्रत्ययेषु कृत्यरूपस्यैकस्यावान्तरविभागस्य कल्पनापेक्षिताऽभवत् । स्वरविधिदृ-दृष्ट्यापि द्वयोर्भेदोऽस्ति । नामविशेषणनिष्पादककृत्यप्रत्ययानामनन्तरं नामविशेषण निष्पादककृत्प्रत्ययानामारम्भः (३।१।३२ सूत्राज्जातोऽस्ति) ।

तृतीयाध्यायस्य द्वितीयपादे सर्वकालद्योतकण्वुलादि-प्रत्ययेष्वपि अवान्तरक्र-मोऽस्ति । प्रथमपादे ते प्रत्ययाः सन्ति, येषूपपदापेक्षा नास्ति तथा द्वितीयपादे उपप-दसापेक्षसार्वकालिकप्रत्ययाः निर्दिष्टाः सन्ति । पाणिनिना सार्वकालिकप्रत्ययाः द्वयोः पादयोः रक्षिताः । द्वितीयपादेऽपि प्रथमं कर्तृद्योतकप्रत्ययानामुपन्यासोऽस्ति तथा तदनन्तरमन्यकारकद्योतकप्रत्ययानाम् । सार्वकालिकप्रत्ययेभ्यो निष्पन्नानि पदानि मुख्यतःविशेषणभूतानि सन्ति । भूतकालिकप्रत्ययेभ्यो निष्पन्नपदान्यपि तादृशान्येव सन्ति ।

अस्याध्यायस्य तृतीयपादे उणादिसम्बन्धि विवेचनं तथा भविष्यत्कालिक-प्रत्ययाः वर्णिताः सन्ति । नामविशेषणनिष्पादकप्रत्ययानामनन्तरं (३।३।१८) सूत्रेण भावाधिकार आरब्धोऽस्ति । एतेन सह कर्तृभिन्नकारकस्याधिकार आरभ्यते । यतो भावार्थकप्रत्ययाः शब्दशक्तिस्वाभाव्यकारणात् कारकार्थका अपि भवन्ति । अतोऽर्थभेदे सत्यपि लाघवाय पाणिनिः भावप्रत्ययानां कारकार्थकत्वमपि दर्शितवान् । करणादिकारकेषु संभवल्युडादिप्रत्यया अपि संकलिताः सन्ति । ३।९।९१ 'धातोः' द्विप्रकाराः प्रत्ययाः भवन्ति कृतः, तिङश्च । कृत्समाप्त्यनन्तरं तिङ्सम्बन्धिनी चर्या ३।३।१३१ सूत्रादारभ्यते । एतत्प्राक् 'लट्-लुट्' आदि लकाराणां विधानं कृतमस्ति । अष्टाध्याय्यां प्रत्ययविधानानन्तरमेव प्रत्ययार्थानुशासनं कृतमस्ति । चतुर्थपादे कृत्प्रकरणस्य परिशिष्टांशः आयातोऽस्ति । अस्मिन् मुख्यतयाव्ययकृत्प्रत्ययानां विवरणमस्ति ।

चतुर्थाध्यायः 'ङ्याप्प्रातिपदिकात्' (४।१।१) सूत्रादारभ्यते । अनन्तरं 'सुब्' विभक्तेः सूत्रमस्ति । अस्य सूत्रस्यात्रपाठकारणमेतदस्ति यत् व्याकरणशास्त्रानुसारं सुबन्तपदेभ्यः तद्धितप्रत्ययाः भवन्ति । अतएव सुब्विभक्त्यनुशासनानन्तरमेव तद्धि-तानुशासनं न्यायोऽस्ति ।' 'सुप्' सूत्रानन्तरं 'स्त्रियाम्' (४।१।३) सूत्रात् स्त्रीप्रत्यया-धिकारः प्रारभ्यते । तद्धितात्प्राक् स्त्रीप्रत्ययानामुपन्यासकारणमेतदस्ति यत् वक्ष्यमाण तद्धितप्रत्ययाः यथासामान्यनामभ्योभवन्ति, तथैव ङ्यावन्तेभ्योऽपि । अतएव

भट्टोजिदीक्षितो लिखितवान्—'ङ्यावन्तात् तद्धितोत्पत्तिर्यथास्यात् ङ्याब्भ्यां 'प्राङ्-माभूत्' सिद्धान्तकौमुदी ४।१।१ न्यासटीकायामेतस्य स्पष्टीकरणं कुर्वता लिखितमस्ति यत् अथ तद्धिताधिकारः स्त्रीप्रत्ययानामादित एव कस्मान्न क्रियते ? किमेवं सति भवति ? ङ्यावन्तमपि तद्धितान्तत्वात् प्रातिपदिकमिति ङ्याप्प्रातिपदिकात् इत्यत्र ङ्याब्ग्रहणं न कर्त्तव्यं भवति। प्राचां स्फस्तद्धिते' इत्यत्र तद्धितग्रहणम्। यस्येति चेतीकारग्रहणञ्च। तद्धित इत्येवं सिद्धत्वात्। अशक्यमेवं कर्तुम्। एवंहि क्रियमाणे तत्र ङ्याब्ग्रहणस्य यत्पूर्वं प्रयोजनमुक्तं तन्न स्यात्। ङीष्-ङीप्-ङीनाञ्च ङकारस्येत् संज्ञाऽतद्धित इति (३।१।८) प्रतिषेधात्। इह च पट्वीत्योर्गुणः इति गुणः स्यात्। तस्माद् यथान्यासमेवास्तु (न्यास० ४।१।७६)।

सारांश एषोऽस्ति यत् अष्टाध्याय्याः प्रथमयोः द्वयोरध्याययोः संज्ञापदानां सुवन्त-तिङन्तभेदयोः वाक्येषु च तेषां परस्परसम्बन्धे विचारः कृतोऽस्ति। तृतीयाध्याये धातुभ्यः शब्दसिद्धेर्विवेचनं तथा चतुर्थ-पञ्चमाध्याययोः प्रातिपदिकानां शब्दसिद्धेश्च विचाराः सन्ति। षष्ठ-सप्तमाध्याययोः सुवन्त-तिङन्तशब्दयोः प्रकृति-प्रत्ययात्मकसिद्धिः तथा स्वराणां विवेचनानि सन्ति। अष्टमाध्याये सन्निहितपदानां शीघ्रोच्चारणेन वर्णेषु स्वरेषु संभवप्रभावस्य कथनमस्ति। यदि प्रतिपाद्य विषयाणां दृष्टया विचारः क्रियेत, तदा संज्ञा, परिभाषा, स्वर-व्यञ्जनयोः प्रकाराः धातु-सिद्ध-क्रियापदानि, कारकाणि, विभक्तयः, एकशेषः, समासः, कृदन्तम्, सुबन्तम्, तद्धितम्, आगमः, स्वरविचारः, द्वित्वम्, सन्धिश्चाष्टाध्याय्याः प्रमुख-विचार-विषयाः सन्ति। पाणिनि-मतेन प्रकृति-प्रत्यययोरुभयोरपि पृथक्-पृथगर्थः जायते। अतएव तेन सर्वत्र प्रत्ययार्थो दत्तः। तेन शब्दार्थास्तत्सम्बन्धाश्च नित्या अङ्गीकृताः।

पाणिनेर्महत्त्वम्

पाणिनेर्महत्त्वमनेकदृष्ट्या वर्त्तते। अतीतस्य पूर्वस्यवोपसंहारस्य भविष्यतो मार्गदर्शनेन सह विधानं कस्यापि युगपुरुषस्य कार्यं भवति। व्याकरणक्षेत्रे पाणिनिरेतादृशएव युगपुरुषोऽस्ति। ततः पूर्वं वैदिक-लौकिक-साहित्ययोः लेखनकार्यं पर्याप्तं सम्पन्नमासीत्। भाषायाः शास्त्रीय-काव्यात्मक-स्वरूपयोः विविधविभाजनानि विश्लेषणानि च व्यक्तान्यभूवन्। पाणिनिरेतेषां सर्वेषां सूक्ष्मविवेचनात्मकमध्ययनं कृतवान्। यत्रैकत्र विशालवैदिकसाहित्यस्य सुरक्षा तदीयं ध्येयमासीत्, तत्रान्यत्र संस्कृतस्य लौकिकप्रयोगे विविधरूपेष्वागच्छद्व्यवधानमपनीय तत्साहित्योपयोगिरूपेष्वेकात्मस्थापनमपि तल्लक्ष्यमासीत्। संस्कृतस्यैकसमन्वितरूपाय युगयुगपर्यन्तं चिरस्थायित्वप्रदानायैतन्नितान्तमावश्यकमप्यासीत्। पाणिनिरेतस्मिन्कार्ये पूर्णां सफलतामधिगतवान्। भाषाक्षेत्रे तत्सदृशः समन्वयकारी पुरुषः विश्वस्मिन् कदाचिदेव क्वचित् कोऽपि प्रादुर्भूतोऽभविष्यत्। वैदिकवाङ्मयस्य प्राणरक्षां कुर्वन् स

संस्कृतमेकविशिष्टनियमवद्धशृङ्खलायां नियन्तुं प्रयत्नं कृतवान् । स स्वसमयं यावत्, यतः कुतोऽप्यागतान् प्रचलितशब्दान्, संस्कृते ग्राह्यान् जनमानसैः संस्कृतरूप-विधाने विलाप्यरचयित्वा प्रयुज्यमानान् संस्कृतव्याकरणस्य विशालेसीम्नि आनेतुं प्रयतितवान्। 'छन्दस् लोके', भाषायां विभाषान्यतरस्याम्, वहुलमित्यादिपरिभाषाः भाषाणां विविधरूपाण्येव द्योतयन्ति । एतदतिरिक्तम्, प्राचाम्, अन्येषाम् आदि शब्दाः देश-विदेशानां प्रचलितरूपप्रयोगेभ्यः संकेतं कुर्वन्ति । पाणिनिः एतान् सर्वानेव शब्दान् तद्विशालसीम्नि अङ्गीकृतवान्, यदाधुनिकभाषावैज्ञानिकाः पाणिनेर्दायरूपं कथयन्ति ।

पाणिनिरौदुम्बरायण-आपिशलि-काश्यप-गार्ग्य-गालव-चाक्रवर्म-भारद्वाज-शाकटायन-शाकल्य-सेनक-स्फोटायननामुल्लेखं कृतवान् । कियन्तो विद्वांसः स्फोटायनं स्फोटवादस्य प्रवर्त्तकमौदुम्बरायणमेव स्वीकुर्वन्ति । अतः सम्भाव्यते यत् पाणिनिना स्फोटायननाम्नौदुम्बरायणस्यैवोल्लेखः कृतो भवेत् । नात्र सन्देहः यत् पाणिनिः स्वसमस्तपूर्ववर्तिज्ञानं स्वाष्टाध्याय्यां सम्मलेयितुं प्रयासं विहितवान् । अनेकानेकपूर्वप्रचलितसञ्ज्ञा अपि पाणिनिः स्वसूत्रे निवद्धवान्। पाणिनेः व्याकरणमकालकं कथ्यते। नानेन कालचर्चा विहिता । परं भर्तृहरिः स्ववाक्यपदीयस्य प्रकीर्णकाण्डस्य कालसमुद्देश्ये कालस्य दार्शनिकसमस्या-समाधानं कुर्वन् 'वर्तमानसमीपे वर्तमानवद्वा' (३।३।१३१) सदृशसूत्रद्वारा कालस्य तथाकथितसीम्नां त्रोटनाय प्रयत्नं विहितवान्। एतत्सार्वजनीनं सत्यमस्ति यत् 'वर्तमानेलट्' (३।२।१२३) परोक्षेलिट् (३।२।११५) तथा 'लृट् शेषेच. (३।३।१३) सदृशसूत्राणां प्रयोगकालेऽपि तस्य भावना कालापेक्षया भावोपरि विशेषरूपेण स्थितासीत् । अत एव पाणिनिः 'अकालकः' एतदर्थमेव प्रतीयते, यतस्तेन कालोपरि दृष्टि न दत्त्वा भावोपरि दृष्टिर्निहिता । अस्माकमेतदनुमानमस्ति यत् अष्टाध्याय्यामागतानि माहेश्वरसूत्राणि पाणिनेः पूर्ववर्तीनि सन्ति । परं पाणिनिस्तेषां प्रयोगं विधाय तानि पाणिनीयानि चकार । एतेषु सूत्रेषु विधानमनुवन्धानां वैयाकरणपाणिनेः स्वीया विशेषता विद्यते । श्रीसत्यकाम वर्मा लिखितवान् :—"एभिरनुवन्धैः कियान् चमत्कार उत्पादितः, कदाचिदिमं प्रेक्ष्यैव जनैरेतेषांविषये माहेश्वरप्रसादमान्यता स्वीकृता । तत्पूर्वमनुवन्धास्ततो भिन्ना आसन् । वस्तुतः प्रत्याहाराणामीदृशीसुदृढकल्पनैव पाणिनेः हस्ते लाघवास्त्रं दत्तवती, यस्य वलेन संक्षेपस्तस्य सर्वाधिकं श्रेष्ठं विजयचिह्नमभवत् । तत्सूत्रेषु एकेनाभूतपूर्वसंकोचागमनेन सह तच्छास्त्राकारस्य परिणामोऽपि न्यूनोजातः । अतएव स्यान्नाम तथाकथितमाहेश्वरसूत्राणां रचयिता कोऽपि, परं पाणिनिद्वारैतेषां स्वानुवन्ध-निवन्धनं स्वतएवाश्चर्यमासीत् । पाणिनेः सम्पूर्णव्याकरणापेक्षया महदाश्चर्यमेतदस्ति ।[1]

अष्टाध्याय्या अध्ययनेन विद्वद्भिः तस्याः निम्नांकिताः विशेषाः निर्धारिताः—

१. संस्कृत व्याकरण का उद्भव और विकास ।

१. तेषां स्वराणामनुनासिकः पाठः, येषामित्संज्ञां विधाय लोपोऽभष्ट आसीत्। (उपदेशेऽजनुनासिक इत्–१।३।२)

२. अधिकारसूत्रम्—सूत्राणां येषां शब्दानामाधिकारः परवर्त्तिसूत्रेषु अभीष्ट आसीत्, तेषु स्वस्तिचिह्नम्।

३. संहितापाठः—प्रथमसूत्रस्यान्तिमाक्षरं तत्परवर्त्यक्षरं संयोज्य संधिविधाय सूत्राणां पाठांकनम्।

४. गणपाठः—अष्टाध्याय्याः गणपाठसामग्री नितान्तं मौलिक्यस्ति। अनेक-शब्दाः, ये परस्परं भिन्नाः सन्तोऽपि कस्मिंश्चिदेकस्मिन् वृत्ते मिलन्ति, ते व्या-करणस्यैकस्मिन् नियमे रक्ष्यन्ते। अनया शैल्या शब्दानां विकीर्णा सामग्री एक-सरलव्यवस्थायां नियमे चैकस्मिन् वध्यते। गणपाठः बहुसंख्यकशब्दान् व्याकरणस्य संक्षिप्तनियमेष्वादाय परिचयप्रदानस्य रोचकः मौलिकश्च प्रकारोऽस्ति। एतद्गण-पाठ-प्रणाल्या पाणिनिः ग्राम-जनपद-संघ-क्षेत्रचरणादिभिः सम्बद्धानां भौगोलिक राजनैतिक-सांस्कृतिक-सामग्रीणामद्भुतं संकलनं सम्पादितवान्। आकृति-गौरादि-तारिकादि कृतादि-सदृश-गणानां विधानमस्ति।

५. अतीत-वर्त्तमान-भविष्याणां भाषारूपाणां नियमनं निर्धारणञ्च।

६. लोक-भाषा-स्रोतसां रक्षा तत्संस्कृतीकरणञ्च।

७. शब्द-द्वारा लोकजीवनस्य यथार्थविश्लेषणम्।

पिङ्गलाचार्यः

पाटलिपुत्रं पिङ्गलश्च

परीक्षितेषु सप्तसु शास्त्रकारेषु पिङ्गलाचार्यस्यापि नामायाति। पिंगलेन छन्दः शास्त्राय तदेव कार्यं कृतम्, यत्पाणिनिना व्याकरणायाकारि। यद्यशोकावधानं विश्वस्तं मन्येत, तदा विन्दुसारः स्वपुत्रमशोकं पिंगलनागाश्रमे शिक्षां प्राप्तुं प्रेषित-वान्। अतः परीक्षितशास्त्रकारेषु पिंगलस्यापि पाटलिपुत्रेण सह सम्बन्ध आसीत्। पाटलिपुत्रे परीक्षणानन्तरमेव पिंगलाचार्यस्य ख्यातिः सर्वत्र व्याप्ताऽभविष्यत्। कात्यायन—'ऋक्सर्वानुक्रमण्याः' वृत्तिकारः षड्गुरुशिष्यः वेदार्थदीपिकायां छन्दः शास्त्ररचयितारं पिंगलं पाणिनेरनुजं लिखितवान्।[1] सम्प्रति प्राप्तपाणिनिशिक्षायाः शिक्षाप्रकाशनाम्न्याः टीकायाः रचयितुरपि मतमेतदेवास्ति।[2] पाणिनि-पिंगलयो-रेतद्भ्रातृसम्बन्धस्य युक्तिपूर्वकं विवेचनं युधिष्ठिरमीमांसकः स्वग्रन्थे कृतवान् यत् कियतां विदुषां कथनानुसारं पिंगलः पाणिनेर्मातुलो न भूत्वानुज आसीत्। नात्र-सन्देहो यत् पिंगलस्य कृतेरपि परीक्षा पाटलिपुत्रेऽभवत्। तत एव च तद्यशः सर्वत्र व्याप्तमभवत्।

---

१. वेदार्थदीपिका, पृ० ९७, २. शिक्षा-संग्रह, काशी संस्करण, पृ० ३८५।

यद्यपि छन्दः शास्त्रपरम्परा पिंगलात्पूर्वमपि विद्यमानासीत्, पिंगलात्पूर्वमपि छन्दः शास्त्रोपरि ग्रन्थप्रणयनमभूत्, यदंशाः यद्रचयितारश्च पिंगलेनैव निर्दिष्टाः सन्ति। पिंगलस्य छन्दः शास्त्रे क्रौष्टुकि[1]-यास्क[2]-ताण्डि[3]-सैतव[4]-काश्यप[5]-रात[6]-माण्डव्यानां[7] सप्तानां छन्दः सूत्रकाराणां मतान्युद्धृतानि सन्ति । रातस्य माण्डव्यस्य च मताना-मुल्लेखं भट्टोत्पलोऽपि[8] कृतवान् । पूर्ववर्तिच्छन्दश्शास्त्रस्य समन्वयकार्यं पिंगला-चार्यः कृतवान्। अतएव व्याकरणशास्त्रे समन्वयदृष्ट्या मौलिकतादृष्ट्या च यत्स्थानं पाणिनिरासवान्, तदेव छन्दश्शास्त्रे पिंगलोऽधिगतवान् ।

राजशेखरस्य काव्यमीमांसायाम् पिंगल-परीक्षणस्य यो निर्देशो विहितोऽस्ति, तेन तत्सम्बन्धःपाटलिपुत्रेण सह यथार्थः प्रतीयते। उत्तरवर्तिच्छन्दश्शास्त्राचार्या अपि पिंगलं शेषनागादभिन्नं मन्यमानाः तमेकं प्रसिद्धशास्त्रकाररूपेण स्वीकृतवन्तः । हलायुधवृत्तौ पिंगलच्छन्दस्सूत्रस्य प्रारम्भे लिखितमस्ति—

श्रीमत्पिंगलनागोक्तच्छन्दश्शास्त्रमहोदधेः,
वृत्तानि मौक्तिकानीव कानिचिद्विचनोम्यहम्

परिचयः

इदं पूर्वमेव चर्चितमस्ति यत् पिङ्गलाचार्यस्य पाणिनिना सह सम्बन्ध आसीत् । 'हलायुधवृत्तौ' पिङ्गलः नागात् शेषनागाद्वाऽभिन्नो मतोऽस्ति । अतएव 'प्राकृत पैङ्गलम्' ग्रन्थे पिङ्गलं शेषनागस्य रूपं मत्वा लिखिता निम्नलिखितमनोरञ्जक कथोपलभ्यते ।

एकदा शेषनागो जलराजाद्वहिर्निर्गत्य पृथिव्यां वसन्तप्रभातस्यातपं वायुं च सेवमान आसीत् । तदानीमेव भगवतो विष्णोर्वाहनः शेषनागस्य शत्रुश्च तार्क्ष्यस्तत्रा-गमत् । उचितमवसरं निभाल्य स शेषनागं धृतवान् । प्रथमंतु शेषनागः व्याकुलो जातः, परं पश्चात् सावधानो भूत्वा बुद्ध्या कार्यं कृतवान् । स गरुडंप्रत्युक्तवान् यदस्मिन् भौतिके विश्वस्मिन् छन्दश्शास्त्रज्ञः केवलमहमेवास्मि । यदि भवान् मां भक्षयिष्यति, तदा संसारतश्छन्दः शास्त्रं लुप्तं भविष्यति, न कोऽपि व्यक्तिस्तज्ज्ञानं प्राप्स्यति । अत एव तेन गरुडः प्रार्थितो यत् अनिवार्ये तद्भक्षणे सति, छन्दः शास्त्र-वर्णनानन्तरमेव तद्भक्षणमसौ कुर्यात् । गरुडः शेषनागस्य प्रार्थनां स्वीकृतवान् तथा तस्मै छन्दश्शास्त्रस्य वर्णनार्थमवसरं दत्तवान् । शेषनागः छन्दश्शास्त्रस्य वर्णनं तथा मधुरं कृतवान्, यथा गरुडः मन्त्रमुग्धोऽभवत् । गरुडं मन्त्रमुग्धं मत्वा

---

१. छन्द सूत्रम् २।२९, २.. वही ३।३०; ३. वही ३।३६, ४. वही ५।१२, ६।१०, ५. वही ७।९, ६. वही ७।१३, ७. वही ७।२४ ८. वृहत् संहिता विवृत्तिः पृ० ११४८ ९. पिङ्गलच्छन्दः सूत्रम् (हलायुधवृत्तिसहितम्) प्रथमोऽ-ध्यायः, श्लोक ?

पलायनात्रसरेऽधिगते शेषनागः 'भुजङ्गप्रयातस्योच्चारणं विधाय जले कूर्दितः। गरुडेन यदा शेषनागोपरि वञ्चनारोपिता, तदा शेषनागः उक्तवान् यत् 'भुजंगप्रयात' च्छन्दोद्वारा मयः स्वगमनं सूचितम्।

प्राकृतपैंगले पिङ्गलाचार्यं नमस्कुर्वता लिखितमस्ति—

जो विविहमत्तसाअरपारं पत्तो वि विमलमइहेलं।
पढमभासतरंडो णाओ सो पिंगलो जअइ[1]॥

यः महर्षिः पिङ्गलः स्वविमलबुद्ध्या लीलया सह विविधमात्राणां सागरं तीर्णवान्, तथा यः भाषायाः प्रथमःतरणतरणिः अस्ति, स जयतु।

एतेन मंगलपद्येन टीकाकारैः पिङ्गलाचार्यः शेषावतारोऽपि स्वीकृतः। भिखारीदासस्य मुरलीधरकवेश्च कथनैरपि शेषावतारस्य तस्य सिद्धिर्भवति।

शुक्लयजुर्वेदस्य शतपथब्राह्मणे कस्यापि पैङ्गर्पेरुल्लेख आयातोऽस्ति। वंशेऽस्यैव यास्कपैंगी बभूव। पिङ्गलाचार्योऽपि वंशेऽस्मिन्नेवाजनि। वेपरः स्वभारतीय वाङ्मयस्येतिहासे पिङ्गलाचार्यं पैंगर्षिवंशप्रसूतं मनुते।[2]

पिङ्गलाचार्यस्य जीवनवृत्तसम्बन्धे न विशेषतथ्यमुपलब्धमस्ति। एतावदेव वक्तुं शक्यते, यत् अयं छन्दश्शास्त्रस्य समन्वयकर्त्ता तथा मौलिक उद्भावकोऽस्ति।

पाटलिपुत्रस्य विद्वत्सभया सहापि सम्बन्ध एतस्यासीत्। अग्निपुराणे पंक्ति-रेकायाति—

छन्दोवक्ष्ये मूलजैस्तैः पिङ्गलोक्तं यथाक्रमम्।

अग्निपुराणस्यैतत्कथनेन पिङ्गलाचार्यस्यास्तित्वं सिद्ध्यति। स लौकिक वैदिकयोरुभयोरपिच्छन्दसोः निर्देशं स्वग्रन्थे कृतवान्। अग्रे पिंगलशब्दः व्यक्ति-वाचकत्तां विहाय छन्दश्शास्त्रस्य पर्यायवाचकतां जग्राह।

समयनिर्धारणम्

डॉ० कीथः पिंगलाचार्यं ख्रीष्टाब्दात् २०० वर्षाणि पूर्वं जातं मनुते[3]। पाश्चात्यो विद्वान् मैकडॉनलो लिखितवान्—'वैदिककालादनन्तरं छन्दसामत्यन्तं प्रामाणिकं विवेचनं छन्दश्शास्त्रे लभ्यते। अस्मिन् वैदिकच्छन्दसामध्ययनं विहित-मस्ति। एतद्वेदाङ्गमपि कथ्यते परमस्य रचनाकालः उत्तरवर्ती विद्यते, उद्देश्य-मस्य च छन्दोविवेचनमस्ति[4]।

---

1. प्राकृत पैंगलम्, १।१।
2. A History of Indian literature. Pags. 46
3. History of Sanskrif literature. Pase 415
4. Ao Mo History Sanskrit literature. Page 267

भरतमुनेः 'नाट्यशास्त्रस्य पिङ्गलाचार्यस्य 'पिङ्गलच्छन्दःसूत्र'स्य च तुलनात्मकाध्ययनेनावगम्यते यत् भरतमुनेः शत-सार्धशतवर्षाणिपूर्वं पिङ्गलाचार्योऽभूत् । भरतमुनिः नाट्यशास्त्रस्य चतुर्दशपञ्चदशाध्याययोः छन्दस्सु विचारं विहितवान् । एतस्य विवेचनस्य दृष्टिः नाटकाधीनास्ति । अतएव वैदिकच्छन्दसांविवेचनमनेन न विहितम् । श्लोकेषु छन्दोलक्षणश्रृङ्गाररस-नायिकाभिश्च सम्बद्धानां पंक्तीनां रूपेणैतेषां छन्दसां क्रमश उदाहरणानि दत्तानि सन्ति । अयं प्रत्ययोपर्यपि विचारं न विहितवान् । भरतमुनेर्विवेचनं स्पष्टतया पिंगलोत्तरकालीनमस्ति । भरतस्य च समयः खीष्टाब्दात् पूर्वं द्वितीयशताब्द्यां स्वीकृतंविद्यते । अतः पिङ्गलाचार्यस्य समयः पाणिनेः समकालीनोऽथवाऽल्प एव तदुत्तरकालीनः सम्भाव्यते ।

खीष्टाब्दात्पूर्वं प्रथमशताब्द्याः समीपे लौकिकच्छन्दसां यावान् विकासोऽभवत्, तत्परिचयः पिङ्गलग्रन्थेषु न प्राप्यते । सूत्रशैल्याः रचनापि ग्रन्थस्यैतस्य प्राचीनतायाः द्योतिकास्ति । कोलब्रुकः पिङ्गलं पतञ्जलिं चैकमेव व्यक्तिं स्वीकृतवान् कथितवान् च यत् पिङ्गलेनैव पतञ्जलिनाम्ना पाणिनेः व्याकरणोपरि योगानुशासनरचनाकारि । परमेतस्य तथ्यस्य स्वीकृत्यै पर्याप्तप्रमाणं नास्ति । एतत्संदिग्धमस्ति यत् पिङ्गलस्य समयः खीष्टाब्दात् पूर्वं द्वितीयशताब्द्याः पूर्ववर्त्ती सम्भाव्यते ।

यदि पाणिनिना सह पिङ्लाचार्यस्य सम्बन्धः प्रामाणिको मन्येत, तदा तत्कालः खीष्टाब्दात्पूर्वं ५००-३०० मध्ये सिद्ध्यति । भारतीय = परम्परा तु तं शेषनागादभिन्नं मनुते । अतः एतत्परम्परानुसारमप्यस्य समयः खीष्टाब्दात्पूर्वं ४०० सिद्ध्यति । अस्माकमनुमानमस्ति यत् पिङ्गलाचार्यः पौराणिको जनः न भूत्वा ऐतिहासिकोऽस्ति, तत्समयश्च खीष्टाब्दात्पूर्वं २०० वर्षेभ्योऽपि प्राचीनोऽस्ति । अयं नन्दसम्राजः कालेऽभूत् । एतद्ग्रन्थः 'पिङ्गलच्छन्दःसूत्रम्' संस्कृतच्छन्दःशास्त्रस्य प्रथममुपलब्धं विस्तृतंसुग्रथितञ्चग्रन्थरत्नमस्ति : नात्रसंदोहोयत् पिङ्गलछन्दःसूत्रे प्रक्षिप्तांशोऽपि पर्याप्तोऽस्ति ।

रचना

पिङ्गलाचार्यरचितम्—'छन्दोविचितम्' छन्दःसूत्रं वा ग्रन्थ उपलब्धोऽस्ति । एषग्रन्थोऽष्टाध्यायेषु विभक्तोऽस्ति । अस्मिन् वैदिकच्छन्दोभिः सह लौकिकच्छन्दसामपि विवेचनं कृतमस्ति । प्रथमाध्याये म-य-र-स-त-ज-भ-त-ग-लानाम् छन्दःशास्त्रस्य दशाक्षराणां वर्णनम्, गणविचारः, गुरुः, लघुश्च लक्षणेष्वागतानि सन्ति । द्वितीयाध्याये गायत्र्याः अन्यच्छन्दसाञ्च विवेचनस्य तद्भेदानाञ्चोल्लेखो विद्यते । तृतीयाध्याये छन्दः पाद-विचारोऽस्ति । एकस्मिन् पादे प्रयुक्तानां विभिन्नच्छन्दसामक्षरसंख्यानां निर्देशोवर्त्तते । गायत्र्युष्णिगनुष्टुब्बृहती-पंक्ति-जगती-प्रभृति-

च्छन्दसां पाद-लक्षणानि दत्तानि विद्यन्ते। गायत्र्यादिसप्तप्रकाराणां छन्दसां सप्त-देवताः कथिताः सन्ति—

"अग्निः सवितासोमोबृहस्पतिर्मित्रावरुणाविन्द्रो विश्वदेवा देवताः[1]" षडज्-ऋषभ-गान्धार-मध्यम-पञ्चम-धैवत-निषाद[2]-श्वेत - सारंग-पिसंग-कृष्ण-नील-लोहित-गौर[3]-सप्तवर्णानामग्निवेश्य-काश्यप-गौतमांगिरस-भार्गव-कौशिक-वशिष्ठ[4] सप्त-च्छन्दसां गोत्रनिर्देशोऽस्ति।

चतुर्थाध्याये सप्तसूत्रेषु उत्कृत्या वैदिकचर्चानन्तरं अष्टमसूत्रात् लोकप्रयुक्ता-र्यावैतालीमात्रासमक्कासभेदविवेचनमस्ति। अन्ते चूलिकाछन्दसश्चर्चा विद्यते। इमानि छन्दांसि मात्रिकाणि सन्ति तथैतेषां लक्षण-निर्देशाय चातुर्मात्रिकगणस्य प्रयोगो विहितो विद्यते। अथवा मात्रासंख्यायाः लघुगुरुनिर्देशस्य चाश्रयो गृहीतोऽस्ति। पिङ्लाचार्यः एकमात्रार्थं 'ल' कारस्य प्रयोगं कृतवान्।

पञ्चमाध्याये सम-अर्धसम-विषम-वृत्तानां लक्षणानि तथा समानी-नाराचवितान -पथ्या-चपला-विपुला-आपीड-प्रत्यापीड-मंजरी-लवली - अमृतधारा - उद्गाता-सौर-भक-ललित-उपस्थित-प्रचुपित-शुद्ध-विराड- ऋषभ-द्रुतमध्या-वेगवती-भद्रविराट्-केतु-मती-आख्यानकी-विपरीताख्यानकीहरिणीप्लुता-अप्टवक्त्र - पुष्पिताग्रा-यमवती-शिखा खंजादिवृत्तलक्षणानि च वर्णितानि सन्ति।

षष्ठाध्याये तनुमध्या-कुमारललिता-माणवकाक्रीडित-चित्रपदा-विद्युन्माला-हंसरुत-भुजंगशिशुभृता-हलमुखी-शुद्धविराट-पठाव रुक्मावती-मयूरसारिणी-मत्ता-उपस्थिता-इन्द्रवज्रा-उपेन्द्रवज्रा-उपजाति-दोधक-शालिनी-वातोर्मि-भ्रमरविलसिता-रथोद्धता - स्वागता-वृन्ता-श्येनी-विलासिनी - वंशस्थ - द्रुतविलम्बित-तोटक-पुट-जलोद्धतगति - कुसुमविचित्रा-तत्-चंचलाक्षिका - भुगंगप्रयात-स्त्रग्विणी- प्रमिताक्षरा- कान्तोत्पीडा-वैश्वदेवी-वाहिनी-नवमालिनी नामकच्छन्दसांलक्षणान्यायातानि सन्ति।

सप्तमाध्याये प्रहर्षिणी-रुचिरा-मत्तमयूर-गौरी-असम्वाधा-अपराजिता-प्रहरण-कलिका-वसन्ततिलका-उद्धर्षिणी-चन्द्रावर्ता-माला-मणिगुणनिकर-मालिनी-ऋषिगण - विलसित-हरिणी-पृथ्वी-वंशपत्रपतित-मन्दाक्रांता-शिखरिणी-कुसुमितलतावेलिता-शार्दू-लविक्रीडित-सुवदना-वृत्त-स्त्रधरा-मद्रक-अश्वललित-मत्ताक्रीडा-तन्वी-क्रौंचपदाभुजंग - विजृम्भित-अपवाहकादिच्छन्दसां तथा दण्डकानां लक्षणानि कथितानि सन्ति।

अष्टमाध्याये कुड्मलदन्ती-वर्तनु-जलधरमाला-गौरी-ललना-कनकप्रभाकुटिल-

---

१. पिंगलछन्दः सूत्रम्—३/६३।

२. वही ३।४६। ३. सितसारंग-पिशंग-कृष्ण-नीललोहित-गौराः वर्णाः वही, ३।६५।

४. वही, ३।६६।

गति-वरसुन्दरी-कुटिला-शैलशिखर-वरयुवती-अतिशायिनी-अवितथ-कोकिलक-विबुध-प्रिया-नाराचक-विस्मिता-शशिवदना-प्रभृतिच्छन्दसां लक्षणानि कथितानि सन्ति। प्रस्तारनिरूपणस्य संख्यावगमस्य च विधेर्निर्देशोऽस्ति।

अष्टमाध्यायस्याध्ययनेनैवं प्रतीयते यत् नैषोऽध्यायः पिङ्गलाचार्य-विरचितो विद्यते। एषोऽध्यायोऽस्योत्तरवर्तिना केनचिदाचार्येणास्य नाम्ना योजितः। अतः तानि छन्दांसि गाथाः कथ्यन्ते। यानि छन्दांसि शास्त्रेऽवर्णितान्यपि काव्ये प्रयुक्तानि दृश्यन्ते। 'तत्राऽनुक्तं[1] गाथा' उक्त्वा ग्रंथेऽस्मिन् गाथासु ध्यानमाकर्षितं विद्यते।

संस्कृतभाषायां निबद्धे पिङ्गलस्यच्छन्दःसूत्रे छन्दोलक्षण-निरूपणाय सूत्रशैली प्रयुक्ता विद्यते। छन्दसां सूत्रगतलक्षणमात्राण्येव दत्तानि वर्त्तन्ते नोदाहरणानि। वर्णवृत्तानां लक्षणेषु वार्णिकगणानामुपयोगः कृतो विद्यते, येषां निर्देशाय छन्दः शास्त्रीयाणि-दशाक्षराणि-य-म-त-र-ज-भ-न-स-ल-गानि प्रयुक्तानि सन्ति। मात्रिक-छन्दःसु आर्यालक्षण-सिद्ध्यै केवलं चतुर्मात्रिकगणाः प्रयुक्ताः सन्ति। अन्यमात्रिक-गणेभ्यः पिङ्गलेन स्वीकृतिर्न दत्ता। वर्णवृत्तानां वर्गीकरणं समार्द्धसमविषमरूपेण विहितं विद्यते। यस्य छन्दसोऽर्धचरणमेकसमानं भवेत्, अर्द्धञ्च कस्याप्यन्यस्य साम्यं भजेत, तदर्धसमं कथ्यते। मात्रिकच्छन्दसामार्या-वैतालीयमात्रासमकप्रकरणेषु विचारः कृतोऽस्ति।

छन्दः शास्त्रस्य जन्मच्छन्दसां जन्मानन्तरं जातं भवेत्। यतः कस्या अपि कलायाः विद्यायाः सम्बन्धे शास्त्रनिर्माणं प्रायः कलायाः विद्यायाः विकासानन्तरमेव भवति। अतः लौकिकच्छन्दसां वैदिकच्छन्दसाञ्च समन्वयः छन्दसां प्रणयनञ्च पिङ्गलाचार्येणच्छन्दसामाविष्कारानन्तरमेव कृते भवेताम्। विद्वांसः छन्दः शास्त्र-विषयकं प्राचीनतममुपलब्धग्रंथमृक्प्रातिशाख्यं मन्वते। अस्य ग्रन्थस्य प्रधानोविषयः यद्यपि व्याकरणमस्ति, तथापि तदन्तभागे वैदिकच्छन्दःसु प्रकाशो दत्तो विद्यते। अस्य ग्रन्थस्य छन्दोविषयकचर्चाऽपूर्णाऽस्ति। परं वैदिकच्छन्दसां लक्षणान्यत्रोप-लभ्यन्तं। वेदमन्त्राणां विशुद्धतायै तथा तेषां लयबद्धगतिज्ञानार्थं छन्दः शास्त्रस्या-ध्ययनस्यावश्यकता भवति। वेदमन्त्राः छन्दोबद्धाः सन्ति। तेषामुच्चारणस्य गति-विधिं छन्दः शास्त्रस्याध्ययनं विना ज्ञातुं न शक्यते। प्रायशः भगवान् शिवः अन्य शास्त्रवत् छन्दः शास्त्रस्यापि प्रवर्त्तकोऽस्ति। स्वभाष्यग्रंथस्य पुष्पिकायां यादव-प्रकाशे श्लोकमेकमुद्धरता कथितमेतत्, यत् देवगुरुः बृहस्पतिः शङ्करात् सर्वप्रथमं छन्दोज्ञानं प्राप्तवान्। बृहस्पतेरिदं ज्ञानं दुश्च्यवनेन्दुः, इन्दोश्च सुरगुरुः माण्डव्यः प्राप्तवान्। यादवप्रकाशस्य पिङ्गलनागच्छन्दोभाष्यस्य पुष्पिकायां सनत्कुमारोऽपि

---

१. पिङ्गलछन्दः सूत्रम् ८।१।

छन्दः शास्त्रज्ञः स्वीकृतोऽस्ति । परं लिखितरूपेणोपलब्धः पिङ्गलाचार्यस्य 'छन्दः सूत्र' ग्रंथएवादिच्छन्दोग्रन्थोऽस्ति ।

छन्दः सूत्रोपरि चतुर्दशटीका उपलब्धाः सन्ति । तासु भट्टहलायुधकृता मृतसंजीवनी टीका सर्वाधिकप्राचीना महत्त्वपूर्णा च विद्यते । एतट्टीकातिरिक्तमेतद् ग्रन्थोपरि पिङ्गलवार्तिकस्याप्युल्लेखः कृतो वर्तते । छन्दः परिभाषा मूलग्रन्थकर्त्रा नाङ्किता । परं हलायुधभट्टकृतायां टीकायां छन्दोऽक्षरसंख्यायाः परिमाणं स्वीकृतमस्ति । लिखितमस्ति—

"छन्दः शब्देनाक्षरसंख्यावच्छन्दोऽत्राभिधीयते[1] ।"

छन्दोव्युत्पत्तिः व्याकरणशास्त्रानुसारम्—

'छन्दयति पृणाति रोचते इति छन्दः, वा छन्दयत्याह्लादयति छन्द्यन्तेऽनेन वा छन्दः ।' अर्थात् रुचिकरा श्रुतिप्रिया लयबद्धा वाणी छन्दोऽस्ति । अथवा यस्याः वाण्याः श्रवणमात्रेण मन आह्लादितं जायते, सा छन्दोमयी वाणी-एव वेदोऽस्ति । छन्दश्शास्त्रस्य व्युत्पत्त्याः एष एकः पक्ष आसीत् उद्देश्यं वा, परं वेदमन्त्रेभ्यः छन्दः एतादृशकवचरूपेण स्वीकृतम्, यद्द्वारा वेदमन्त्रआसुरहस्तक्षेपेण सुरक्षितः तिष्ठेत् । लिखितमस्ति—

"छादयति मन्त्रप्रतिपाद्ययज्ञादीनिति छन्दः ।"

अर्थात्—यत् असुराणां विघ्नबाधाभिः यज्ञादिकर्मणां तथा वैदिकानुष्ठानानां रक्षां करोति, तदेव छन्दोस्ति । प्राचीनः प्रामाणिकश्च भाष्यकारः यास्कः स्वनिरुक्ते छन्दसः एतस्यैव सुरक्षार्थकस्वरूपस्य वर्णनं कृतवान् । यास्कस्य कथनमस्ति यत् मन्त्राणां विषयः मननं छन्दसां छादनं स्तोत्राणां स्तुतिः, यजुषाञ्च यजनं वर्तन्ते । पिंगलः स्वच्छन्दःसूत्रे यास्कस्य परिभाषायाः निर्वाहं कृतवान् ।

व्याड्याचार्यः

पाटलिपुत्रे परीक्षितेषु विद्वत्सु आचार्यव्याडेरपि नामायातमस्ति । अयं पाणिनेः पूर्ववर्त्यासीत् । परमष्टाध्याय्यामस्योल्लेखोनोपलभ्यते । शौनकर्षेः 'ऋक्प्रातिशाख्ये' मतमस्योद्धृतमस्ति[1] । व्याडेःद्वितीयं नाम 'दाक्षायण' इति श्रूयते । वामन काशिकायामेनं 'दाक्षि'—नाम्ना स्मृतवान्[2] ग्रन्थकारः । केचन विद्वास एनं पाणिनेः मातुलेयं मन्वते । परं यथार्थतोऽयं पाणिनेः मातुलआसीत् । व्याडेः यशः एकविश्रुतवैयाकरणस्य रूपेण प्राप्यते । पाणिनेः पूर्ववर्त्याचार्यपरम्परायां व्याडेः स्थानं परमोच्चमस्ति । तस्यासाधारणवैदुष्यस्य परिचायकः तस्य संग्रहग्रन्थो विद्यते । नायं ग्रन्थो-

१. पिंगलछन्दः सूत्रम् टीका द्वितीयोःध्यायः कारिका—१ ।

ऽद्योपलब्धोऽस्ति, परमस्य ग्रन्थस्य यान्युद्धरणानि प्राप्तानि सन्ति, तैरस्य महत्त्वं प्रकटं जायते ।

शाकटायन-शौनक-यास्क-व्याडि-कात्यायन-पतञ्जलि- प्रभृतीनांशैल्याअध्ययनेनावगम्यते यत् व्याडिः सुस्पष्टशैल्या आचार्योऽभवत् । वाक्यपदीयकारस्य महावैयाकरणस्य भर्तृहरेःसाक्ष्यानुसारं पतञ्जलेः भाष्यं मूलतः संग्रहप्रतिकुंचकोऽर्थात् व्याडेः संग्रहस्य रहस्योद्घाटक आसीत् । यास्केन न सूत्रशैली स्वीकृता, परं तेन भाषातत्त्वानां सुन्दरं विवेचनं विहितम् । प्रातिशाख्यानामारम्भः अक्षरसमाम्नायेन जायते ।

व्याडेः व्याकरणग्रन्थस्य 'संग्रहस्याप्यारम्भः शब्दार्थ-सम्बन्धेन शब्दनित्यत्वानित्यत्व-विवेचनेन च भवति । पतंजलिना व्यलेखि—

(संग्रहे तावत्प्राधान्येन परीक्षितं 'नित्योवा स्यात् कार्योवा)' भर्तृहरिरचितवाक्यपदीयस्य सोपज्ञटीकायां संग्रहस्य निम्नलिखितपद्यमुपलभ्यते—

सम्बन्धस्य न कर्त्तास्ति शब्दानां लोक-वेदयोः,
शब्दैरेव हि शब्दानां सम्बन्धः स्यात्कृतः कथम् ।

भर्तृहरेरिदं कथनं यथार्थं प्रतीयते यत् पतञ्जलिः 'संग्रह' ग्रन्थोपरि भाष्यंरचितवान् । भाष्ये—'अथ शब्दानुशासनम्' इति सूत्रं सर्वप्रथमं व्याख्यातवान् । नैतत्सूत्रंपाणिनेः प्रथमसूत्रं न वार्त्तिककारस्यैव । अतः महती सम्भावनास्ति यत् इदं व्याडेः सूत्रं स्यात् । अत इदं स्वीकर्तुं शक्यते यत् पाणिनेः सूत्ररचना-शैल्याः सम्मुखं व्याडेः व्याख्या विवेचनात्मकशैली च पृथक् सरण्याः प्रतिनिधित्वं कुरुतः ।

समय-निर्धारणम्

व्याडिःपाणिनेः पूर्ववर्त्यस्ति समकालीनो वाथवापश्चाद्वर्तीति प्रश्नएष विचारणीयोऽस्ति । महाभाष्ये-'आपिशल-पाणिनीय-व्याडीय-गौतमीया' पाठाः मिलन्ति । यद्येष पाठक्रमः ऐतिहासिको मन्येत, तदा व्याडिसमयः पाणिनेः पश्चात् सिद्ध्यति । व्याडेः निर्देशः ऋक्प्रातिशाख्ये समायातोऽस्ति । अतोऽस्यसमयः पाणिनेः पूर्ववर्ती सम्भाव्यते फिट्सूत्राणि पाणिनेः पूर्ववर्तीनि मत्वापि गार्ग्यस्य पाणिनेः पूर्ववर्त्तित्वं सिद्ध्यति । केचन विद्वांसः व्याडेरन्यं नाम दाक्षायणं स्वीकुर्वन्ति तथा तं पाणिनेरेकद्वि संततिक्रमपूर्वं मन्वते । भर्तृहरिःस्व-वाक्यपदीये लिखितवान्—

"अल्पज्ञेयः, संक्षेपेण च सर्वं पिपठिषुभ्यो वैयाकरणेभ्यो विस्तृतसंग्रहस्य मूल्याभावात् यदासौग्रन्थोऽस्तंगतः, तदा सत्यमर्मज्ञः गुरुः पतञ्जलिः संग्रहप्रोक्तानि समस्तन्यायबीजानि स्वमहाभाष्ये निबद्धानि चकार । परमपरिपक्वबुद्धिभ्यो जनेभ्यः एतत्संक्षिप्तविवेचनस्य पारगमनं कठिनमभूत्, तदा बैजि-सौभव-हर्यक्षादिविद्वांसः संग्रह-

द्वारोद्घाटकं भाष्यं शुष्कं वितण्डाविषयञ्च निर्मायोपेक्षणीयं चक्रतुः। ते पतञ्जलि-शिष्यानात्मनो वदन्ति स्म, परं त एवार्षग्रन्थस्यास्य विप्लावने कारणतां जग्मुः[१]।"

एतेनोद्धरणेनेदं स्पष्टमस्ति यत् पाणिनेः सूत्राणि केन्द्रं विधाय कात्यायनस्या-न्यमनीषिणां च वार्त्तिकाणां सहायतया विचारकस्य पतञ्जलेः वास्तविकाधारग्रन्थः व्याडि-रचित एष 'संग्रह' एवासीत्।

श्रीयुधिष्ठिरमीमांसकः पाणिनेः किञ्चित्पूर्वं व्याडेः सत्तां स्वीकृतवान्। सम्भवतः व्याडिः पाणिनेः जीवनकाले तद्व्याकरणरचनोपरान्तमपि विद्यमान आसीत्। नात्र संदेहो यत् व्याडिः पतञ्जलेः परमपूर्ववर्ती वर्तते।

पाणिनेः सम्बन्धः पाटलिपुत्रस्य विद्वत्सभया सहासीत्। तत्समयः खीष्टाब्दात् प्राक् ५००-५४० समीपे विद्यते। व्याडिरेकसंततिपूर्वं मन्येत, तदा तत्समयः खीष्टाब्दात् प्राक् ५२०-४६० संभाव्यते। एतत्समयानुसारं व्याडिरपि पाटलिपुत्रस्य विद्वत्सभया सम्बद्धः सिद्ध्यति। काशिकायामागतैः 'नन्दोपक्रमाणि मानानि (काशिका २।४।३१) सदृशैः वाक्यैः नन्दानां कार्यपरिचयः प्राप्यते तथा तद्विद्वन्मान्यतापि प्रकाशमायाति। व्याडिरपि 'पठान' देशीय आसीत् तथाऽयमपि पाञ्चाल-पार्श्ववर्त्ये-वासीत्। पाटलिपुत्रस्य यशः नन्दमौर्ययुगयोः देशदेशान्तरं यावत् व्याप्तमासीत्। अतो व्याडिरपि स्वव्याकरणग्रन्थसंग्रहं पाटलिपुत्रस्य विद्वत्सभायां परीक्षार्थं प्रस्तुत-वानित्यत्र किमाश्चर्यम्? श्रीयुधिष्ठरमीमांसको लिखितवान् यत् पाणिनेः किञ्चि-त्पूर्वमेव व्याडिसत्ता स्वीक्रियेत, तथा तत्कालः पाणिनीयव्याकरणरचनोपरान्तं मन्येत, तदा नौचित्यं किमपि वर्त्तते।

पाणिनेः लिङ्गानुशासनोपरि विचारेण प्रतीयते यत् तेन दार्शनिकी व्याख्या न विहिता। परं संग्रहे स्त्रीलिंग-पुंलिग-नपुंसकलिंगानां दार्शनिक-व्याख्याः विहिताः सन्ति : एतासां व्याख्यानां भाषावैज्ञानिकं महत्त्वं विद्यते। व्याडेः संग्रहग्रन्थः पर्याप्त प्रसिद्ध आसीत्। कथितमस्ति—

"संग्रहे नित्यपर्यायवाचिनो ग्रहणमिति इहापि तदेव। व्याडेश्च प्रामाण्यादिहापि तथैव सिद्धशब्द उपात्तः।"

एतेन स्पष्टमस्ति यत् शब्दस्य नित्यानित्यत्व-सम्बन्धे तस्य धारणा सापेक्षा-सीत्। श्रीसत्यकामवर्मणा लिखितम् —"निश्चितमेव स्वयं लुप्तोभवन्नपि स्वव्यापक-दृष्टिविक्षेपणदृष्ट्या व्याडिरद्वितीय आसीत्। तदानीं तत्समकालीन एव पाणिनिः सम्प्रति यावत् सुरक्षितो भूत्वा व्यापकं सम्मानं लब्ध्वापि स्वसदृशमेकमपि सूत्रकारं नोत्पादितवान्। वस्तुतः पाणिनिः संक्षिप्तोऽपि दुरूह आसीत्, यत्र व्याडिः विस्तृतः

---

१. वाक्यपद्धीयम् २।४७८-४८४।

जटिलोऽपि परवर्त्तिचिन्तनोपरि प्रभावत्रानभवत् ।"[1]

एतेनोद्धरणेन स्पष्टमस्ति यत् व्याडेः व्याकरणग्रन्थः पर्याप्तप्रसिद्ध आसीत् । एतस्य परिमाणं लक्षश्लोकसंख्यात्मकं कथितमस्ति ।

वररुचिः

व्याकरणशास्त्रस्य यशस्विप्रणेतृषु वररुचेः महत्त्वपूर्णं स्थानमस्ति । अस्यापि सम्बन्धः पाटलिपुत्रेण सह विद्यते । अयं चाचार्यवर्षस्य शिष्यः मन्यते । कथासरित्सागरे कथितमस्ति यत् यदायं शिष्यनन्दनिकटे गुरुदक्षिणार्थं स्वर्णमुद्रायै गतः, तदा राजा नन्दः दिवंगतो बभूव, सम्पूर्णराष्ट्रं शोकमग्नमासीत् ।

योगसिद्धीनां ज्ञातेन्द्रदत्तः कथयितुमारब्धवान् यदहमस्य मृतस्य राज्ञः शरीरे काय-शरीर-विद्यया प्रवेष्टुं शक्नोमि । वररुचिरर्थी भवतु, अहमस्मै धनं दास्यामि । मम पुनः परावर्त्तनं यावत् व्याडिः मम शरीर रक्षां करोतु । एवमुक्त्वेन्द्रदत्तः स्वविद्याप्रभावेण राज्ञोनन्दस्य शरीरे प्रविष्टवान्, येन राजा नन्दः पुनर्जीवितोऽभवत् । एकान्तदेवमन्दिरे इन्द्रदत्तशरीररक्षार्थं व्याडिरुपविष्टस्तथा वररुचिः राज्ञः समीपं धनयाचनार्थं प्राप्तः । राजभवने गत्वा वररुचिः राज्ञे आशीर्वादं ददौ तथा योगनन्दं राजानं गुरुदक्षिणायै एककोटिस्वर्णमुद्राणां याचनां कृतवान् । योगनन्दः शकटालनामकं पूर्वनन्दमंत्रिणमाज्ञप्तवान् यदस्मै ब्राह्मणाय एकस्वर्णमुद्राः राजकोषात् प्रदेयाः । मृतं राजानं शीघ्रमेव जीवितं वीक्ष्य तथा तदैव याचकं समुपस्थितं ज्ञात्वा मंत्री शकटालः शंकितो बभूव, यत् अवश्यमेवेदं परकाय-प्रवेश-विद्यायाः ज्ञातॄणां षडयन्त्रमस्ति । अत एवेदानीमीदृश उपायोऽपेक्षितोऽस्ति, येन राजास्मिन् शरीरेऽधिकदिनं यावत् तिष्ठेत् । यतोनन्दपुत्र इदानीं शिशुरस्ति । राज्यस्य बहवः शत्रवः सन्ति । अतोऽस्य कृत्रिमराजशरीरस्येदानीं रक्षावश्यकता वर्तते ।

एवं विचार्य मन्त्रिणादेशोदत्तोयत् राज्यस्य सर्वे शवाः तत्कालमेव दग्धाः भवेयुः । गुप्तचराः अन्विष्यान्विष्य शवान् दग्धुमारब्धवन्तः । प्रसङ्गेऽस्मिन्नेव देवालये रक्षितमिन्द्रदत्तशवमपि व्याडेरपहृत्य हठात् दग्धवन्तः । तदवसर एव व्याडिः रुदन् राज्ञः समक्षमुपस्थितः तथा रुदन् निवेदितवान् यत् प्राणेषु शेषेष्वपि योगसमाधौ स्थितं ब्राह्मणस्य शवमनाथशवमुक्त्वा तव भृत्याः दग्धवन्तः । एतच्छ्रुत्वा योगनन्दस्य (कृत्रिमस्य राज्ञः) विचित्रा दशाऽभूत् ।

इन्द्रदत्तस्य शवशरीरे दग्धे तदात्मा राज्ञः शरीरे स्थितोबभूव । महाबुद्धिमान् शकटालः तत्कालं वररुचये एककोटिस्वर्णमुद्राः दक्षिणारूपेण अददात् । अयं राजा वररुचिं स्वप्रधानमंत्रिणं नियुक्तवान् । शकटालं च शतपुत्रसहितमेकस्मिन्नन्धकूपे

---

१. संस्कृत व्याकरण का उद्भव और विकास, पृष्ठ १०३ ।

निपातितवान् । अन्धकूपेऽस्मिन् प्राणिनां रक्षार्थमल्पसक्तुकजले दीयेते स्म । तद्दानं तथाऽपर्याप्तमासीत्, यथैकव्यक्तेरपि जीवननिर्वाहोऽसम्भव आसीत् । अतएव क्रमशः शकटालस्य सर्वे पुत्राः स्वर्गताः । कालान्तरे वररुचिः शकटालमुद्धृतवान् तथा तं पुनाराज्ञो मंत्रिणं चकार । एतत्संदर्भे वररुचेः बुद्धिमत्तायाः अनेककथाः आयाताः । वररुचिः संसारविरक्तोभूत्वा तपोवने गतः तथा तत्र तपः प्रारब्धवान् । अनन्तरमसौ वदरिकाश्रमे गतः । तत्र तेन देव्याः भक्तिः कृता तथा योगानलद्वारा स्वशरीरं दग्धम् । यथा—

अथ स निविडभक्त्या तत्र देवीं शरण्यां—
शरणमुपगतोऽसौ मर्त्यभावं मुमुक्षुः ।
प्रकटितनिजमूर्त्तिः सापि तस्मै शशंस ;
स्वयमनलसमुत्थां धारणां देहमुक्त्यै ।
दग्ध्वा शरीरमथ धारणया तया तद् ,
दिव्यां गतिं वररुचिः स निजां प्रपेदे ।
विन्ध्याटवीभुवि ततः स च काणभूति—
रासीदभीप्सितगुणाढ्य - समागमोत्कः[१] ।

वररुचिः कात्यायनगोत्रीय आसीत् । अस्य पितुः नाम सोमदत्तः मातुश्च नाम यमुना आस्ताम् । अयं कौशाम्ब्यामजनि । अयं पाणिनिना सह पाटलिपुत्रेऽधीतवान् । उपवर्षस्य कन्यया कोशया सहास्य विवाहोऽभवत् ।

अवन्तिसुन्दरी कथासारे वर्हिन् कलाप्याः पुत्र्याः वर्णिन् कात्यायन्याः पुत्रो मतोऽस्ति । वररुचेः जन्म गोदावर्यास्तटे मतमस्ति । पश्चात्तेन व्याडिना, इन्द्रदत्तेन, उपवर्षेण च सह पाटलिपुत्रे विद्याऽधीता अन्यपरम्पराभिरपि ज्ञायते यत् वररुचिः पद्मनाभमिश्रादेकादशवंशपूर्वं जात आसीत् । वररुचेः वंशपरम्परा निम्नांकितास्ति—

१. वररुचिः
२. न्यासदत्तः (फणिभाष्यार्थतत्त्ववित्)
३. जयादित्यः (मीमांसकः)
४. श्रीपतिः (सांख्यशास्त्रविशारदः)
५. गुणेश्वरः (काव्यतत्त्ववेत्ता)
६. भानुमिश्रः (प्रसिद्धकविः)
७. हलायुधः (वेदशास्त्रार्थतत्त्ववित्)
८. श्रीदत्तः (धर्मशास्त्री)

---

१. कथासरित्सागर, प्रथमलम्बक, पंचमतरंग, पद्यसंख्या, १०७-१४२ ।

९. भवदत्तः (वेदान्ती)

१०. दामोदरः (काव्यालङ्कारकारकः)

११. पद्मनाभः (व्याकरणदर्शकारः)

अयं पद्मनाभः मैथिलवंशस्य संस्थापकोमन्यते। मिथिलायां वररुचेः सम्बन्धे कथैकापि प्रचलिता विद्यते, येन वररुचेः काव्यप्रतिभायाः परिज्ञानं भवति।

वररुचिनाम्नाऽनेकाचार्याणां नामनिर्देशः प्राप्यते। एष्वेकः याज्ञवल्क्य-पौत्रः कात्यायनपुत्रश्चापि वररुची वर्त्तते।

स्कन्दपुराणे लिखितमस्ति—

कात्यायनाभिधश्च यज्ञ-विद्याविचक्षणः,
पुत्रोवररुचिर्यस्य वभूव गुणसागरः[1]।

कात्यायनो वररुचिश्चाभिन्नो विद्यते। तस्य गोत्रनाम कात्यायनोवर्त्तते। व्यक्तिनाम च वररुचिरस्ति। पुरुषोत्तमदेवानुसारं कात्य-कात्यायन-पुनर्वसु-मेधाजित-वररुचय इमानि पञ्च नामानि वररुचेः सन्ति। चन्द्रगुप्तस्य कृष्णचरितनाटकस्य भूमिकायां वररुचिः कात्यायनश्च नामनी एकस्यैव जनस्य कथिते स्तः। तस्य च वार्तिककाररूपेण कविरूपेण च सदैव स्मरणं कृतं विद्यते। समुद्रगुप्तसमयः ख्रीष्टाव्दात् प्राक् चतुर्थशताब्द्याः पूर्ववर्ती न वर्त्तते। अतः पूर्वं वररुचेःनाम प्रसिद्धमभवत्। महाभाष्ये वाररुचकाव्यस्यापि नामायातमस्ति। पतञ्जलेः निर्देशेन वृत्तेऽस्मिन् संदेहो नास्ति, यत् वररुचेः किमपि काव्यमासीत्।

वार्तिकानां रचयित्रे कात्यायनाय विशेषणात्मकयोः द्वयोः नाम्नोः व्यवहार उप-लभ्यते—वार्त्तिककारः वाक्यकारश्च। द्वेऽपि नामनीमे महत्त्वपूर्णे स्तः। प्रथमनाम तद्रचनामूलकवस्तुपरकमस्ति, द्वितीयञ्च वार्त्तिकानां विभेदकाकारद्योतकं विद्यते।

वार्त्तिककारनाम्नः तुलनां वृत्तिकार-भाष्यकार-शब्दाभ्यां कर्त्तुं शक्यते, यत् रचनायाः विषयं वस्तु तत्त्वंच व्यनक्ति। वाक्यकारं सूत्रकार-पदकार-सदृशनाम्नां-समक्षं मन्तुं शक्यते। येन रचनायाः वस्तुनो वा आकृतिपरकस्वरूपस्य पार्थक्यं ज्ञायते।

श्रीयुधिष्ठिरमीमांसकः पञ्चानां कात्यायनानां निर्देशं कृतवान्। 'प्रज्ञापरि-शिष्टस्य रचयिता कात्यायनः आत्मानं कौशिकपक्षस्य शिष्यं मनुते। मीमांसक-दृष्ट्या वाजसनेहप्रातिसाख्यमपि अस्यैव कौशिकपक्षीयकात्यायनस्य रचनासीत्। श्रौतसूत्रादीनां रचनापि एतद्द्वारैव सम्पन्नासीत्। सम्भवतोऽयं कात्यायनः याज्ञव-ल्क्यस्य पुत्रोऽस्ति। वार्तिककारः कात्यायनः उक्तकात्यायनादभिन्नो वर्त्तते।

---

१. स्कन्द-पुराण, अ० १३१, श्लोक ४८।

'निरुक्तसमुच्चयस्य रचयिता कात्यायनः वार्तिककारकात्यायनादभिन्नः युधिष्ठिरमीमांसकेन मतोऽस्ति। परमुभयोरपि वंशस्यैक्येनास्माकमनुमानमस्ति यत् वार्त्तिककारकात्यायनः निरुक्तसमुच्चयस्य कर्त्तुरभिन्नो विद्यते।

वेबरः, मैक्समूलरः, गोल्डस्टुकरश्च वररुचिं प्राग्ज्ञदेशीयं प्राच्यदेशीयं वा मन्वते। तेषां तत्कथनाधाराः निम्नांकिताः सन्ति—

१. तथाकथितपाणिन्यालोचनम्।
२. प्राच्यपरम्परायाः पाणिनेः पूर्वकालादेवसमृद्धिः।
३. संज्ञादिप्रसंगे तस्य भिन्ना प्रवृत्तिः।
४. महानन्देनसह वररुचेः सम्बन्धः।

युधिष्ठिरमीमांसकः (प्रियतद्धिताः दाक्षिणात्याः) उक्तेराधारेण वररुचिं दाक्षिणात्यं स्वीकृतवान्। तत्कथनमस्ति यत् शुक्लयजुर्वेदस्य कात्यायनशाखायाः महाराष्ट्रेऽपि प्रचारोऽधिकोऽस्ति। विन्ध्यदक्षिणदिशि सद्भावात् महाराष्ट्रप्रदेशः दक्षिणः कथ्यतेस्म। परं विचारणयैतदुचितं प्रतीयते यत् कात्यायनगोत्रं दक्षिण-दिशः आसीत्। परं वार्तिककारकात्यायनस्य प्राच्यपौर्वात्यसंभावनाया न विप्रति-पत्तिर्जायते। दक्षिणगोत्रस्य धारके सत्यपि वार्तिककारस्य निवासः पूर्वस्यां भवितुं शक्यते।

समय-निर्धारणम्

वार्तिककारः कात्यायनः महापद्मनंदस्य समकालीनः खीष्टाब्दात् पूर्वं ४०० समीपे भवितुं शक्नोति। पाणिनिना सहास्य विरोधेऽङ्गीकृते उक्तसमयः स्वयमेव पुष्यति। कात्यायनः पाणिनेः दोषनिराकरणाय त्रुटिनिराकरणाय वा वार्तिकानां रचनां कृतवान्। मैक्समूलरः गोल्डस्टुकरः तथाऽन्ये विद्वांसः एतत्समयं खीष्टाब्दा-त्पूर्वं ३५० स्वीकृतवन्तः। भारतीयपरम्परायाः आलोकेऽपि कात्यायनः पाणिनेः परवर्ती मन्यते। पतञ्जलि-चरिते वररुचिद्वयस्य नामायातमस्ति। तयोरेकः वार्तिककारः कात्यायनोऽस्ति द्वितीयश्च पतञ्जलिशास्तः शिष्यः उज्जयिनी-निवासिन-श्चन्द्रगुप्तब्राह्मणस्य ज्येष्ठपुत्रो विद्यते। एतद्ग्रन्थानुसारं चन्द्रगुप्तः ब्रह्मराक्षसात् महाभाष्यमधीत्य गृहं परावर्त्तन् मार्गे चतुर्णां वर्णानां कन्यया विवाहमकरोत्। याभ्यः क्रमशः वररुचिः, विक्रमार्कः भट्टिः, भर्तृहरिश्च चत्वारः सुताः बभूवुः तेषु वररुचिरनेकविषयेषु समानाधिकारं रक्षन्नपि केवलं गणितशास्त्रोपरि ग्रंथं निर्मितवान्। अतोऽयं वररुचिरवश्यं मालववासी तथा विक्रमकालीनो विद्यते। वार्तिककारं वररुचिं कियन्तो विद्वांसः सपादशतद्विशतवर्षाणिपश्चात्वर्त्तिनं मन्वते। परं भारतीयसाहित्यस्य परम्परायां स पाणिनिकालीनः, पाणिनेरनति-

कालपश्चाद्वर्ती सम्भाव्यते । डा० कीलहार्नः लिखितवान्—"वार्त्तिककारस्योद्देश्यं केवलमेतावदेवास्ति यत् पाणिनिसूत्रोपरि सम्भावितशङ्कानामापत्तीनाञ्च विना-पक्षपूर्वाग्रहं च विवेचनं स्यात् तथा निराधाराक्षेपाणाञ्च खण्डनं विधाय तेषामौ-चित्यसिद्धिर्भवेत् । परन्तु यत्र केनापि प्रकारेण सूत्राणां समर्थनमौचित्यसिद्धिर्वा न सम्भाव्येत तत्र संशोधनं परिवर्तनं परिवर्द्धनं वा प्रस्तावयेत्[1] ।" एवंप्रकारेण कीलहार्नः वररुचिं पाणिनेरुत्तरवर्तिनं पतञ्जलेः पूर्ववर्तिनञ्च स्वीकृतवान् ।

वररुचेः वार्तिकानि

पाणिनिना ३९९५ सूत्राणि (३९८१ + १४ प्रत्याहारसूत्राणि) लिखितानि । तेषु १२५४ सूत्रेषु प्रायः ४२०० वार्तिकानि विरचितानि सन्ति । भाष्ये २६ सूत्रो-परि एकाधिकाचार्याणां वार्तिकानि मिलन्ति । कात्यायनस्य वार्तिकानि ७०९ सूत्राणां व्याख्यां कृतवन्ति सन्ति । ५३७ सूत्राणां सधाराः प्रस्ताविताः, अष्टौ सूत्राणि चानावश्यकानि सिद्धानि । एतेषां वार्तिकानां निम्नलिखितभागेषु विभागं कर्तुं शक्यते—

१. सूत्रव्याख्यानम् ।
२. सूत्रपदप्रयोजनम् ।
३. सूत्रपदप्रत्याख्यानम् ।
४. सूत्रप्रत्याख्यानम् ।
५. सूत्रप्रयोजनम् ।
६. सूत्रशंकोद्भावन-समाधानम् ।
७. शब्दार्थकथनम् ।
८. स्वतन्त्रार्थकथनम् ।

भाष्यकारः ६६ सूत्रेषु वार्तिककारस्य विरुद्धं सूत्रकारस्य समर्थनं कृतवान् । नात्र संदेहो यत् वार्तिककारः सूत्रकारस्य दोषान् दर्शयितुमैच्छत् । तत्समर्थनमौचित्य-सिद्धिं वा नैच्छत् । कात्यायनस्य कानिचिद्वार्तिकानि गद्ये कानिचिद्वार्त्तिकानि च पद्ये प्राप्यन्ते । क्वचित् यथारूपं क्वचिच्च स्वल्पपरिवर्त्तनेन सह पूर्णसूत्रस्य तथा प्रथमस्य सर्वाधिकमहत्त्वपूर्णशब्दस्य वा आवृत्तिर्मिलति । पाणिनेः शब्दावल्याः व्यवहारं कुर्वन्नपि सोऽच्ं स्वरं हलं व्यञ्जनम्, अकं समानाक्षरं, लटं भवन्तीं लुटम-द्यतनीमुक्तवान् । वार्तिककारस्यानया प्रक्रियया तस्यैन्द्रशाखायाः अनुयायित्वं सिद्ध्य-ति । महाभाष्ये कात्यायनभारद्वाजीयस्य, सौनागस्य, कुणरवाडवस्य, वाडवस्य, शौर्यभगवतः कुणिक्रोटीयस्य, गोनर्दीयस्य, शोणिकापुत्रस्य च वार्त्तिककाररूपे-

---

१. दी कत्यामन एण्ड पतञ्जलि पृ० ४२ ।

णोल्लेख आयातोऽस्ति । कात्यायनस्य वार्तिकानां संग्रहः प्रकाशितोऽस्ति। परं तं प्रामाणिकं न कथयितुं शक्यते । यतोऽस्य संग्रहस्याधारो महाभाष्यमस्ति । महाभाष्ये च बहूनि वार्तिकानि सूत्रवत् अव्याख्यातान्येव त्यक्तानि सन्ति। द्वितीयतथ्यमेतदस्ति यत् भाष्ये पतञ्जलेः स्ववार्तिकानामपि संख्या नाल्पीयस्यस्ति । कात्यायनवार्तिकेभ्यस्तेषां पृथक्करणं परमदुष्करमस्ति । वस्तुतः वार्तिकानां मूलपाठः भ्रष्टोऽस्ति । यतस्तेषां पाठ-संकलनं परमश्रमसाध्यमस्ति ।

पतञ्जलिः

कात्यायनात्प्रायःद्विशतद्वयवर्षानन्तरं पतञ्जलिनाऽष्टाध्याय्याउपरि महाभाष्यस्य रचना विहिता । असौ पाणिनि-सूत्रोपरि तदुपरि च लिखितानां व्याख्यानात्मकानां पूरकानाञ्च वार्तिकानां विवेचनं कृतवान् तथा यत्र तत्र स्वेष्टवाक्यानामपि समावेशं कृतवान् । नात्र संदेहो यत् पाणिनेरुपरि पतञ्जलेरसीमश्रद्धासीत् ।स पाणिनेः स्मरणं भगवदाचार्यमांगलिकसुहृदादिविशेषणैः सह कृतवान् । तस्य विश्वास आसीत् यत् भगवान् पाणिनिः पवित्रस्थाने समुपविश्य परमया शुचितया तन्मयतया च सूत्राणां प्रणयनं कृतवान् । एतेषु नैकमक्षरमधिकमस्ति न वा न्यूनम् । एतस्य सूत्राणि छन्दोबद्धप्रमाणानि सन्ति । निःसन्देहं पतञ्जलौ अद्वितीया प्रतिभा विद्वत्ता चास्ताम् । पाणिनि-कात्यायन-पतञ्जलीनां सम्मिलितप्रयास एव पाणिनीयव्याकरणं मन्यते । पतञ्जलिना महाभाष्यं प्रणीय पाणिनीयव्याकरणाय स्थिरता प्रौढता च प्रदत्ते ।

जीवन-परिचयः

महाभाष्यकारपतञ्जलेः जीवनविषये प्रामाणिकसामग्री अत्यल्पोपलब्धा विद्यते । रामभद्रदीक्षितः पतञ्जलिचरितं लिखितवान् । तस्मिन्नसौ तं शेषावतारं प्रमाणितवान् । एकदा विष्णुः शिवस्य ताण्डवंमनश्चक्षुर्भिः पश्यन् ध्यानस्थोजातः । तस्य स्थिरभारेण शेषनागः परमत्रासमवाप । अपगते ध्याने शेषः विष्णु प्रति तस्यापूर्वगुरुभारविषये पप्रच्छ । विष्णुना कृतं मनोरमं वर्णनमाकर्ण्य शेषमनस्यपि ताण्डवं द्रष्टुमिच्छोत्पन्ना । शेषप्रार्थनया विष्णुः आशीर्वादं दत्तवान् । भगवतो नीलकंठस्य कृपया पाणिनिः व्याकरणशास्त्रस्य, तथा कात्यायनः तत्र वार्तिकानां रचनां कृतवान् । तानि वार्तिकानि परमकठिनानि सन्ति । नीलकंठो भगवान् तेषां वार्तिकानां भाष्यकरणाय तुभ्यमादेशं दास्यति । तदा त्वं तदाज्ञया भूतलेऽवतीर्य चिदम्बरक्षेत्रं गमिष्यसि । तत्र च शिवताण्डवं द्रक्ष्यसि—

भोगीन्द्र तेषां भुविवार्तिकानामशेषविद्वज्जन-दुर्ग्रहाणाम्,
भाष्यं महत्कुर्वति भक्षरक्षी नियोक्ष्यते त्वां किल नीलकण्ठः ।

तदा नियोगात्तरुणेन्दुमौलेर्धरातले त्वं विहितावतारः,
चिदम्बर-क्षेत्रगतः पवित्रं नर्मोत्सवं द्रक्ष्यसिनृत्तमैशम् ।

तदनुसारं पृथ्वीतले योग्यमातुः चिन्तायां परिभ्रमन् एकस्मिन् तपोवने शेषः शोणिकानाम्नीं मुनिकन्यकामद्राक्षीत्, या पुत्रकामनयाऽखण्डतपश्चरन्त्यासीत् । तां वीक्ष्य शेषः मनसि मातृरूपां स्वीकृतवान् तथैकदा यदा सांशुमालिनेऽर्घ्यं प्रयच्छमानासीत्, तदा स तापसं रूपं धृत्वा तस्या अञ्जल्या नीचैः पतितः तथा यदैव सः प्रणामार्थं मातुः चरणयोः नतोऽभवत् सोत्थाप्योक्तवती यत्त्वं ममाञ्जलेः नीचैः पतितोऽस्त्यतः तव नाम पतञ्जलिर्भविष्यति ।

पतञ्जलिः बाल्यावस्थायां तपसे प्रस्थितः, तथाऽखण्डतपस्यया शिवं प्रसाद्य स चिदम्बरतीर्थं शिवनृत्यं दृष्टवान् । अत्रैव शिवः तम् पदशास्त्र-वार्त्तिकानां भाष्यकरणायादिष्टवान् । तदनुसारं पतञ्जलिः कात्यायनस्य वार्तिकानां भाष्यं लिखितवान् । इदं भाष्यमेतादृशं प्रसिद्धमभवत्, । यत् सहस्रसंख्यासु पण्डितास्तदन्तिकेऽध्ययनार्थमागच्छन् । पतञ्जलिः स्व-शिष्ययोर्मध्ये स्थूलमेकमावरणं दत्त्वा स्वशरीरं गुप्तं विधाय तान् सर्वान् सहैवाध्यापयितुमारब्धवान् । स फणपतिरूपेण सहस्रमुखैः सहैवाध्यापयतिस्म । अतएव स शिष्यान् प्रत्युवाच यद्यः कश्चनावरणमपवार्यान्तः द्रक्ष्यति, स ममकोपभाजनं भविष्यति । स वार्तिकेषु किञ्चन लघु कुर्वन् किञ्चन यथावत् गृह्णन् किञ्चन व्याख्यया समुज्ज्वलयन् अपाठयत् । एकदा छात्रास्तद्रहस्यं ज्ञातुं व्याकुला अभवन् । यत् प्रत्येकच्छात्रमेककालावच्छिन्ने पृथक्-पृथक् कथं पाठयति । उत्सुकतावशास्ते तदावरणमपावृतं कृतवन्तः । यवनिकायामपावृतायांते शेषतेजसा दग्धाः सन्तः कामवत् भस्मीभूताः । केवलमेकः शिष्यः, योजलमादातुं बहिर्गतवान्, सुरक्षितोऽभवत् । तमपि विनाज्ञां बहिर्गमनकारणादृषिः शप्तवान् राक्षसशरीरधारणाय । परंपश्चादनुनयात् प्रसन्नो भूत्वोक्तवान् यत् प्राप्तं विद्वांसं त्वं पच्धातोः निष्ठायांरूपंपृच्छेः । यश्च शुद्धं रूपं दद्यात् तं मम महाभाष्यं पाठयेः । तदा त्वं शापमुक्तो भविष्यसि । तदा पतञ्जलिस्ततस्तिरोहितोऽभवत् । स योगसूत्रेषु वैदिकशास्त्रेषु च वार्तिकानां रचनां कृतवान् । गोनर्ददेशे गत्वा जननीं शोणिकां प्रणतवान् । तथा तस्यां स्वर्गतायां स शेषरूपं प्राप्तवान् । लिखितमस्ति—

"सूत्राणि योगशास्त्रे वैद्यकशास्त्रे च वार्तिकानि ततः कृत्वा पतञ्जलिमुनिः प्रचारयामास जगदिदं ज्ञातुम् । गोनर्दाख्यं देशं प्राप्य नमस्कृत्य शोणिकां जननीं तस्यां त्रिदिवगतायां तस्थौ शेषः स्वयं स मुनिः[१] ।"

अतएव पतञ्जलेरनेकनामसु नागनाथ-वासुक्यहिपति-फणि-फणिभृतोऽपि सन्ति ।

---

१. पतञ्जलिचरितम्, ५-२५, २६ ।

एषु फणिभृतो वासुकेश्च व्यवहारोऽधिको विद्यते। अन्यशब्दकोशेभ्योऽपि तथ्यमिदं पुष्यति। एतन्नामातिरिक्तं गोनर्दीय-शोणिकापुत्र-चूर्णिकार-पदकार-नामभिरपि पतञ्जलिः स्मर्यते। प्रथमयोः द्वयोः नाम्नोरुल्लेखो वात्स्यायनस्य कामसूत्रेऽपि प्राप्यते। तत्रैतन्नामभ्यां मतान्युद्धृतानि सन्ति।[२] कतिपयकोशकारैरपि पतञ्जलेरेवापरपर्यायः अयं स्वीकृतः। नागेशः शोणिकापुत्रं भर्तृहरिं कैयटं गोनर्दीयं पतञ्जलेः पर्यायाणि नामानि मनुते। भर्तृहरेः कथनेन गोनर्दीयः भाष्यकारस्य पर्यायवाची सिद्ध्यति। वस्तुतः पतञ्जलिः गोनर्द—(गोंडा) निवास्यासीत्। अत एवासौ गोनर्दीयः कथ्यते स्म। लिखितमस्ति—

गोनर्दीयस्त्वाह किमस्याचार्यस्य दर्शनम्? एवं तावत् वर्णयति-वस्त्रान्तरवसनान्तरा इत्येवमर्थं बहुव्रीहिग्रहणे पठितव्यम्। तच्चासति प्रयोजने अशक्यमंतरंगो विधिर्बहुव्रीहिणा बाधितुम्। तादर्थ्यं वा प्रतिपत्तुम्। इत्येतेनासंप्रत्ययेनोक्तमुपसर्जनप्रतिषेधेनाप्येतत् सिद्धमिति[३]।"

भर्तृहरिः एतत्सर्वं 'न बहुव्रीहौ' (पा० १।१।२१) इति प्रसङ्गे लिखितवान् अस्मिन् गोनर्दीय—भाष्यकाराविति विशेषकनामनी प्रयुक्तेस्तः। अतएव गोनर्दीयः भाष्यकारश्चैक एव प्रतीयेते। अतः गोनर्दीयः पतञ्जलेरभिन्नोऽस्ति। नात्र संदेहोयत् भाष्यकारस्य सम्बन्धः व्याकरणस्य पूर्वशाखया सहास्ति।

पाणिनेः मातुर्नाम गोणिका आसीत्। अतः गोणिकापुत्र रूपेणमहाभाष्ये (१।४।५१) गोणिकापुत्रस्योल्लेख आयातोऽस्ति। यथा पाणिनिः दाक्षीपुत्रः कथितोऽस्ति, तथैव भाष्यकारः गोणिकापुत्रो व्यवहृतो विद्यते। भाष्यकारः समन्वयं कुर्वन् 'उभयथागोणिकापुत्रः' द्वारा स्वाभिमतं प्रकाशितवान्। अतो नात्र संदेहोयत् गोणिकापुत्रनाम पतञ्जलिकृते प्रयुक्तमस्ति।

'पदकार'-नामापि पतञ्जलेरनेकस्थानेषु प्राप्यते। स्कन्दस्वामि-उवट-आत्मानन्द भामह-क्षीरस्वामि-प्रभृतिभिरपि, एतन्नाम्नैव, पतञ्जलिः स्मृतोऽस्ति। वल्लभदेवः पदस्यार्थं पतञ्जलिरचितं महाभाष्यमकार्षीत्।[३]

चूर्णिकार—पदस्यापि प्रयोगः भर्तृहरि-स्कन्दस्वामि-प्रभृतिभिः विहितो विद्यते[४]। इति सिंहेन महाभाष्यनाम चूर्णि कथितम्। अतः पतञ्जलेः चूर्णिकार-नाम्नि नापत्तिर्वर्तते।

---

१. वात्स्यायन कामसूत्रम्, १।१।१५-१६, ४।२।२५, १।५।२५।
२. त्रिपदी भर्तृहरिटीका १।१।५-२१।
३. संस्कृतव्याकरण शास्त्रकाइतिहास, पृ० २३७।
४. वही, पृ० ३३५।

एवं प्रकारेण पतञ्जलेः सर्वाणि नामानि सप्रयोजनानि सन्ति। केवलं पतञ्जलि-नामैव वैयक्तिकं व्यक्तिवाचकं वास्ते।

समय-निर्धारणम्

महाभाष्ये 'इह पुष्यमित्रं याजयामः' प्रयोग आयातोऽस्ति। एतेन प्रयोगेण प्रमाणितमस्ति यत् भाष्यकारः अपूर्णघटनोद्धरणाय वर्त्तमानकालस्य प्रयोगमकार्षीत्। एतेनैतदपि सिद्ध्यति यत् पुष्यमित्रस्य यज्ञस्य पतञ्जलिः स्वयं ऋत्विगभूत्। पुष्य-मित्रः अश्वमेधयज्ञद्वयमकरोत्। प्रथमं यज्ञं यवनदेशीयमाक्रमणं पराजित्य स्वमहद्वि-जयोपलक्ष्ये तथा द्वितीयमश्वमेधयज्ञमपि कस्यचन विजयस्योपलक्ष्ये एव कृतवान्। अस्य द्वितीययज्ञस्यापि पतञ्जलिरेव पुरोधा अभूत्। अयोध्यायाः एकस्य मन्दिरस्य शिलालेखे 'द्विरश्वमेधयाजी' पुष्पमित्रः कथितोऽस्ति। अस्मिन्नेवाभिलेखे च कोशल-प्रदेशस्य राज्ञो धनदेवस्य चर्चा विद्यते, यः तस्य वंशस्य षष्ठे संततिक्रमे आसीत्। पुष्यमित्रस्य पुत्रोऽग्निमित्रो विदिशायाः गोप्ता राज्यपालो वासीत्। वीरसेनश्च नर्मदाप्रदेशस्य शासकोऽभवत्। तेन पाटलिपुत्रे, अयोध्यायां, विदिशायाञ्च राजधान्यः स्थापिता आसन्। पतञ्जलेरनुसारमेका सभा शासनकार्ये पुष्यमित्रस्य सहयोगिन्यासीत्। स मगधस्य पार्श्ववर्तिनः समस्तप्रदेशान् स्वाधीनान् चकार। स्व-साम्राज्यस्य पश्चिमप्रदेशेषु दृढशासनस्थापनाभिप्रायेणासौ प्रमुखनगरीं विदिशां स्वद्वितीयां राजधानीमकल्पयत्। अग्निमित्रमसौ स्वप्रतिनिधिरूपेण अवन्त्याः शासकं नियुक्तवान्।

मौर्यवंशस्यान्तः खीष्टाब्दात्पूर्वं १८५-१८४ समयेऽभूत्। इयमेव तिथिः पुष्य-मित्रस्य सिंहासनारोहणस्यापि वर्त्तते। मेरुतुङ्गानुसारं पुष्यमित्रः त्रिंशद्वर्षाणि यावत् शासनं कृतवान्। पुराणानुसारञ्च षट्त्रिंशद्वर्षाणि यावत्। इतिहासकाराणामपि मतमस्ति यत् खीष्टाब्दात् पूर्वं १४८ वर्षे पुष्यमित्रः स्वर्गं जगाम। अग्निमित्रश्च तदा शासकोऽभूत्। पतञ्जलिः पुष्यमित्रस्य यज्ञं कारितवान्। अतएव पतञ्जलेः समयः पुष्यमित्रस्य शासनकालएवास्ति।

पतञ्जलिः महाभाष्ये "अनुशोणं पाटलिपुत्रम्" तथा "मौर्यैर्हिरण्यार्थिभिरर्च्चाः प्रकल्पिताः" प्रयोगाः विहिताः। अतएव पतञ्जलेः कालः खीष्टाब्दात् प्राक् १६० अथवा १५० संभाव्यते।

निश्चयतः पाटलिपुत्रं कुसुमपुरंवा पतंजलिकालं यावत् मौर्यवंशस्योत्थानपतने अपश्यत्। अधिकं सम्भवमस्ति यत् पतञ्जलिः अन्तिमस्यान्तिमपूर्वस्य वा मौर्य-राजस्य समये समुत्पन्नोऽभविष्यत्। शाक्यमुनेः स परिचित आसीत्। मौर्यैः विशेषतः सम्राजाऽशोकेन च प्रचलितानामर्चानां परिज्ञातासावासीत्। चन्द्रगुप्तस्यापि सभामसौ जानाति स्म, या राज्य-शासनस्य सर्वाधिका श्रेष्ठा वृहत्सभासीत्। पुष्यमित्रसभा स्वभावतः तत्प्रसङ्ग एव पुष्यमित्रस्य राज्यसभायाः रूपेण ज्ञायते स्म। अशोकस्य

शिलालेखैः अशोकस्य समयः निश्चितोऽस्ति । भाष्यकारः चन्द्रगुप्तस्य पुष्यमित्रस्य च सभया सुपरिचितोऽस्ति । अतएव संक्षेपेण पतञ्जलेः समयः ख्रीष्टाब्दात् पूर्वं १६५ वर्षसमीपे सिद्ध्यति ।

पाटलिपुत्रं पतञ्जलिश्च

महाभाष्ये पाटलिपुत्रस्य निर्देश आयातोऽस्ति । विशाखदत्तस्य मुद्राराक्षसे चन्द्रगुप्तमौर्यकाले कुसुमपुरस्य पाटलिपुत्रस्य वा गंगातटे वसतिः प्रसिद्धा वर्त्तते । पतञ्जलिः पाटलिपुत्रे पुष्यमित्रेण यज्ञं कारितवान् । अतः पतञ्जलेः पाटलिपुत्रेण सह सम्बन्धः स्वाभाविकोऽस्ति । ३।३।१३६ सूत्रस्य भाष्ये–'योऽयमध्वागत आपाटलिपुत्रात्तस्य यत्परं साकेतात्' लिखितेन स्पष्टमस्ति यत् भाष्यकारः साकेत-पाटलिपुत्रयोः मार्गपार्श्वेऽवश्यं न्यवसत् । 'मथुरायाः पाटलिपुत्रं पूर्वम्' उल्लेखेनापि पाटलिपुत्रस्य ज्ञानं भवति ।' अनुशोणं पाटलिपुत्रम्' (२।१।१६) पाटलिपुत्रस्य व्याख्यानी सुकोशलेति । पाटलिपुत्रं चाप्यवयवश आचष्टे ईदृशा अस्य प्राकाराइति ४।३।६६ प्रभृतिव्याख्यानेषु स्पष्टमस्ति यत् पाटलिपुत्रेण सह तस्य घनिष्टसंबंध-आसीत् । तस्य समये पाटलिपुत्रं शोणभद्रतटे स्थितमासीत् । भाष्योदाहरणैरिदं स्पष्टमस्ति यत् पतञ्जलिः याजकस्थितो दीर्घकालं यावत् पाटलिपुत्रे आसीत् । तत्र च छात्रान् व्याकरणं पाठयति स्म । यज्ञप्रसंगे तेनैतदपि स्पष्टं कृतमस्ति यत् यज्धातोः प्रयोगः केवलं यज्ञकुण्डे आहुतिदानमेव नास्ति । त्यागोऽप्यस्यार्थो विद्यते । पुष्यमित्रस्य यज्ञे द्रव्यस्य त्यागं पुष्यमित्रः करोति । याजकाः केवलं तस्य प्रेरकाः सन्ति । लिखितमस्ति—

''यज्यादिषु चाविपर्यासो वक्तव्यः । पुष्यमित्रो यजते, याजकाः याजयन्ति । तत्र भवितव्यम्''–पुष्यमित्रो याजयते, याजकाः यजन्तीति यज्यादिषु चाविपर्यासो वक्तव्यः । नानाक्रियाणां यज्यर्थत्वात् । नानाक्रियाः यजेरर्थः । नावश्यं यजि हविःप्रक्षेपण एव वर्तते । किं तर्हि त्यागेऽपि वर्तते । अह्नौ यजत इत्युच्यते । यः सुष्ठु-त्यपि करोति । तं च पुष्यमित्रः करोति, याजकाः प्रयोजयन्ति[1] ।

एतेनोद्धरणेन स्पष्टमस्ति यत् भाष्यकारः पाटलिपुत्रेऽवश्यमेव यज्ञं कारितवान् । पुष्यमित्रः स्वराज्ये अयोध्यां विदिशां, जालंधरं शाकलञ्चापि सम्मिलितं कृतवान् । परमस्य राजधानी पाटलिपुत्रमेवाभवत् । अतएव संक्षेपेणैतावदेव वक्तुं शक्यते यत् पतञ्जलिः पुष्यमित्रसभायां पाटलिपुत्रे परीक्षितोऽभवत् । पुष्यमित्राच्च तेन मान्यता प्राप्ता ।

पतञ्जलेर्महत्त्वम्

व्याकरणशास्त्रस्येतिहासे नवानामुपलब्धीनां स्रष्टा नवोपादानानां च जन्म-

---

१. ३।१।२६, पृ० ७४ ।

दाता वहुज्ञो मेधावी वैयाकरणः पतञ्जलिरस्ति । पाणिनि-पतञ्जल्योर्मध्येऽनेके वैयाकरणा आगतास्तथा कात्यायनं परित्यज्य सर्वे कर्त्तव्यनिर्वाहं विधाय गताः। परं पाणिनेः महतो न्यासस्य पूर्णसफलतयाग्रेप्रेषणस्य श्रेयः पतञ्जलेरस्ति । पतञ्जलिः महान् विचारको मनस्वी चासीत् । स व्याकरणक्षेत्रे नवयुगनिर्माणं विधाय स्वासामान्यप्रतिभायाः प्रभावं परवर्तिसंततिक्रमेभ्यस्त्यक्तवान् । सः पाणिनीयव्याकरणस्याद्वितीयो व्याख्याता कथ्यते । तस्य ज्ञानं मौलिकविचारश्च तमुच्चकोटेश्चिन्तकं प्रमाणयतः । स पाणिनेः कट्टुरालोचकोऽप्यासीत् । एतादृशोऽसौ निर्भीकपण्डितः विद्वांश्चास्ति । वस्तुतः पाणिनेरेवमुन्नतेः कारणं पतञ्जलिरेवास्ति । व्याकरणेन सह सांख्य-योग-न्यायायुर्वेद-कोश-रसायन काव्यादिविषयाणां ज्ञातापि पतञ्जलिरासीत् । एतादृशं सर्वांगीणव्यक्तित्वं वाङ्मये नान्यदस्ति । अतएव पतञ्जलेर्महत्त्वं युगयुगान्तरपर्यन्तं नवयुगनिर्मातृदृष्ट्या विद्यमानं भविष्यति ।

रचना

पतञ्जलिरनेकविषयाणामधिकारी विद्वानासीत् । एतन्नाम्ना महानन्दकाव्यम्, चरकपरिष्करणग्रन्थः, कोशग्रन्थः, सांख्यशास्त्रम्, रसशास्त्रम्, लौहशास्त्रञ्च प्राप्यन्ते । सम्प्रति पतञ्जलि-प्रणीतास्त्रय एव ग्रन्थाः उपलभ्यन्ते—

१. सामवेदीयनिदानसूत्रम् ।

२. पतञ्जलियोगसूत्रम् ।

३. महाभाष्यम् ।

महाभाष्यम्

महभाष्यमत्यन्तं स्पष्टं सरलमेवं प्रसादगुणयुक्तशैल्यां लिखितमस्ति । भर्तृहरिः 'अलब्धलाभे गाम्भीर्यादुत्तान इव सौष्ठवात्' कथितवान् ! भाष्ये लम्बकायसमासानां शिष्टशब्दावल्याः वा प्रयोगो नास्ति । दैनन्दिनव्यवहारेषु आगच्छतां शब्दानां प्रयोगा अप्यत्यल्पाः सन्ति । शास्त्रीयग्रन्थत्वात् पारिभाषिकाः शास्त्रीयाश्च शब्दाः अधिकाः सन्ति । तथापि, अस्मिन् निसर्गसुन्दरी, सुपरिचिता च शब्दावली प्राप्यते । भाष्यस्य प्रतिपादनशैल्यपि मनोरमा विद्यते । दृष्टान्तानामुपमानानाञ्च प्रयोगः सर्वत्र प्राप्यते । पाणिनेरनुकूलस्येष्टप्रयोगसाधकस्यानिष्टनिवारकस्यार्थस्यावाप्तिः पतञ्जलेरुद्देश्यमासीत् । अतएव यत्र क्वचन सूत्रेण कार्यसिद्धिर्न विलोकिता तत्र तेन सूत्रस्य योगविभागं विधाय पूर्वविप्रतिषेधेन कार्यं कृतम् । यदि क्वचित् सूत्रेणानिष्ट प्रयोगसिद्धिर्दृष्टा, तदा तां शिष्टासम्मतामुक्त्वाऽनभिधानं कथयित्वाऽसौ निवारितवान् । स्वस्यैतत्कथनस्य पुष्ट्यै तेन पूर्वाचार्याणां वार्तिकान्युद्धृतानि । यत्र तस्यै कस्याप्याचार्यस्य नामोल्लेखो नोचितः प्रतीतः, तत्रासौ—''अपर आहुः' अथवा

---

१. ३।१।२६, पृ० ४४ ।

'अपर आह'—द्वारा तन्मतं प्रतिपादितवान्। वार्तिकारद्वारा सूत्रस्य सूत्रस्थस्य कस्यचन पदस्य च प्रत्याख्याने जातेऽसौ यथासम्भवं सूत्रकारस्य पक्षं गृहीतवान्। प्रायः तद्दृष्टिः सूत्रकारं वार्तिककारं च प्रति आदरयुक्तासीत्। परं सूत्रकारस्य समर्थनायावश्यकतानुसारं वार्तिककारस्य खण्डनमपि कृतवानस्ति। केवलं स्थानद्वये 'एतदेकमाचार्यस्य मङ्गलार्थंमृष्यताम्' तथा 'प्रमादकृतमेतदाचार्यस्य शक्यमकर्तुम्' कथयित्वा स सूत्रकारस्य दोषं दर्शितवान्। सामान्यतः सूत्रकारं प्रति तस्य मनसि अपारश्रद्धा विद्यते।

महाभाष्ये व्यङ्ग्यात्मकशैल्या अपि व्यवहारो वर्त्तते। अत्र द्वित्राण्युदाहरणानि दीयन्ते....

१. अनुगृहीताः स्मो यैरस्माभिः प्रथमैकवचनमास्थाय गोशुनोः प्रतिषेधो न वक्तव्यो भवति[१]।

२. योहि तत्पुरुषमारभते न तस्य दण्डवारितो बहुव्रीहिः।

३. अन्यद्भवान् पृष्टोऽन्यदाचष्टे। आम्रान् पृष्टः कोविदारानाचष्टे।[२]

४. सैषा महती वंशस्तम्बाल्लट्वानुकृष्यते।[३]

महाभाष्यं पञ्चाशीति-आह्निकेषु विभाजितमस्ति। येषां विश्लेषणात्मक-समीक्षयेदं स्पष्टं भवति यत् महाभाष्य-रचना, विषय-प्रतिपादन-शैली, तस्याह्निकात्मक विभाजनं परं स्वाभाविकानि सन्ति। महाभाष्यस्य विषयाणां काण्डेष्वध्यायेषु अधिकरणेषु च विभाजनं नास्ति। व्याख्यानात्मकग्रन्थत्वात् अष्टाध्यायी योजनैव महाभाष्यस्य योजना विद्यते। महाभाष्यस्याध्ययने नैवं प्रतीयते यत् ग्रन्थएषः पञ्चाशीतिदिवसेषु समाप्त आसीत्। पतञ्जलिः स्वपूर्ववर्त्तिनां समस्तव्याकरण-ग्रन्थानां समस्त-लौकिक-वैदिक-प्रयोगाणां च सूक्ष्मानुशीलनानन्तरं महाभाष्यस्य प्रारम्भं कृतवान्। अत एव नास्मिन् व्याकरणस्य कोऽपि विषयः त्यक्तोऽस्ति। भाष्यस्य विषयनिरूपणपद्धतिः परमसरला सम्भाषणात्मिका चास्ति। कठिनविषयाणां प्रारम्भे इदमिह सम्प्रधार्यम्—सदृशवाक्यैः पाठकाः सावधानाः क्रियन्ते। पूर्वपक्षस्य स्थापना निष्पक्षतापूर्विका दृश्यते। तदनन्तरं 'विषमः उपन्यासः' सदृशैः वाक्यैः उत्तरपक्षः स्थाप्यते। मध्ये 'किं वक्तव्यमेतत् कथमनुच्यमानं गंस्यते' अथवा 'अस्तिप्रयोजनमेतत्' 'कथंतर्हि' सदृशैः संवादात्मकवाक्यैः पाठकानां ध्यानानि आकृष्यन्ते। पूर्वपक्षोत्तरपक्षयोः निरूपणानन्तरं 'यथादोषस्तथास्तु—उक्त्वा निर्णयः पाठकसापेक्षस्त्यज्यते। एवं पतञ्जलिः महाभाष्ये विषयप्रतिपादनं परं स्पष्टं करोति।

---

१. महाभाष्यम्, आ० २, पृ० ४४।

२. १।२।४५, पृ० ५३१।

३. आ० २, पृ० ५२।

उपमानैः दृष्टान्तैश्च विषयस्पष्टीकरणं परं सुन्दरं करोति। अत्र पतञ्जलेः कानिचनोपमानवाक्यानि प्रस्तूयन्ते—

१. "यदि पुनरिमे वर्णाः शकुनिवत् स्युः। शकुनय आशुगामित्वात् पुरस्तादुत्पतिताः पश्चात् दृश्यन्ते।[1]

२. "यदि पुनरिमे वर्णाः आदित्यवत्स्युः तद्यथा एक आदित्यो नैकाधिकरणस्थो युगपद्देशपृथक्त्वेपूपलभ्यते[2]।"

३. "कथं पुनरसन्नाम लिङ्गं शक्यं द्रष्टुम्? मृगतृष्णावत् तद्यथा मृगास्तृपिता अयोधाराः पश्यन्ति न च ताः सन्ति। गन्धर्वनगराणि यथा दूरतो दृश्यन्ते, उपसृत्य च नोपलभ्यन्ते, तद्वत् खट्वावृक्षयोः सल्लिङ्गं नोपलभ्यते। यथा वस्त्रान्तर्हितानि द्रव्याणि नोपलभ्यन्ते, तद्वत्खट्वावृक्षयोः सल्लिङ्गंनोपलभ्यते।

महाभाष्यकारः ध्वनि-शब्द-स्फाटोदीनां विस्तरेण विचारं कृतवान्। शब्दो नित्यः। अर्थस्य तन्नित्यशब्दस्यैव भवति। अस्य नित्यशब्दस्यैव स्फोटसंज्ञास्ति। स्फोटस्य नोत्पत्तिर्भवति, नच विनाशोजायते। उच्चारणकाले ध्वनिद्वारा तन्नित्यस्फोटरूपि-शब्दस्य प्रकाशनमात्रं भवति। स एवश्रोतुः मनसि अर्थबोधं कारयति। अनया दृष्ट्या शब्दस्य भेदद्वयं कर्त्तुं शक्यते—नित्यः कार्यश्च। स्फोटरूपी शब्दः नित्योऽस्ति, ध्वनिरूपी शब्दश्च कार्यः उत्पाद्यो वा। भाष्यकारः स्फोटं ध्वनिञ्च शब्दानां रूपद्वयं स्वीकृतवान्, शब्दार्थयो; सम्बन्धञ्च नित्यममन्यत। शब्दस्य नित्यत्वात् एव वर्णा अपि कूटस्थाः, अविचालिनः, उपजनाः, विकाररहिताश्चस्वीकृताः। कालव्यवसायकारणाच्च भिन्न-भिन्नाः दृश्यमानाः वर्णाः एकात्मकाः सन्तोऽपि भिन्नाः सन्ति। यथा शीघ्रोड्डयनशीलः पक्षी एकस्मिन्क्षणे एकस्थानेऽन्यस्मिन् क्षणेऽन्यस्थाने विलोक्यते,। अथवा यथा एकसूर्यः अनेकाधिकरणस्थत्वेऽपि एकस्मिन्नेव क्षणे पृथक्-पृथक् स्थानेपु दृश्यते, तथैवैकोवर्णः स्थानभेदात् भिन्नो न भवति। वस्तुतः शब्दःश्रोत्रप्राप्यः, बुद्धिग्राह्यः, ध्वनिप्रकाश्यः आकाश-वास्तव्यः विशिष्टतत्त्वमस्ति। आकाशस्यैकत्वात् शब्दोऽप्येकः। परमाकाशदेशानामनेकत्वात् वर्णोऽनेको विद्यते।

व्यवहारगतदृष्टा शब्दाः चतुर्विधाः भवन्ति—

१. जातिशब्दः।

२. गुणशब्दः।

३. क्रियाशब्दः।

४. यदृच्छाशब्दः।

---

१. आ; पृ० ५२।

२. आ० २, पृ० ४१।

यदृच्छाशब्दानामन्तर्भावः यदि क्रियाशब्देषु स्वीक्रियते, तदा त्रिविधा एव शब्दाः तिष्ठन्ति । एवं महाभाष्ये शब्दस्य नित्यता कार्यता च विस्तरेण वर्णिते स्तः । निःसन्देहं पतञ्जलिना स्वमहाभाष्यद्वारा व्याकरण-शास्त्रस्य महत्त्वपूर्णा सेवाऽकारि ।

अनुप्रेक्षणम्

एवं पाटलिपुत्रे शास्त्रकाराणामथवा शास्त्रकारकृतीनां परीक्षाऽभवत् । विद्वांसश्च यथेष्टं सम्मानिताः अभूवन् । महाभाष्येण चन्द्रगुप्तसभायाः पाटलिपुत्र-सभायाश्च निर्देशः प्राप्यते । नात्रसंदेहोयत् प्राचीनभारते पाटलिपुत्रे विदुषां परीक्षाऽभवत्, अतएव च विद्वांसः यशोऽर्जनं कुर्वन्तिस्म । पाणिनेः—'सभाराजा मनुष्यपूर्वा' (२।४।२३ सूत्रद्वारा राजसभानिर्देशः प्राप्यते । एतेन निर्देशेनैतद्ध्वन्यते यत् नन्द-राजसमयेऽपि पाटलिपुत्रे विद्वत्सभा विद्यमानासीत् या विद्यासमारोहं विद्वत्सम्मेलनं च करोतिस्म । नन्दात्पूर्वमपि मिथिलायां जनकस्य समीपे एतादृशी सभाऽऽसीत्-यस्यां कुरोः पाञ्चालस्य च पण्डिता एकदा आमन्त्रिता अभवन् । अस्यामेव प्राचीनपरम्परायां पाटलिपुत्रस्योपयोगिनी सभा कार्यं करोतिस्म । यस्याःप्रभावः यूनानी राजदूतस्य यूनानयात्रिणां च मनःसु आसीत् । दियोदारः लिखितवान् यत् विद्वासः-स्वसेवाभ्यः बहुमूल्यपुरस्कारं प्रतिष्ठाञ्च प्राप्नुवन्तिस्म । निःसन्देहं पाटलिपुत्रस्य राजसभानां यशः समस्तदेशे व्याप्तमासीत् ।

—नेमिचन्द्र शास्त्री

"तान्त्रिकाणां मते शब्दार्थसृष्टिविमर्शः"

विद्यावाचस्पतिना श्रीरङ्गनाथपाठकेन सङ्कलितः

तान्त्रिकाणां मते इयं सृष्टिः ब्रह्मणः परिणामभूता। सा सृष्टिः द्वेधा—अर्थमयी शब्दमयी चेति। सा च द्विविधापि—समकालीनोत्पत्तिका, समकालीनाऽभिवृद्धिशालिनी च। यथा बीजादङ्कुरस्तच्छाया च। तत्र च छायादर्शनेन वृक्षस्यानुमितिः अनुभवसिद्धास्ति। सा चानुमितिः छायायां वृक्षसमानाकारत्वं वृक्षाविनाभावं च विना अनुपपन्नैवेति तद्‌द्वयमपि तत्र कल्पनीयमेव। तथैव शब्दोऽपि अर्थाऽविनाभूतः, अर्थज्ञानजनकज्ञानविषयकत्वात्, 'वागर्थाविव सम्पृक्तौ' इत्याद्यभियुक्तोक्तेश्च। तथाऽर्थसमानाकारोऽपि। तथाहिः—

यावन्तः शब्दे अवयवाः तावन्त एव अर्थे तज्ज्ञाने चाऽभ्युपेयाः। यथा 'चैत्रः तण्डुलं पचति' इत्यत्र चैत्रपदं सुप्रत्ययः, तण्डुलपदम् अम् प्रत्ययः, पच्धातुः तिप् प्रत्ययश्चेति षडवयवात्मकस्य शब्दसमूहस्य चैत्रः कर्तृत्वं तण्डुलः कर्मत्वम् तेजः संयोगः कृतिश्चेति विशकलिताः षडर्थाः भवन्ति। तेषाञ्च परस्परसमभिव्याहारस्य तु परस्परसम्बन्धविशेषोऽर्थः।

तत्तदितरव्यावृत्तिर्वाक्यार्थ इत्यपि केचिद् ब्रुवन्ति। एवं तत्तज्ज्ञानमपि षट्पदार्थान् तत्सम्बन्धांश्च विषयीकुर्वत् तत्समयाकारं भवति अन्यथा ज्ञानानां परस्परं वैलक्षण्यं नोपपद्येत। अन्तःकरणपरिणामविशेषरूपे ज्ञाने तत्तदाकारत्वेन परिणतत्वकल्पनसम्भवाच्च। अतएव 'चैत्रः तण्डुलं पचति, इत्याकारकं ज्ञानम्, इत्येव सकलतान्त्रिकाणां निराकारवादिनामपि व्यवहारः। अनयोः शब्दार्थसृष्ट्योर्ज्ञानजनकं तु मन एव। तच्च शब्दं श्रोत्रेन्द्रियद्वारा गृह्णाति, अर्थन्तु कञ्चन साक्षात् कञ्चन चक्षुरादिद्वारेति विशेषः। ते च द्वे अपि सृष्टी—स्थूल, सूक्ष्म, सूक्ष्मतर, सूक्ष्मतमभेदात् प्रत्येकं चतुर्विधम्। श्रोत्रमनसोऽस्तु अर्थान्तरपाति चातुर्विध्यम्। एवञ्च—स्थूलश्रोत्रेण स्थूलशब्दश्रवणात् स्थूलार्थस्य स्थूलमनसाज्ञानम्, एवं सूक्ष्मश्रोत्रेण सूक्ष्मशब्दश्रवणात् सूक्ष्ममनसाज्ञानम्। एवं सूक्ष्मतरसूक्ष्मतमादिविषयेऽपि बोध्यम्।

श्रोत्रमनसोः सूक्ष्मत्वादिकस्य ज्ञानं तु शास्त्राभ्यासयोगाभ्यासादिनैव भवतीति स्पष्टम् विवेचितं योगदर्शने—'निर्विचारवैशारद्येऽध्यात्मप्रसादः' 'ऋतम्भरा तत्र प्रज्ञा' इति सूत्रयोः भाष्ये। अतएव श्रुतिरपि उद्घोषयतिः—

'चत्वारि वाक्परिमिता पदानि
तानि विदुर्ब्राह्मण ये मनीषिण।
गुहा त्रीणि निहिता नेङ्गयन्ति
तुरीयं वाचो मनुष्या वदन्ति' ॥ इति

तेषाञ्च नामानि—वैखरी (स्थूला) मध्यमा (सूक्ष्मा) पश्यन्ती (सूक्ष्मतरा) परा (सूक्ष्मतमा)। श्रुतौ तुरीयपदस्य वैखर्यर्थः। सृष्टिक्रमस्यैव तत्राभिप्रेतत्वात्। एतस्य शब्दचतुष्टयस्य वाच्या अर्थाः अपि स्थूल—सूक्ष्मसूक्ष्मतर सूक्ष्मतमभेदेन चतुर्विधा भवन्ति। तथाहि—मस्तकाद्यवयवेन्द्रियदशकशालित्वं स्थूलजगदादिव्यक्तौ तथा सद्यो जातशिशौ पिपीलिकादावपि अस्तीत्यविवादम्। विशेषस्तु इयानेव-यत्-स्थूला अवयवाः स्थूले, अल्पास्त्वल्पे। एवञ्च वैखरीरूपघटपदवाच्यापेक्षया मध्यमादि पदवाच्याः घटाः सूक्ष्म-सूक्ष्मतर-सूक्ष्मतमाः भवन्तीति स्वयम् स्वयुक्तिभिरूहनीयाः।

ते च पदार्थाः सङ्कोचमञ्चन्तः केचिदस्पष्टनिखिलावयवकाः, केचित्तु सङ्कुचज्जलूकाकमठादिवदस्पष्ट—किञ्चिदवयवका अपि अवयवन्यूाधिकभावेन परिमाणभेदेऽपि द्रव्याभेदस्य मीमांसकादिभिरङ्गीकारात् इति। एतेषां चतुर्णां वाचकानां चतुर्भ्यो वाच्येभ्यः भेदाः अपि चत्वारः कल्पिताः स्थूलादिरीत्या चतुर्विधा बोध्याः।

सृष्टिचतुष्टयस्यापि मूलभूतो विन्दुः बीजस्थानापन्नः। तस्मादपि परतस्तु सूक्ष्मतममपि विशिष्य तद्वाचकत्वात् अभिन्नशब्दार्थरूपं शब्दब्रह्म इत्यादि पदनिर्देश्यं परं ब्रह्मैव इत्यादिपदनिर्देश-विशेषस्य अभावात् अनिर्देश्यम्, अग्राह्यम्, अशब्दम्, अस्पर्शम्, इत्यादि-निषिद्धविशेषणमेव। वस्तुतस्तुः—

सृष्टिद्वयमूलभूतसूक्ष्मरूपविशेषात्मकत्वात् अभिन्न-शब्दार्थरूपं शब्दब्रह्म इत्यादि पदनिर्देश्यं परं ब्रह्मैव। तच्च प्रकाशैकस्वरूपम्, घटः स्फुरति, पटः स्फुरति, इत्यादि प्रत्ययेन पदार्थमात्रे स्फुरणाख्यवस्तुविशेषस्य तत्तदभिन्नस्यानुभवसिद्धत्वात्। प्रकाशस्यापि स्फुरणमवश्यं वाच्यम्-प्रकाशः स्फुरति-इति प्रतीतेः।

तच्च स्फुरणं शक्तिरित्युच्यते। प्रकाशस्फुरणयोश्च मिलितयोरेव जगत्कारणत्वम्, केवलस्य कस्यापि कारणत्वानुपपत्तेः। तेन शुद्धस्य शिवस्य, शुद्धायाः शक्तेर्वा जगत्कारणत्वं यत्र तत्र उच्यमानं शिवशक्तिरूपस्य उभयात्मनः एव बोध्यम्।

तत्र प्रकाशस्तु अकारस्वरूपः तद्वाच्यश्च। स्फुरत्ता तु हकारस्वरूपा तद्वाच्या च। तावेतौ अकारहकारौ परारूपौ सूक्ष्मतमौ प्रागुक्तौ। परादिसृष्टिमूलभूतस्य विन्दुविशेषस्य तु व्यक्ताव्यक्तविलक्षणौ वाचकौ। तस्यापि जनकस्य परब्रह्मणस्तु केवलम् अव्यक्तावेव शून्यस्वरूपौ वाचकौ। तयोः शून्यस्वरूपत्वादेव 'यतो वाचो

निवर्तन्ते अप्राप्य मनसा'सह' इत्यादि श्रुतिभिः अवाच्यत्वोक्तिः सङ्गच्छते। वाच इति बहुवचनेन परादिचतुष्टयस्यैव परामर्शः। तथा च स्मर्यते—

'अहमित्येकमद्वैतं यत्प्रकाशात्मकविभ्रमः।
अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः॥
हकारोन्त्यः कलारूपो विमर्शाख्यः प्रकीर्तितः।
अनयोः सामरस्यंयत् परस्मिन्नहमि स्फुटम्' ॥ इति ॥

'अक्षराणामकारोऽस्मि' इति गीता च।

'शून्याकाराद् विसर्गान्ताद् विन्दुप्रस्पन्दसंविदः' इति योगिनी हृदयश्च। शून्याकारः = शून्यमात्रस्वरूपः अः = विसर्गान्तः = षोडशस्वरान्त्यः = 'अः' इति, तस्माद्विन्दुविशेषः उत्पन्नः इति तदर्थः।

विसर्गस्य अव्यक्तहकारतुल्यत्वेन अकारस्यापि तत्र सत्वेन षोडशस्वर-कीर्तनं प्रकृतमेव। तेन अकार-हकारावेव शून्याकारौ कीर्तितौ वेदितव्यौ। अतएव शून्यश्चासौ अकारश्चेति केचिद् व्याख्याय विसर्गो हकारः स एव अन्ते यस्य इति विग्रहप्रदर्शनपूर्वकं हकारविशिष्टादकारादिति व्याचक्षते। परन्तु तन्मते हकारे शून्यत्वलाभः दुर्घटः।

अत्रायं सृष्टिक्रमः

यथाहि कश्चित् पुरुषः उत्पश्यमानपुत्राद्यदृष्टवशात्उत्पादनेच्छावान् स्वकीयामुत्पादनशक्तिमवलोक्य स्वार्धशरीरात्मिकायां भार्यायां शुक्लरूपेण स्वयं प्रविशति, "आत्मावै पुत्रनामासि" 'पतिमेकादशं कृधि' इत्यादि श्रुतेः। प्रविश्यमानस्य स्वस्माद् अभिन्नत्वेऽपि स्थूलतरभेदाक्रान्तत्वान्नाभेदमानम्। ततस्तस्य शुक्लस्यान्तः शोणितविन्दुरूपेण भार्या प्रविशति। तेन च सविन्दुरुच्छूनो भवति। स एव विन्दुः वटोदुम्बरादिबीजस्थानापन्नः।

तस्मादङ्कुरविशेषाद्युत्पत्तिक्रमेण कालान्तरे पुत्रादिजन्मेति। यथा वा सूर्याभिमुखदर्पणे तदन्तः प्रविष्टः तदुभयकिरणसङ्कुलनरूपः तेजोविन्दुविशेषः कुड्यादौ प्रादुर्भवति। तथैव-प्राण्यदृष्टवशात् स्वान्तः संहृतविश्व-सिसृक्षया प्रकाशरूपं ब्रह्म स्वकीयां शक्तिमवलोकयितुं तदभिमुखीभूय तदन्तः तेजोरूपेण प्रविश्य शुक्लविन्दु भावम् अयते, प्राप्नोतीत्यर्थः। ततः तं विन्दुं रक्तरूपा शक्तिः प्रविशति। तेन संमिश्रविन्दुरुच्छूनो भवति। तत्रच हार्दरूपोऽप्येकः पदार्थविशेषे भवति। स गुरुमुखादेवावगन्तव्यः न पुनः पुस्तके लेख्यः। स च विन्दुः समष्टिरूपेण एकः स्फुटशिवशक्तिसामरस्यनामा 'कामः रविः अग्नीषोमात्मकः' इत्यादि शब्दैः व्यवह्रियते शास्त्रे आगमे च व्यष्टिरूपेण सा द्वयम्। तत्र शुक्लः इन्दुः, रक्तः अग्निः, इति

विन्दुद्वयात्मकत्वाद्विसर्गः इति च व्यवह्रियते। अतएव च रवेः रात्रावग्नौ अमायाञ्च चन्द्रे प्रवेशस्य श्रुत्यादिसिद्धत्वात् समष्टिविन्दोः रवित्वम्। एवञ्च-कामाख्यो विन्दु-विसर्गः हार्दकला चेति त्र्यवयवकः एकः पदार्थविशेषः अणादिप्रत्याहारवत् 'काम-कला' इत्युच्यते। इदमेव च शब्दस्य शब्दार्थमयप्रपञ्चस्य सृष्टिबीजम्।

अतएव अकारहकारयोर्मध्ये सर्वेषां वर्णानां पाठः। क्षकारस्य कषयोर्योगरूपत्वात् न तद्बहिर्भावः = शङ्कवचः। एतन्मूलभूतं ब्रह्म तुरीयविन्दुरित्युच्यते। तद्रूपाभ्यां शून्यस्वरूपाभ्यामुत्पन्ना कामकला व्यक्ताव्यक्ते-विलक्षणा अहं पदवाच्या। अकार-हकारोभयात्मकत्वं शिवशक्तिद्वयरूपत्वञ्च अहं पदस्य निष्कृष्टोऽर्थः। अतएव तज्ज-न्यानां सूक्ष्मादिस्थूलानामखिलसृष्टीनाम् अहं पदस्य वाच्यत्वं शास्त्रोक्तं सङ्ग-च्छते। यथा उदुम्बरपदवाच्यबीजाज्जनितानां परस्परविलक्षणानामपि पर्णकण्ठ-कुसुमफलकृमीणां सर्वेषामुदुम्बरत्वम्—उदुम्बरपत्रम्, उदुम्बरकाष्ठम्, उदुम्बरफलमि-त्यादिव्यवहारात्। तथा च श्रुतयः—

ब्रह्मवा इदमग्र आसीत्, तदात्मानमेवावेदहं ब्रह्मास्मीति, इति बृहदारण्यके। त्वं वा ब्रह्म, अहं वै त्वम्, इति ऐतरेयके। कस्त्वम् अहमिति हो वाच, त्वमेव इदं सर्वं तस्मादहमिति सर्वाभिधानमिति तापनीये। पाणिनिनापि अस्मच्छब्दस्य सर्वनामता उक्ता।

तथान्यत्रापि—'तद्वा एतद् ब्रह्मद्वयम्' इत्यादिना ब्रह्मस्वरूपमभिधाय तदु-पासनां पूर्णोऽहं भावभावनारूपां पश्यता 'हंसः सोऽहम्' इत्यादिना विदधाति। तत्प्रकारस्तु अतिरहस्यत्वात् गुरुमुखादेव लभ्यः। उक्तञ्च कादिमते—'बन्धनयोनि-मुद्रायाः मन्त्राणां वीर्ययोजनम्। गुरोर्लक्षणमेतावद् आदिमानञ्च बोधयेत्'। इति। आदिमोऽकारः अन्त्यो हकारः तयोः समाहारः—अहम्, अत्र इतरेतरयोग द्वन्द्वपरित्यागेन समाहारस्य विन्दुलाभः प्रयोजनम्। छान्दोग्येऽपि—अहमेव अधस्ता-दहमुपरिष्टादहं पश्चादहं पुरस्तादहं, दक्षिणतः अहमुत्तरतः अहमेव इदं सर्वम् विरूपाक्षपञ्चाशिकायामविस्वपरा वमासनक्षम् आत्मा विश्वस्य यः प्रकाशोऽसौ। अहमिति स एक उक्तोऽहन्तास्थितिरीदृशी तस्या इत्यादि परः सहस्रं वचनानि सन्ति। एतादृशस्य अहं पदार्थस्य यथाऽहमिति पदवाचकं तथा उत्तमपुरुषैकवचनं-मपि वाचकम्। तस्य च परस्मैपदात्मनेपदभेदेन द्वैविध्येऽपि इकारत्वेनानुगमादित्व-मेव शतावच्छेदकम्।

अन्यायश्चानेकशब्दत्वमिति न्यायात्। तस्य च धातूत्तरेत्वेन उत्तमपुरुषत्वादि-ना वा उपस्थितिः पदार्थस्मारकत्वे तन्त्रम्। एर्णलादात्रपि लुप्तस्य स्मरणम्। तद-भावे शक्तिभ्रमाद् बोध इति यथायथमूह्यम्। तत्र च अकारहकारयोः अदर्शनेऽपि शास्त्रप्रामाण्यात् तौ सूक्ष्मरूपेण स्तः इति स्वीकार्यमेव। तस्य च हार्दकलायोगे

दीर्घताऽपि सम्पद्यते इति तुरीयस्वरस्वकामकलारूपत्वं मन्त्ररहस्यविद्भिः प्रतिपाद्यते। तदुक्तं योगिनी-रहस्ये—

'मध्यविन्दुविसर्गान्तः समास्थानमये परे।
कुटिलारूपके तस्याः प्रतिरूपं वियत्कले॥' इति।

मध्यविन्दुः कांमाख्यः तस्य तुरीयविन्दु विसर्गमध्यपातत्वात्, समष्टेर्व्यष्टिमध्ये एव अन्तर्भावश्च। विसर्गो व्यष्टिरूपं विन्दुद्वयम्, तयोर्मध्ये सम्यक् चैतन्यात्मनावस्थानम्। तन्मये तत्प्रधाने। परे चरमे अकारहकाररूपे अक्षरे, मातृकाणाम् क्रमेण पाठे चरमत्वात् हकारस्य व्युत्क्रमेणपाठे तु अकारस्य चरमत्वात्। किञ्च इमे अक्षरे कुटिलारूपके। कुटिले-अकुलकुले तयोः रूपान्तरे इत्यर्थः।

तावता कामविसर्गयोः किमायातम् इत्यत आह—तस्या इति तयोः कुण्डलिन्योरित्यर्थः। वियत्पदेन शून्याकारत्वात् कामः प्रतिपाद्यते, कलापदेन हार्दकलावत्वद्विमर्शः। यतः कामविमर्शयोः कुण्डलिनीप्रतिविम्बरूपत्वम्, अतः कुण्डलिन्यभिन्नाकारहकाररूपत्वमपि सम्भवतीति तात्पर्यम्। इति अस्य श्लोकस्य साम्प्रदायिकी रहस्यव्याख्या। एवञ्चाकारहकारैकस्वरूपा कामकला इति भावः। तद्भूते मन्त्रे विजातीयाक्षरवत्वस्यान्यथानुपपत्त्यापि तयोः (अहयोः) गर्भे अन्येषां वर्णानाम् अर्थसृष्टेश्च सूक्ष्मरूपेण अवस्थानं सिद्ध्यति, यथा वटवीजरूपे सम्पुटे पर्णकाष्ठफलादीनाम्। अन्यच्च—

वटादिवीजानां स्फोटेनैवाङ्कुरादीनामुत्पत्तिरिति वीजस्य पूर्वार्धोत्तरार्धयोर्वियोगः प्रत्यक्षसिद्धः नात्र कश्चिद् दिवादः। परन्तु तच्चार्धद्वयं महति वृक्षे कस्मिन् कस्मिन् भागे अस्तीति-दुर्ज्ञेयमेव। एवं मन्त्रेऽपि बीजांशयोरकारहकारयोरवस्थितयोः परिज्ञानाय सङ्केतभाषया योगिनी-हृदये उक्तम्:—

'मध्यप्राणप्रथारूप-स्पन्दव्योम्निस्थितापुनः।
मध्यमे मन्त्रपिण्डेतु तृतीये पिण्डके पुनः॥
राहू कूटाऽद्वयस्फुर्जत्' इति।

अस्यार्थः—कलाकामयोर्मध्यस्थ विसर्गस्य यः प्राणश्चैतन्यम्। तस्य प्रथा = पृथुत्वेन श्रूयमाणता, स्थूलतेति यावत्। तद्रूपं यत् स्पन्दव्योमहकारः, स्पन्दते-उत्पद्यते इति स्पन्दम्, स्पन्दं व्योम यस्मात् इति व्युत्पत्तेः। हकाराद् व्योमसम्भूतम् इत्युक्तेरिति केचित्। वस्तुतस्तु—मध्यात्मको विसर्गभिन्नो यः प्राणो हकारः तस्य प्रथारूपो यः स्पन्दः=स्थूलरूपा सृष्टिरित्यर्थात्तद्रूपं=व्योम=हकारः, इत्यर्थो युक्तः, हः शिवो गगनं प्राणः इति मातृका-कोशात्। तत्र मध्यम इत्यस्य द्विरन्वयः। तत्रैकं पदं मन्त्रपिण्डेन सह सामानाधिकरण्येन अन्वेति, अपरं वैयधिकरण्येन। मध्यमकूटस्य मध्यमव्यञ्जने। द्वितीयहकार इत्यर्थः। द्वितीयगेषु सप्तसु व्यञ्जनेषु तस्य चतुर्थत्वेन मध्यमत्वात्। स्त्रीलिङ्गाच्छक्तिर्विशेष्या। तृतीयकूटेतु सकारेऽकारो मूलवीजीयः इत्याह—'राहुकूटेति।'

लघुषोढान्यासान्तर्गत ग्रहन्यासे राहोः शप सहाख्य वर्णचतुष्टयसहितस्य वक्त्रे न्यास :—

'वक्त्रे शादि चतुर्वर्णैः सहितं राहुमेवच' इति वचनात् तेन शादि चतुष्टयं राहुकूटम् । तत्र द्वयादभिन्नः अद्वयः तृतीयः सकार इत्यर्थः । तस्मिन् स्फूर्जच्छोभमानम् । नपुंसक लिङ्गवलात् ब्रह्मविशेष्यम् । शिव इत्यर्थः । एतेन अकार-हकारात्मकं शिवशक्तिसामरस्यरूपं परं ब्रह्मैव निखिलस्य शब्दार्थमयप्रपञ्चस्य मूलकारणम् इति ध्वनितम् । एतत्सर्वमभिसन्धायैवोक्तं महापण्डितेन श्रीभास्कररायेण रहस्ये—

'अहकारौ शिवशक्ती शून्याकारौ परस्पराश्लिष्टौ ।
स्फुरणप्रकाशरूपा वुपनिषदुक्तं परं ब्रह्म ॥ २ ॥
विश्वसिसृक्षावशतः स्वार्धां शक्तिं विलोकयद्ब्रह्म ।
विन्दूभवतिततमिन्दुं प्रविशति शक्तिस्तु रक्तविन्दुतया ॥ २ ॥
एतत्पिण्डद्वितयं विसर्गसंज्ञं हकारचैतन्यम् ।
मिश्रस्तु तत्समष्टिः कामाख्योरविकारचैतन्यम् ॥ ३ ॥
एषाऽहं-पदतुर्यस्वर-कामकलादि-शब्दनिर्देश्या ।
वागर्थसृष्टिवीजं तेनाऽहन्तामयं विश्वम् ॥ ४ ॥
अन्त्यप्रथमे मध्यचतुर्थे मन्त्रेऽपितौ व्यक्तौ ।
तेनाम्बमनुजगतामभेद एवात्र भावार्थः ॥ ५ ॥

व्याख्यात-प्राया इमे श्लोकाः, परन्तु पूर्वोक्तश्लोकेषु—'मध्यप्राणप्रथारूप-स्पन्दव्योम्निस्थितापुनः, मध्यमे मन्त्रपिण्डेतु' तथा 'अन्त्यप्रथमेमध्यचतुर्थे मन्त्रेऽपि' इत्यादौ मन्त्रशब्देन कः मन्त्रोऽभिप्रेतः इति जिज्ञासा बलादुत्तिष्ठते, तत्परिज्ञानाय तद्विषयेऽपि किञ्चिल्लिख्यते जिज्ञासूनामुपकृतये ।

तान्त्रिक-सम्प्रदाये वरिवस्यारहस्यग्रन्थानुसारेण प्रपञ्चस्य मूलकारणीभूतशक्तितत्त्वज्ञानाय चतुर्दशविद्याः उपयुक्ताः दर्शिताः, तत्रापि सारभूताः वेदाः तेष्वपि च गायत्र्याः प्राधान्यमुपवर्णितम् । तस्याः गायत्र्या अपि रूपद्वयमुक्तम्—परमपरञ्च, तथा चोक्तम्ः—

'तस्याः रूपद्वितयं तत्रैकं यत् प्रपठ्यते स्पष्टम् ।
वेदेषु चतुर्ष्वपि परमत्यन्तं गोपनीयतरम् ॥
कामो योनिः कमलेत्येवं सङ्केतितैः शब्दैः ।
व्यवहरति न तु प्रकटं यां विद्यां वेदपुरुषोऽपि । (व० र०)

अत्र 'प्रपठ्यते स्पष्टम्' इत्यत्र श्लेषेण स्पष्टमस्पष्टमिति पदच्छेदेन द्विविधोऽर्थो भवति । तत्र स्पष्टम्—त्रिपादगायत्री 'तत्सवितु' रित्यादि सर्वजनप्रसिद्धा ।

अस्पष्टञ्च—चतुर्थपादा 'परोरजसोसावदोमित्ति' परं रूपञ्च अत्यन्तं गोपनीयतरम्।

'कामो योनिः कमला वज्रपाणि गुहा-हसा।
मातरिश्वाऽभ्र मिन्द्रः पुनर्गुहा सकला मायया च पुरूच्येषा।
विश्वमाताऽऽदि विद्या ॥'' (सांख्यायनश्रुतिः)

एतेषां साङ्केतितशब्दानामयमर्थः—काम-शब्देन ककारः, योनि = एकारः, कमला = तुरीयः स्वरः = ईकारः, वज्रपाणि = लकारः, गुहा = हृल्लेखा (ह्रींकारः) हस इति स्वरूप-कथनम्, मातरिश्वा = ककारः, अभ्रम् = हकारः, इन्द्रः = लकारः, पुनः गुहा = ह्रींकारः, सकल इतिस्वरूपम्, माया = ह्रींकारः। तथा च—'क ए ई ल ह्रीं, हस क ह ल ह्रीं, स क ल ह्रीं' अयमेव मन्त्रः उक्त श्रुतेरुद्धृतः अत्र ह्रींकारान्तानि त्रीणि कुटानि सन्ति। अयमेव मन्त्रः आदिविद्या, परा गायत्री, दुर्वासोपासिता श्रीविद्या, इत्याद्यनेकैः शब्दैः व्यवह्रियमाणः दृश्यते तान्त्रिकसम्प्रदाये कादिमते। पञ्चदशाक्षरवत्वात् पञ्चदशीविद्या, इति शब्देनापि गीयते। श्रीचक्रस्यापि जनकः अयमेव मन्त्र, इति वरिवस्यारहस्यादवगम्यते। विशेषजिज्ञासुभिः तत्रैवावलोकनीयम्, प्रकृतेऽनुपयुक्तत्वात् विस्तारभयाच्च नेह लिखितम्।

इदमप्यत्रावधेयम्ः—

यद्यपि शिवशक्ति-सामरस्यात्मकस्य प्रकाश-विमर्शात्मक-वस्तुविशेषस्यैव शब्दार्थमयसृष्टिजनकत्वं पूर्वमुक्तम्, तथापि, पूर्वं विमर्शस्य शब्दसृष्टौ ततः प्रकाशस्यार्थसृष्टौ जनकत्वं कारणत्वं वा बोध्यम्। परन्तु, तयोः परस्परसापेक्षत्वेनैव स्वस्वकार्यजनकत्वं श्रुतिस्मृत्यादावुक्तम्। अतः एकस्य स्वकार्यजनकत्वे अपरस्य तत्कारणतावच्छेकत्वम् आवश्यकम्। एवञ्च कारणतावच्छेदककारणतयोः विशेषण विशेष्यभावे विनिगमनाविरहात् उभयोरपि प्रातिस्विकं कारणत्वं सिध्यति। एतदभिप्रायेणैव तत्तच्छास्त्रेषु अन्यतस्यैव कारणत्वबोधकानि वचनानि उपलभ्यन्ते। भगवता व्यासदेवेनापि शारीरके 'शब्द इति चेन्नातः प्रभावात् प्रत्यक्षानुमानाभ्याम्' इति (वे०सू० १-३-२८) सूत्रे 'जगतःशब्दात्प्रभवः' श्रुतिस्मृतिभ्यांसिद्ध इति स्पष्टमुक्तम्। तद्भाष्ये च विस्तरेणोपपादितमिति विशेषजिज्ञासुभिस्तत्रैव द्रष्टव्यम्।

एवञ्च प्रथमं विमर्शशक्तेः हकार उत्पन्नः; ततः प्रकाशाद् व्योम। ततो विमर्शात् ककारः, ततः प्रकाशाद् वायुः। ततो विमर्शाद् रेफः, ततः प्रकाशादग्निः। ततो विमर्शात् सकारस्ततः प्रकाशाज्जलम्। ततो विमर्शाद् रेफः, ततः प्रकाशादग्निः। ततो विमर्शात् सकारस्ततः प्रकाशाज्जलम्। ततो विमर्शात् लकारः ततः प्रकाशात् पृथिवी। इत्येवं क्रमेण पञ्चभूतोत्पत्तौ सत्यामपि हकारवद्विमर्शविशिष्टप्रकाशस्यैव व्योमप्रतिकारणत्वादुक्तरीत्या कारणतावच्छेदकत्वस्य हकारे सिद्धेः विनिगमनाविरहात् कारणत्वमपि सिध्यत्येव। एवमेव ककारादिषु विज्ञातव्यम्।

शब्दसृष्टिप्रक्रियायां परादिचतुर्विधशब्दानां प्रवृत्तिनिमित्तम्। उदुम्बरबीजे यथा उदुम्बरवृक्षोयसूक्ष्मशाखापत्रादयः सन्ति, तथैव शब्दसृष्टिः सूक्ष्मरूपशालिनी पूर्वोक्ता सूक्ष्मतमाऽहमात्मिका शिवशक्तिसामरस्यरूपा भगवती आद्याशक्तिः त्रिपुर-सुन्दरी एवा सैव सूक्ष्मतमरूपवत्वं प्रवृत्तिनिमित्तीकृत्य परापदवाच्या भवति। सैव च मातृकाशब्देनापि तान्त्रिक सम्प्रदाये व्यवह्रियते माति, तरति, काशयति इति व्युत्पत्तेः।

तस्याञ्च निर्विकारायामपि अनादिसिद्धप्राप्यदृष्टवशात् स्वान्तः संहृतविश्व-विषयिका सिसृक्षा समुत्पद्यते। ततः स्रष्टव्यविषयान् आलोचयति— बहुस्यां प्रजा-येय' इति तैत्तिरीयश्रुतेः। तादृशमीक्षणमेव प्रवृत्तिनिमित्तीकृत्य सा पश्यन्ती पद-वाच्याभवति। सा एव च पश्यन्त्याख्या मातृका करणशरणीमुत्तीर्णत्वादुत्तीर्ण इत्यपि उच्यते। तदवयवाश्च वामाज्येष्ठादय अष्टौ शक्तयः अन्यत्र प्रपञ्चिताः सन्ति। अतः सैव व्यष्टि-समष्टि-भेदेन नवविधा, ततः अविकृतशून्यादयः नवनादाः जाताः। तत्समष्टिश्च नादध्वन्यादिपदवाच्या नाति सूक्ष्मा परावत् नाति स्थूला वैखरीवत्, अतः मध्यमा इत्युच्यते। सैव च मध्यमाख्यामातृका मध्यमावयवरूपम-विकृतशून्यस्पर्शनादध्वनिविन्दुशक्तिबीजाक्षराख्यं नादनवकं मूलाधारादिनादे नादान्ते ब्रह्मरन्ध्रे च स्थितम्। एतैर्नवभिर्नादैः अ् क् च् ट् त् प् य् श् लाख्य वर्गनव-कवती—

वैखर्याख्या मातृका जाता। वै = निश्चयेन स्पष्टतरत्वात्, खं = कर्णविवरवर्ति नभोरूपं श्रोत्रेन्द्रियं राति = गच्छति, तज्जन्यज्ञानविषयो भवति इति व्युत्पत्तेः। एवञ्च ककारादौ कत्वादयः अनुभूयमानाः सन्तीति बोद्धव्यम्, परिणामे परिणामिनोऽनुस्यूतत्वनियमात्।

यथा मृत्तिकापरिणामभूते घटे मृत्तिका, तन्तुपरिणामभूते पटे तन्तवः अनु-स्यूताः, तथैव। एवञ्च वर्णेषु नादा अनुस्यूता इति बोध्यम्। तथा चोक्तम्—

"आधारोत्थितनादो गुण इव परिभाति वर्णमध्यगतः" इति वरिवस्या रहस्ये।

भगवतः पाणिनेरादिमं सूत्रम्

आचार्य श्रीब्रह्मदत्त द्विवेदी न्याय-साहित्य-व्याकरण-वेदान्ताचार्यः
प्राचार्य, मुरारका संस्कृतमहाविद्यालय, पटना सीटी

इदानीन्तनः कालः सर्वथा प्रगतिशील इति जनैराख्यायते। नैतादृशः कोऽप्यस्मिन् भूतले, यस्य मानसपटले प्रगतिरियं पदं नादधाति। प्रगतिरियं वास्तविकी अवास्तविकी वेत्यन्यदेतत्। तदनुसारेण प्रायेण लेखकानां लेखः स्वल्प-कलेवरो वर्षाभूरिव नव नवे पल्वले वाहुल्येन दृष्टिपथमवतरति। लेखन-साधन-सौकर्येण आत्म-ख्यापनस्य सरलः सफलश्चायं पन्थाः। अक्षराणां नूतनसन्निवेश-विशेषमात्रेण लेखस्तस्य प्रसिद्धिमुपजनयति।

तदेवं गड्डलिका-प्रवाह-प्रभावं स्वजनानुरोधञ्च वारयितुमशक्नुवन्नहमत्र दुष्करेऽपि सुकरे कर्मणि प्रवर्तनेन पाण्डित्यस्य चिख्यापयिषया न वा नवीन विषयस्य पुस्फोरयिषया। अस्तु।

भगवतः पाणिनेराचार्यस्यादिमे सूत्रे विवदन्ते पण्डिताः। तदेवात्र विचार्यते। तत्र केचित् "अथ शब्दानुशासनमि" त्यारम्भसूत्रं व्याचक्षते। अत्र च मनुस्मृते-ष्टीकाकारस्य मेधातिथे र्वचनं प्रमाणयन्ति। पौरुषेयेष्वपि ग्रन्थेषु नैव सर्वेषु प्रयोजनाभिधानमाद्रियते। तथा हि भगवान् पाणिनिरनुक्त्वैव प्रयोजनमथ शब्दानु-शासनमिति सूत्रमारभते इति।

एवं काशिकायाः व्याख्याता श्रीजिनेन्द्रबुद्धिः शब्दानुशासन-प्रस्तावादेव हि शब्दस्येतिसिद्धे शब्द-ग्रहणं यत्र शब्दपरो निर्देशस्तत्र स्वंरूपं गृह्यते इत्यादि स्वग्रन्थे जग्रन्थ। अत्र शब्दानुशासन-प्रस्तावादित्युल्लेखेन अथ शब्दानुशासनमित्य स्य सूत्रत्वं सिध्यति। तत् सूत्राभावे तु शब्दानुशासन-प्रस्तावः कथमुपपद्येत[१]।

अत्रैवार्थे कश्चिदन्योऽपि "अथ शब्दानुशासनमिदं पाणिनीयमेव। प्राचीन पुस्तकेषु आदाविदमेवास्ति। दृश्यन्ते च सर्वेष्वार्षेषु ग्रन्थेषु आदौ प्रतिज्ञासूत्राणी-दृशानीत्यलिखत्। अनेनापि च तस्य वारम्भसूत्रत्वं साधयितुमुपाक्रामि।

अन्ये विपश्चितो "वृद्धिरादैच्" इति सूत्रमादिमं पाणिनीयमिति समर्थयन्ते। तत्र भगवान् पतञ्जलिः कण्ठरवेण तस्य प्रारम्भसूत्रत्वं निरणयत्।

"माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते" इत्यादि वचनं तत्रार्थे स्फुटं प्रमाणम्। यथोत्तरं मुनीनां प्रामाण्यमित्यभियुक्तोक्त

व्यवहारान्महाभाष्य कर्तुः पतञ्जलेर्निर्दाधं सर्वापेक्षया सवलं प्रामाण्यमित्यपिहितं तद्विदाम् । तेन च तस्यैव प्रारम्भ सूत्रत्वं व्यवास्थापीति पक्षान्तरं सम्भावयितुमपि न शक्यते ।

अत्रेयं शङ्का भवितुमर्हति । भूवादयो धातवः इत्यत्रापि "माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वकारागमं प्रयुङ्क्ते । मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते" इत्युक्तं भाष्यकृता । अत्र वकारागम रूपं शास्त्रस्य मध्यस्थं मङ्गलं सूचितम् । भूवादि सूत्रस्य वस्तुतो मध्यपतितत्वाभावेनात्र प्रयुज्यमानो मध्यशब्दो न मुख्यार्थे प्रयुक्तः । अतो लक्षणया तस्य मुख्यार्थे प्रयोगः । तथैव पूर्वत्र निर्दिश्यमान आदिशब्दोऽपि अमुख्यार्थे प्रयुक्तः वृद्धिरादैजित्यस्य प्रारम्भ सूत्रत्वं प्रमाणयितुं न शक्नोतीति ।

अत्र सूक्ष्मेक्षिकया विचारे न सारमासादयामि । मुख्यार्थवाधादिना कस्यचिल्लाक्षणिकत्वे लक्षणाप्रयोजकानां मुख्यार्थवाधादीनामभावेऽपि सहप्रयोगमात्रेण कर्पूरादिगन्धवत् किं लक्षणागन्ध आदिशब्दे प्रसरेत् येन सोऽमुख्यार्थको नेष्टं साधयितुं प्रभवेत् । तस्मात् तस्य प्रारम्भसूत्रत्वे प्रमाणमेव भाष्यवचनम् ।

मध्यशब्दोऽनेकार्थे प्रयुक्तो विनिगमनाविरहात् सर्वत्रार्थे मुख्यार्थके एव । द्वयोः सीमयोरन्तराले वहुधा मध्यशब्दः प्रयुज्यते । तव मम च मध्ये हरिरिति सिद्धान्त कौमुदी । तत्रैव च आदिरन्त्येनेत्यत्र मध्यगानामित्यनेन आद्यन्ताक्षरयोरन्तराल वर्तिवर्णो गृह्यते न तु भवन् मनोरथपथमासीनः समानमानेन त्रिधा विभक्तेषु आद्यन्तभागातिरिक्तः कल्पितो भागः । तथा स्वीकारे प्रत्याहाराणां विलय एव स्यात् मध्यशब्दः संख्याविशेषवाचकोऽपि दृश्यते "मध्यञ्चैव परार्थञ्चे"ति महाभारत प्रयोगे । विलम्बितं द्रुतं मध्यमित्यमरेण वृत्तिविशेषवाचकोऽपि । दधाना वलिभं मध्यमिति भट्टिप्रयोगे देहमध्यभागपरत्वेन तन्निर्देशः । ज्यौतिषे अङ्कविशेषे मध्यशब्दः प्रयुज्यते न्याय्ये च मध्यशब्दो यथाह अमरः "न्याय्ये मध्यमिति" । हिमवद्विन्ध्ययोर्मध्यं यः प्राग्विनशनादपि, प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः इति मनूक्तदिशा सीमान्तरालभागमात्रे मध्यशब्दः । स्वघटकत्व स्वघटकवर्ण प्रागभावाधिकरणक्षणवृत्तित्व-स्वघटकवर्णध्वंसाधिकरणक्षणवृत्तित्वैतत्त्रितय सम्बन्धेन यत्किञ्चित् विशिष्टत्वं मध्यत्वमिति परिष्कृत्यनुसारेण आद्यन्तवर्णयोः परित्यागेन अन्तरालवर्तिवर्णेषु मध्यपद-प्रयोगो मुख्यो भवति । वयश्चतुर्विधं प्रोक्तं मध्यमाधममुत्तमम् । हीनञ्च हारीत ह्यत्र तानिवक्ष्यामि साम्प्रतमित्यत्र चतुर्धा विभक्तेषु वयःसु तृतीय भागस्य मध्ये भवं मध्यमिति व्युत्पत्यनुसारेण ग्रहणं दृश्यते । न चात्र समानमानत्वेन प्रकल्प्य तत्प्रयोक्तुं शक्यते । अनेन प्रसङ्गेन भूवादय इत्यत्र अन्तरालवर्तिनि मध्यपदस्य मुख्यार्थकस्यैव प्रयोगः सम्भवतीति लक्षणाकथायाः

कोऽत्रकाशः कथं वा तदनुरोधेन आदिशब्देऽपि लक्षणा प्रसरेत् ? तस्यां निवृत्तौ सुतरां वृद्धिरादैजिति सूत्रस्यारम्भसूत्रत्वसिद्धेरेतद्विरोधान्मतान्तरं हेयमेव ।

मेधातिथेर्यद्वचनमेतन्मतविरोध उदाहृतं तदपि वाधितार्थ-प्रतिपादकतया वाधितप्रामाण्यकं नास्मत्पक्षं वाधितुं प्रभवति ।

स च प्रयोजननिदशाभावेऽपि शास्त्रारम्भे निदर्शनतया तद्वचनमुदाजहार । न चैतद् वचनं प्रतिज्ञातमर्थं साधयति । व्याकरणस्य मुख्यं प्रयोजनं शब्दानामनुशासनं तच्च तस्मिन् वचने निर्दिष्टमेवेति कथं प्रयोजनप्रदर्शनं विनैव शास्त्रारम्भस्योदाहरणतयास्योपन्यासो न वाध्यते ? अनुपूर्वकः शासिर्विविच्य ग्रहणे दृष्टः । यथा संपूपन् विदुषा नय योऽञ्जसा अनुशासति । तथा च अनुशिस्यते विविच्य असाधुभ्यो विभज्य वोध्यते येन तदनुशासनम् । असाधुभ्यो विभज्य ज्ञापनमस्य मुख्यं प्रयोजनम् । तत्र अक्षिणी निमील्य प्रयोजनान्तरं जिज्ञासते इत्यहो कौशलम् । तस्माल्लेखक-प्रमादात् वृद्धिरादैजिति सूत्रस्थाने तदापतितमिति कल्पयामः । अस्य सूत्रस्य तत्र सन्निवेशे अभिप्रायो ग्रन्थकारस्य साधु संजाघटीति । वैपरीत्ये तदसंगतेर्दुष्परिहरतया तथा सम्भावयितुमपि न शक्यते ।

शव्दानुशासनप्रस्तावादित्यादि जिनेन्द्रवुद्धिकल्पना कुतर्कतल्पधावनश्रान्ता अनल्पकल्पनापाटवानां मनागपि मनसि वस्तुतो न विरोधमुपजनयति । शब्दानुशासनप्रस्तावो न तत्सूत्रात्मा विवक्षितः किन्तु शब्दानां व्युत्पाद्यत्वेन व्याकरणे प्राधान्यात् तेषामनुशासनस्य प्रस्तुतत्वात्तत्प्रस्तावः । शब्दप्राधान्यादेवात्र शब्दशास्त्रपदेनाप्यभिधीयते तत् । अन्तरङ्गपदार्थव्युत्पादनप्रसङ्गे अन्तर्भूतान्यङ्गानि यस्य तदन्तरङ्गम् । अङ्गशब्देन शब्दरूपं निमित्तं गृह्यते शब्दशास्त्रे तस्यैव प्राधान्यात् इति । शब्दानुशासनं सूत्रमनङ्गीकुर्वन्नपि नागेशो विवुधेशो व्यलिखत् । तस्मात्प्राधान्यात् शब्दप्रस्ताव इहाभिमत इति स्फुटं वक्तुं शक्यतया न तेनास्माकं विरोधलेशोऽपि ।

अन्ये च केचिदाधुनिकाः अनल्पकल्पनाधिनाथभट्टोजिदीक्षितप्रभृतिप्रमुखवैयाकरणेभ्योऽर्वाचीना इति प्राचीनपुस्तकसंवादेन प्रमाणभूता भवन्ति । तथाविधपुस्तकोपलम्भप्राप्तसूत्रं पारम्पर्यक्रमागताध्ययनाध्यापनप्रणालीं प्रमालीभूतामुपेक्ष्य विपरीतार्थक्रमे किमिति प्रवर्तेरन् ? तस्मान्नैतदपि युक्तम् । यत्तु सर्वेष्वार्षेषु इदृशानि सूत्राणि दृश्यन्ते तदप्यनववोधविजृम्भितम् । न्याये तथाविधसूत्रानुपलम्भेन अनैकान्तिकत्वस्य स्फुटमुपलब्धेः ।

वाधे दृढेऽन्यसम्भ्यात् किं दृढेऽन्यदपि वाध्यतामिति खण्डनयुक्त्या सर्वोऽपि तादृशो लेख आधुनिकः परिहरणीयः । तस्मात् वृद्धिरादैजिति सूत्रस्यारम्भसूत्रत्वं सिद्धम् । लेखस्यानल्पकलेवरतां सम्भाव्य समचिक्षिपम् ।

भगवान् पतञ्जलिः

आचार्यकमलाकान्त उपाध्यायः

व्याकरण-साहित्य-वेदान्ताचार्यः, न्यायशास्त्री, काव्यतीर्थः, हिन्दीरत्नश्च

भारतीयवाङ्मये पाणिनिकात्यायनपतञ्जलीतिमुनित्रयनामानि भूयो भूयोऽभिनन्द्यन्ते । तत्र कोऽयं भगवान् पतञ्जलिः ? कस्मिन् देशे कदा चायं जनिं लेभे ? किंचास्य वैशिष्ट्यमित्यादिविषय एवास्मद्विवेचनस्योद्देशः । काव्यमीमांसाकारेण "श्रूयते च पाटलिपुत्रे शास्त्रकारपरीक्षेत्यभिधाय 'अत्रोपवर्षवर्षाविह पाणिनिपिङ्गलाविह व्याडिः । वररुचिपतञ्जली इह परीक्षिताः ख्यातिमुपजग्मुः" इत्युक्तम् । तस्य श्रुतिपथागतविद्वत्परिगणनप्रकरणे भगवतः पतञ्जलेरपि नामानुस्मृतमस्ति ।

इदं हि पाटलिपुत्रं भगवतो बुद्धस्य विहरणवेलायां मगधाधिपतेः पुत्रस्य अजातशत्रोः संरक्षणे सेनाशिविरादिस्थापनार्थं निर्मितिमगच्छदिति भगवत्बुद्ध-तच्छिष्यानन्दयोः प्रश्नोत्तरकथाविद्भिर्विद्वद्भिर्ज्ञायित एव । अत्रत्यस्य नन्दिवर्द्धनसम्राजः शासनसमय एव ई० पूर्वतृतीयशताब्द्यां पाणिनिमुनिरिह समायात इति । हर्षवर्द्धनकालीनचीनदेशीय 'ह्वेनशांग' यात्रावृत्तान्तवर्णनेन 'वाहीक' देशीयस्य दाक्षीपुत्रस्य पाणिनेः 'उद्भांडपुर-पार्श्ववर्ती निवासग्रामः 'लाहुल' (पाकस्थाने वर्तमान-ईसुफजई) आसीदिति ज्ञायत एव । तदानीमेव वर्षोपवर्षौ गुरुकुलाचार्यपदमलंकृतवन्तौ पाटलिपुत्रे आस्ताम् । तयोरेकः राज्याश्रित आसीदपरश्च तपसा जीवनं यापयति स्मेत्यपि श्रूयते । व्याडिस्तु वर्षाचार्यादेव पाटलिपुत्रेऽधीत्य पश्चिमदेशं गतः । पुनश्च पाणिनिना सहैव पाटलिपुत्रं गतागतः । वस्तुतः एव पाणिनीयग्रन्थस्य नन्दिवर्द्धनसभायां वर्षोपवर्षयोः दृष्ट्या परीक्षा संजाता । पिङ्गलस्य वररुचेश्च कदा कस्य च राज्यकाले पाटलिपुत्रे समागमोऽभूदिति न स्पष्टं विज्ञायते । पतञ्जलेः पाटलिपुत्रे निवासन्तु विस्तरेण वक्ष्यामि ।

पुष्यमित्र

मौर्यराज परम्परागत 'वृहदवलं वृहद्रथं वा' हत्वा सेनापतिना पुष्यमित्रेण राज्यसत्ता स्वायत्तीकृता[1] । इयं घटना १८८ अथवा १८५ ई० पूर्ववत्सरेऽभव-

१. प्रतिज्ञादुर्बलं च वलदर्शनव्यपदेशेन दर्शितशेषसैन्यः सेनानीरनार्यो मौर्यं वृहद्बलं पिपेष पुष्यमित्रः स्वामिनम् (हर्षचरितस्य १९९ तमे पृष्ठे)

दिति ।[1] कृत्येऽस्मिन् सैनिकानां प्रजानां चासन्तोषः कारणमासीत् । तस्मिन् समये मगधसाम्राज्यस्य पश्चिमदिग्वर्तिदूरस्थाः प्रान्ताः भग्नाः । अन्तर्बहिश्च क्रान्तेः प्रभावात् साम्राज्यं दुर्गतिमापन्नम् । मौर्यराजाः बौद्धा आसन् अत एव दण्डविधाने शिथिलाः, पुष्यमित्रश्च ब्राह्मणः, अत एव शासनतन्त्रे दण्डसमर्थकः हिंसायाञ्च दृढविश्वस्तः । परिणामस्वरूपेण राजानं हत्वा भारतीयोत्तरखण्डे तेन सेनापतिना[2] दृढं साम्राज्यं पुनः स्थापितम् । पश्चिमोत्तरसीमास्थितवल्ख-निवासियवनानामाक्रमणं कलिङ्गाधिप जैनखारवेल-नृपतेश्चाक्रमणजनितसंकटं सोढवान् सः । तथापि पंचनदप्रान्तीयशाकल (स्याल कोट) नगरादारभ्य आवङ्गीयसमुद्रं दक्षिणदेशस्थां नर्मदानदीं यावच्च सेनापतेः पुष्यमित्रस्य साम्राज्यविस्तारोऽभवत् । पुष्यमित्रस्य राज्यकालः षड्त्रिंशत्वर्षीय आसीदिति पौराणिकानुश्रुत्या सिद्ध्यति । जैनानुश्रुत्या च स त्रिंशद्वर्षपर्यन्तं राज्यमकरोत् ।

शुंगवंशीयोऽयं[3] पुष्यमित्रः मूलतः 'आकर' = दशार्णदेशस्थ (पूर्वमालवा) विदिशानगर्याः (आधुनिक-भिलसा-ग्वलियर राज्य) निवासी आसीत् । पुष्यमित्रस्य साम्राज्यकाले तस्य पुत्रोऽग्निमित्र एव विदिशायाः शासकः वर्तते स्म । विदिशायाः पार्श्वे दक्षिणदिशि विदर्भ (वण्ड) राज्यं चासीत् । तत्रत्यः शासकः यज्ञसेन नामासीत् । सच पूर्वमौर्यैः सातवाहनैर्वा स्थापितः प्रकृतिषु प्रियतां न लेभे । अग्निमित्रः यज्ञसेनं पराजित्य वरदा (वर्धा) नदीतटं यावद् भूमिमपहृतवान् । वृत्तमेतत्सर्वं कालिदासरचितमालविकाग्निमित्राख्यनाट्यग्रन्थे वर्णितं वर्तते ।

पुष्यमित्रः वारद्वयमश्वमेधं राजसूयमखं च कारितवान्[4] । जनमेजयस्य पश्चात् पुष्यमित्र एवाश्वमेधस्य पुनरुद्धारमकरोत् । तस्मिन् मखे त्यक्ताश्वरक्षार्थं पुष्यमित्रेण नियुक्तो निजः पौत्रः सिन्धोर्दक्षिणरोधसि यज्ञीयाश्वग्राहिणा यवनराजेन सह युद्धं कृत्वा तं पराजितवानित्यपि मालविकाग्निमित्रनाटके पठ्यते ।

---

१. रमाशंकर त्रिपाठीः प्राचीन भारत का इतिहास पृ० १४३, तथा डा० उपाध्याय पृ० १६९ राय चौधरी :—पोलिटिकल हिष्ट्री ऑफ इंडिया के ग्रन्थानुसारेण १८७ ई० पूर्वे उक्ता घटना जाता । पृ० ३३६ ।

२. मालविकाग्निमित्रे, अभिलेखादिषु च स 'सेनापति' पदमेव धत्ते स्म । यथा पंचमांके—"स्वस्ति यज्ञशरणात् पुष्यमित्रो वैदिशस्थं पुत्रमायुष्मन्तमज्जिनमित्रं स्नेहात्परिष्वज्येदमनुदर्शयति" इत्यादि ।

३. "भरद्वाजाः शुंगा कृताः शैशिरयः" आश्वलायन श्रौतसूत्र, १२, १३, ५ तथा अन्य कई पुराणों में ।

४. अयोध्यायां प्राप्तः पुष्यमित्रस्याभिलेखे (नागरी प्रचारणी पत्रिका, अंक ५, पृ० १००) हरिवंशपुराणे च वर्णितम् ।

पतञ्जलेर्देशः

तस्यैव पुष्यमित्रस्य राज्यकाले भगवान् पतञ्जलिः पाटलिपुत्रे न्यवसत्। अस्यैव पतञ्जलेः गोनर्दीय, गोणिकापुत्रः, नागनाथः, अहिपतिः, फणिभृत्, चूर्णिकाकारः, पदकारः प्रभृति विशेषणानि संस्कृतवाङ्मये दरीदृश्यन्ते । एषु आदे नामिद्वयं विहाय सर्वाण्यपि पतंजलेरेव पर्यायाणीति वक्ति वाचस्पतिगैरोलामहोदयः स्वसंस्कृतसाहित्येतिहासग्रन्थे । 'कीलहार्न' महोदयोऽपि महाभाष्यग्रन्थे पठितेन 'गोनर्दीय' पदेन पतंजलेः भिन्नः कश्चिदाचार्य आसीदिति मन्यते[1] । परन्तु तन्न समीचीनं, यतो हि महाभाष्यशैली-पर्यालोचनेन ज्ञायते यत् सः अन्यपुरुषोक्तिरिवात्मानमपि गोनर्दीयं वक्तिस्म ।

पुष्यमित्रः विदिशा-निवासी आसीदिति पूर्वमेवोक्तम् । गोनर्दीयः यदि पतञ्जलिरेव, तर्हि विदिशायाः पार्श्ववर्ति-गोनर्दनामवसतेरधिवासी पतञ्जलिरप्यासीदिति[2] । इत्थंचाभिजनसान्निध्यात् पुरातनः पतञ्जलिपुष्यमित्रयोः सम्बन्ध इत्यामनन्ति पूर्वान्वेषकाः ।

[तस्मिन् युगे मूलकजनपदस्य प्रतिष्ठाननगरादारभ्य माहिष्मतीं स्पृशन् उज्जयिनीं प्राप्य ततोऽपि गोनर्द (गोनद्ध) वसतिं गत्वा विदिशां प्राप्नोतिस्म कश्चित् पन्थाः। पुनश्च वनसाह्वय-स्थानात् कौशाम्बीं ततश्च साकेतं (अयोध्यां) साकेताच्च श्रावस्तीं ततश्च सेतव्य-कपिलवस्तु-मल्लराष्ट्रीय कुसिनारा-पावा-भोगनगरं ततश्च वैशालीनगरं प्राप्नोतिस्म स एव मार्गः ।][3]

वस्तुतस्तु 'गोनर्दः' वर्तमानोत्तरप्रदेशस्थ 'गोंडा' पदवाच्यो विषयः । अत्रत्य एव पतञ्जलिरासीदिति मान्यताम् । अस्यां स्थापनायां कतिचित् प्रमाणानि प्रस्तुतीक्रियन्ते ।

(क) महाभाष्ये शक्तु-तितउ-हस्तीकृत्वा-पादीकृत्वा-प्रभृत्युत्तरप्रदेशस्यबहुव्यवहृतवस्तूनां लोकोक्तीनां च तादृश एव व्यवहारः यादृशः सम्प्रत्यपि तत्रत्यलोके दृश्यते । अस्मिन् विषये महाभाष्यपारायणेन न स्यात् सन्देहावसरः ।

(ख) पुष्यमित्रस्यायोध्यायां प्राप्तादभिलेखाज्ज्ञायते यत् स्वशासनकालेऽयोध्यायामेव स बहुधा निवसति स्म । मगधे बौद्धप्रभावात् वैदिक-स्मार्त्ततीर्थाभावाच्च ब्राह्मणोऽयमयोध्यां प्रति बहुशः श्रद्धां करोति स्म । अत एव बौद्धग्रंथेषु तं प्रति

---

३. इंडियन ऐण्टिक्वेरी १४, पृ० ४० ।

४. जयचन्द विद्यालंकारः भारतीय इतिहास की रूपरेखा पृ० ७९९ ।

५. सुत्त निपात ९७७,१०१०-१०१३ ।

निन्दावाक्यानि समुपलभ्यन्ते ।[1] तिब्बतनिवासी तारानाथोऽपि स्वरचित बौद्धधर्मेतिहासग्रन्थे निन्दावाक्यानि प्रायुंक्त पुष्यमित्रं प्रति ।[2]

(ग) काशिकादिषु व्याकरणग्रन्थेषु प्राग्देशेष्वेव गोनर्दस्य गणना कृतास्ति । अतः 'गोंडा' नगरमेव गोनर्दपदेन ज्ञायतामिति नवीनाः ।[3] मन्येऽयोध्यानिवास-काल एव ततोऽदूरस्थित 'गोंडा' (गोनर्द) नगरनिवासी प्रायोऽयोध्यास्थ एव महान् सरस्वतीपुत्रः पतञ्जलिः पुष्यमित्रेण सम्बद्धः तस्य वैदिकविदुषः प्रभावादेव तत्रत्येषु शीर्णप्रायेषु बौद्धविद्याभवनेषु पुनः वेदादीनामध्ययनाध्यापने समारब्धवान् । तस्य अयोध्यास्थस्य विदुषः प्रभावादेव पुष्यमित्रस्य यागादिद्वारा वैदिकधर्मोद्धारे प्रवृत्तिर्जाता । एतेनैव च 'इह पुष्यमित्रं याजयामः' इति भाष्यप्रयोगः संगच्छते । यागसम्बन्धिलेखोऽप्ययोध्यायामेव प्राप्तोऽस्ति । मन्येऽयोध्यायामेव यागो जातः, न तु पाटलिपुत्रे । अतः स्पष्टमेव वक्तुंशक्नोमि यत् 'गोंडा' निवासी पञ्जतलिरासीत् । अस्मिन्नेव साकेते बौद्धकालादेव महाविदुषामश्वघोषप्रभृतिदार्शनिकानां परम्पराऽऽसीत् । गोंडवाना-प्रान्ते (गोनद्धग्रामे) नैव श्रूयते विदुषां परम्परा । एतेनापि सिद्ध्यति यत् पतञ्जलिः अयोध्यापार्श्ववर्ती जनः । क्षेत्रोऽयं सरय्ववारः (सरवार) पदेनाभिधीयते । अत्रत्या ब्राह्मणाः 'सरवरिया' (सरय्ववारीयाः) कथ्यन्ते । षष्टिवर्षेभ्यः प्राक् अत्रत्यानामेका महती सभा श्रीशिवकुमारमिश्र श्रीशिवनारायण ओझा प्रभृतिविदुषामुद्योगेन संजाता । तदानीमारभ्य सर्वे 'सरयूपारीणाः' कथ्यन्ते । एतेषामेव पूर्वजेषु पतञ्जलिरध्यासीदिति विज्ञायताम् ।

पतञ्जलेःकालः

भगवतः पतञ्जलेः कालसाधकानि प्रमाणानि दृढानि सन्ति । पाणिनेरष्टाध्यायिग्रन्थे भूतार्थे त्रयो लकाराः कथिताः लङ् लुङ् लिट् चेति । तत्र भूतसामान्ये लुङ्, अनद्यतने लङ् परोक्षेलिडिति सूत्रप्रतिपादितव्यवस्था । अनद्यतने लङ् (३।२।१११) सूत्रस्थभाष्यं चेत्थं विविक्तम्---अनद्यतन इति बहुव्रीहिनिर्देशोऽद्यह्योऽभुक्ष्महीति । भा० अनद्यतन इति बहुव्रीहिनिर्देशः कर्तव्यः । अविद्यमानाद्यतनोऽनद्यतन इति । किं प्रयोजनम् ? अद्यह्योऽभुक्ष्महीति । अद्य च ह्यश्चाभुक्ष्महीति व्यामिश्रे लुङेव यथामिश्रे लुङेव यथास्यात् ।। यद्येवमद्यतनेऽपि लुङ् प्राप्नोति, नह्यद्यतनेऽद्यतनो विद्यते ? अद्यतनेऽपि अद्यतनो विद्यते ।। कथम् ? व्यपदेशिवद्भावने । [प्रदीपे-कालस्यापरं कालं निर्दिशन्त्येव लौकिकाः । न च निर्देशमात्रेण व्यतिरेकोऽ

---

१. यावत् पुष्यमित्रो यावत् संघारामं भिक्षूंश्च प्रघातयन् प्रस्थितः । स यावच्छाकलमनुप्राप्तः (श्यालकोट) (दिव्यावदाने ४३४ पृष्ठे) ।

२. जयचन्द विद्यालंकारः-भा० इ० रूपरेखा ।

३. दाधिमथ-गिरिधरशर्मा चतुर्वेद प्रभृतयः महाभाष्यभूमिकायाम् ।

वगम्यते ।] वा०—परोक्षे च लोकविज्ञाते प्रयोक्तुर्दर्शनविषये । भा०—परोक्षे च लोकविज्ञाते प्रयोक्तुर्दर्शनविषये लङ् वक्तव्यः । अरुणद्यवनः साकेतम्, अरुणद्यवनः माध्यमिकाम् (मध्यमिकाम् इतिपाठः मोतीलाल-बनारसीदासमुद्रिते) परोक्ष इति किमर्थम् ? उदगादादित्यः । लोकविज्ञात इति किमर्थम् ? चकार कटं देवदत्तः । प्रयोक्तुर्दर्शन-विषय इति किमर्थम् ? जघान कंसंकिल वासुदेवः । कैयटेन चेत्थं व्याख्यातम्-अननुभूतत्वात् परोक्षेऽपि प्रत्यक्षयोग्यतामात्राश्रयेण दर्शनविषय इति विरोधाभावः । उद्योतकारोनागेशश्चेत्थं व्याख्यातवान्-भाष्ये जघानेति-कंसवधो हि नेदानीन्तनप्रयोक्तुर्दर्शनयोग्योऽपीति । अरुणत्-इत्युदाहरणे तुल्यकालः प्रत्र कृति बोध्यम्। अत्र गिरिधरशर्मा चाह-सर्वस्यास्येदं तात्पर्यम्यद् या घटना स्वयं न दृष्टा, परं स्वकाल एव जातत्वेन दर्शनयोग्या लोकप्रसिद्धा च । तस्यां बोध्यायां पाणिनिरीत्या अदृष्टत्वेन परोक्षत्वात् लिडेव प्राप्तः, परं तत्र लङ् प्रयोक्तव्य इति वार्तिककृता स्व-सम्मतिः प्रदर्शिता । तत्र च भाष्यकृता पतञ्जलिना 'अरुणद् यवनः साकेतम्' अरुणद्-यवनः माध्यमिकाम्' इत्युदाहरणद्वयं दत्तम् । तेनेदं स्फुटीभवति यद् यवनकृतः साकेतावरोधो माध्यमिकावरोधश्च यद्यपि पतञ्जलिना स्वयं न दृष्टः, अथापि पतञ्जलिसम-सामयिकत्वाद् दर्शनयोग्यो लोकप्रसिद्धश्चेति तत्र लङ्लकारप्रयोगोदाहरणं तेन दत्तम् ।

यवनाक्रमणम्

इतिहासविदां दृष्ट्या पृष्टतः ३२७ वर्षेभ्यः प्राक् अतक्षेन्द्रस्य (अलैकजेण्डर) आक्रमणं संजातम् । तदनन्तरं चन्द्रगुप्तराज्यकालेसिल्यूकसनामा यवनो देशमिम-माचक्राम । स च चन्द्रगुप्तेन पराजितः स्वकन्यां चास्मैप्रायच्छदिति घटना प्रसिद्धैव । शैलाक्षस्य (सिल्यूकस) परम्परायां उत्तराधिकारी मेनेन्द्र (मीनाण्डर) नामा यवनः आसीत् स च पुनर्भारतमाचक्राम । स च स्वयं मथुरापर्यन्तमागतः । तत्र च तस्य (मीनाण्डरस्य) मुद्रा प्राप्ता पुरातत्त्वविद्भिः । तस्य च सेनानायका अयोध्यांविजित्य ततोऽपि पूर्वस्यां दिशि बहुत्राक्रमणं कृतवन्तः, सोऽयं साकेतावरोधः । तदैवैका-यवनसेना चित्रकूट (चितौड़) प्रान्तेऽपि समीपवर्त्तिमाध्यमिकानगरीमरुणत् । इत्थमेत्र संगमयन्ति प्रागुक्तावरोधकथां केचित् गर्गसंहितायामपि मेनेन्द्राक्रमणचर्चा वर्तते । अपरे च १८८ ई० पूर्वे १८५ ई० पूर्वे वा दिमेत्रस्याक्रमणं पाटलिपुत्रेऽभवदिति बहवः पुरातत्त्वविदः । तदानीन्तनाक्रमणमभिलक्ष्यैवपतञ्जलेः प्रयोग इत्यामनन्ति ते । १७० ई० पूर्वे तस्य 'हन्द' (अफगानिस्तान, पंजाब, सिन्ध) प्रदेशे मिथूदात-समकालिकस्य दिमेत्रस्य राज्यमासीदिति यवनदेशीयेतिहासात् निश्चितमेवेति उररी-कृत्योपर्युक्तवर्षयोस्तस्याक्रमणे सन्दिहन्ति केचित् । परन्तु जयचन्दविद्यालङ्कारादयो यत् खारवेलं दृष्ट्वा पाटलिपुत्रात् पलायितोऽपि दिमेत्रः नैवैकेन दिनेन द्वाभ्यां वा दिनाभ्यां परावृत्तः । अतस्तस्य वर्षद्वयं वर्षत्रयं वा यावत् 'हिन्द' देशे सत्तास्वीकारेऽ-

पि नैव कश्चिद्विरोधः । अतः परमपि वक्ति जयचन्दविद्यालंकारो यत् 'हाथीगुम्फा'-अभिलेखसम्पादकाः बहुविवेचनपूर्वकं दिमेत्रस्य राज्यतिलकसमयमित्थं स्थापयन्ति-अन्तियोकमहान् यदा वाख्त्री युद्धस्यान्ते २०६ ई० पूर्वे दिमेत्रं निजं जामातरमकरोत्तदा स दिमेत्रः युवाऽऽसीत् । तदानीं स विंशतिवर्षीयः स्यात्, यतो हि दिमेत्रस्य मुद्रासु तस्याकृतिः ३०-३५ वर्षीयस्येवाभाति । अतः २०६ ई० पूर्वात् परतः १९६-१९१ ई० पूर्वे कदाचिद्राजाऽभवत् । इत्थं हि १८८ ई० पूर्वे १८५ ई० पूर्वे वा मगधे तस्याक्रमणं सम्भाव्यत एव ।

[स्त्रीषु सौवीरसाल्वप्राक्षु (४-२-७६) पाणिनिसूत्रस्योदाहरणे काशिकायां ततश्च सिद्धान्तकौमुद्यां—'सौवीरे-दत्तामित्रेण निर्वृत्ता दत्तामित्री नगरी' इत्युदाहरणं विद्यते । एतेनायाति यत् सौवीरप्रान्ते दिमेत्रेण निर्वृत्ता नगरी काशिकाकार जयादित्यस्य काले (सं. ६५०-७००) आसीदित्यपि ज्ञेयम् !]

श्री जयचन्द विद्यालंकारः स्वीयेतिहासग्रंथे यवनाक्रमणमित्थंविवेचयति—"आक्रान्ता च स 'दिमेत्र' आसीत् । ततः पूर्वम् 'एवुथिदिम-नामा यवनः हेरात-कपीश-हरउवती-जरंक-स्थानानि जितवान् । तेषु विजयेषु वर्षं वर्षद्वयं वा व्यपागमत् । मौर्यराजः (बृहद्बलः) तदानीमसावधान एवासीत् । यदा च दिमेत्रः भद्रदेशं (श्यालकोट प्रभृति) सौवीरं (सिन्धुभूमि) विजित्य माध्यमिकाम् (चित्तौड़पार्श्ववर्त्तिनीम्) अरुणत् । तदापि मौर्यसम्राट् कर्त्तव्यविमुख एवासीत् । अतः परं दिमेत्रः मथुरां हस्तगतां कृतवान् । ततश्च साकेतम् । ततः परं पाटलिपुत्रं प्राप्तः । तथापि कापुरुषः बृहद्रथः नपुंसक इव किंकर्तव्यविमुढ़ एवातिष्ठत् । ततः सेनापतिना पुष्यमित्रेण सेनासमक्षमेव खड्गेन स व्यापादितः । तदनन्तरमेव सेनासहायः स राजहीनस्य राज्यस्य रक्षार्थं राज्यधान्याः पार्श्वे यवनसेनया अयुध्यत इति ।" मगधराजं निर्बलं ज्ञात्वा उत्कलराजः 'खारवेलः' पाटलिपुत्रम् प्रस्थितः । तदा दिमेत्रः पलायितः । पुष्यमित्रश्च राज्यसत्तां हस्तेकृत्वापि सेनापतिरूपेणैव शासनप्रबन्धमकरोत् । अतः परं खारवेलः पंचनददेशोपरि आक्रम्य यवनान् ततोऽपि निःसारितवान् । भारतवर्षस्य त्राता यदा मगधमार्गेण परावृत्तस्तदा मगधस्य नवोदितः शासकः तत्सन्निधौ विनम्रीभूत इति । ततः परं पुष्यमित्रः शक्ति-संचयं कृत्वा खारवेलस्य मृत्योरनन्तरमुत्तरभारतस्य महान् शासकोऽभवत् । अस्मिन्नेव काले 'अटक' स्थाने सिन्धोर्दक्षिणरोधसि (अटकघट्टात् चतुःक्रोशादधः सिन्धुनदः पञ्चक्रोशान् यावत् पश्चिमात् पूर्वं प्रवहति । अतएव मालविकाग्निमित्रे 'दक्षिणरोधसि' इति पदं संगच्छते) । स्व पौत्रस्य नेतृत्वे महतीं सेनां सम्प्रेष्य यवनान् पराजित्याश्वमेधमरचयदिति सारांशः ।

माध्यमिका

माध्यमिकावरोधे ममाप्यस्त्येकमपरंमतम्—पाटलिपुत्रमुद्दिश्य गच्छन्ती यवन-

सेना मथुरां विजित्यायोध्यां प्राप्ता, पुनश्च पूर्वीयंपन्थानं विहाय कथं चित्रकूटसमीपे एका पंक्तिर्गतेति महान् सन्देहावसरः। अपरञ्चाक्रमणनीतिविरोधः। अनूद्देश्यं वहुदूरं दक्षिणदिशि सेनायाः गमनं नैव रोचते मह्यम्। मन्ये, प्राग्देशे माध्यमिकाप-भ्रष्टनामधेयस्य वर्तमानस्य कस्यचिद् ग्रामस्यान्वेषणेऽसफलाः पाश्चात्यलेखकाः चित्रकूटपार्श्ववर्त्तिसमानोच्चारणशालिनो ग्रामस्यैव माध्यमिकास्थाने स्थापनां कृत्वा स्वान् निवन्धान् पूरयन्त आसन्। अधुनातनाश्च निवन्धान् पठित्वैव निवन्ध-प्रणयने प्रवृत्ता भारतीयलेखका अपि तत्रैव लिलिखुः। अतएवाग्रहं विहाय प्राग्देशे पाटलिपुत्रपथे क्वचित् माध्यमिकाऽन्वेष्टव्या। अन्विष्टा च मयेति निर्दिश्यतेऽधः।

अयोध्यातः पूर्वदिशि श्रावस्ती (सहेट-महेट) वर्तते। ततश्च पूर्वदिशि सारन-मंडले पूर्वाभिमुखगामिनि पथि वुद्धपरिचितशिशपावनम् (सिसवन) ग्रामः वर्तते। ततोऽपि पूर्वदिशि छपरा-नगरतश्च पश्चिमदिशि 'मांझी' नाम ग्रामोऽस्ति। तस्य पार्श्वे सरयूतटेऽत्युन्नता भूमिः (डीह)। सा च भूमिः विहार-पुरातत्त्वविभागेन सुरक्षिता वर्तते। मल्ल-शासकानां केचित् निवसन्ति स्मात्रैव। छपरातः पूर्वदिशि 'चिरांद, नामाऽपरोऽपि डीह-पदवाच्यो वर्तते स च सम्प्रति पुरातत्त्वविद्भिःखन्यते, तत्र च वहूनि पुरावस्तूनि लभ्यन्ते। सेयं 'मांझी' माध्यमिका वर्तते। अस्या एव माध्यमिकाया अवरोधः कृतः यवनैः। इयमेव प्राग्देशे पाटलिपुत्रमुद्दिश्य गति-शीलायाः सेनायाः पथि वर्तते। अयमेव प्राचीनः पन्थाः कोशलतः मल्ल-जनपदं स्पृशन् वैशालीं गच्छति। दक्षिणपार्श्वे च गंगामुत्तीर्य च पाटलिपुत्रं प्राप्नोति। एतेनैवागत्य शाहावाद (करुष) विषये गंगामुत्तीर्य शोणंचोत्तीर्य पाटलिपुत्रात् पश्चिम-दक्षिणदिशि प्रणाल्यां सेतुं निर्माय पाटलिपुत्रमरुणद् यवनसेना। तदानीमेव वृहद्वल-हत्यादि पूर्वघटनाः संजाता इति मन्मतम्। करुपदेशस्य (शाहावाद) प्राचीनेतिहासान्वेषणे वहूनां ग्रन्थानां निवन्धानाञ्च दर्शनेनैवमेव मे विवेचन-परिणाम इति।

अतश्च 'अरुणद् यवनः साकेतम्' 'अरुणद् यवनः माध्यमिकाम्' अरुणद् यवनः पाटलिपुत्रम्' इति त्रिपु वाक्येपु पतञ्जलेर्जीवनकाले श्रुतत्वात्, परन्त्वदृष्ट-त्वाऽनद्यतनलङ्प्रयोगः संगच्छते। 'इह पुष्यमित्रं याजयामः' इति प्रयोगस्तु पश्चाद्भवयज्ञीयकालापेक्ष इति विज्ञायताम्। इत्थं चोक्तं प्रकारैः भगवतः पतञ्जलेर्देशकालयोनिर्णयमुपपाद्य तस्य महाभाष्यविषये किंचिद्वच्मि।

महाभाष्यम्

"सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः। स्वपदानि च वर्ण्यन्तेभाष्यं भाष्यविदो विदुः।" इत्युक्तभाष्यलक्षणानुसारेणैव मीमांसा-वेदान्त-न्याय-योगादि-दर्शनग्रन्थानां प्रणयनं विद्यते। अथ चोक्तेपुभाष्येपु भाष्यव्याख्यानभूतं वार्तिकं

दृश्यते; परन्तु पतञ्जलेर्भाष्य-प्रणयने वैलक्षण्यं प्रतीयते। यतोहि-उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते। तं ग्रन्थं वार्तिकं प्राहुः वार्तिकज्ञा मनीषिणः "इति प्राचीन विचारानुसारेणैव कत्यायनविरचित वार्तिकानामेव व्याख्यानं प्रायशः खण्डनञ्च कृतवान् भगवान् पतञ्जलिः। यद्यपि वार्तिकानां महाभाष्यस्य दर्शनाज् ज्ञायते यत् कात्यायनः वररुचिः सूत्रकारस्य पाणिनेः न्यूनतां दृष्ट्वा वार्तिकात्मकव्याख्या करणे प्रवृत्तः। पतञ्जलेश्च पाणिनिगौरवरक्षार्थमेव प्रवृत्तिर्दरीदृश्यते। अतएव वृद्धि-रादैच् सूत्रे भाष्यकार आह—"प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचावकाशे प्राङ्मुखउपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनरियता सूत्रेण" इत्यादि। अतएव कथासरित्सागरे पाणिनिकात्या-यनयोर्विरोधपूर्वकं परस्परशास्त्रार्थकरणञ्च किंवदन्तीरूपेण प्रतिपादितमस्ति। वासु-देवशरण-अग्रवालप्रभृतिनवीनाः विद्वांसः नैवं मन्यन्ते, प्रत्युतानुकूलवुद्धयैव व्याख्यान-रूपाण्येव कात्यायनेन वार्त्तिकानि विरचितानीति स्वीकुर्वन्ति। परन्तु वार्तिककृतं कात्यायनं प्रति स्वयमेवाह भाष्यकारः प्रत्याहाराह्निके 'अ इ उ ण' सूत्रे— "अकारस्य विवृतोपदेशः आकारग्रहणार्थः इति वार्तिकस्य व्याख्याने स्पष्टमुक्तम्— "आहोपुरुषिकामात्रं भवानाह संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चोद्यते इति, वयं तु ब्रूमः विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते इति" अत्र आहोपुरुषि-केति पदं स्पष्टमेव कात्यायनमहंकारपूर्वकवक्तारं कथयति। एवमेव ऋलृक्-सूत्रेऽपि "स एष सूत्रभेदेन लृकारोपदेशः प्लुताद्यर्थः सन् प्रत्याख्यायते सैषा महतो वंशस्त-म्बाल्लट्वानुकृष्यते" इत्यादिपरिहासवाक्यानि कात्यायनं प्रति व्याहरद्भाष्यकारः। एवमेव सर्वत्र भाष्यपर्यालोचनेन ध्वन्यते यत् पाणिनीयसूत्राणां न्यूनताप्रदर्शक-वार्ति-कानां निराकरणमेव भाष्यकारेण कृतमिति। अथ च सूत्राणामक्षरैरेव वार्तिकार्थ-लाभाय भगवता प्रयासः कृतः। एकञ्चापरं महत् सन्देहस्वरूपम् यत् 'सूत्रार्थो वर्ण्यते यत्रेति' भाष्यविद्भिर्लक्षितलक्षणानुसारेणैव पतञ्जलिः पूर्वं संग्राहकवाक्य-मुक्त्वा पश्चाद्व्याख्यानं विस्तारयति। ततश्च कुत्र भाष्यकारस्यैव तत्संग्राहकं वाक्यं कुत्र वा कात्यायनस्येति निर्णेतुमशक्यम्। 'वक्तव्यम्, न वक्तव्यम्' इति भाष्यशैल्या कथमपि किंचिन्निर्णेतुं शक्यते, तथापि बहुत्रास्त्येव संदेहावसरः। यतो हि सम्प्रति नैव कात्यायनप्रणीतवार्त्तिकमात्रस्य संग्रहात्मकपाठोऽवलोक्यत इति।

भगवान् पतञ्जलिः महान् योगी, महावैयाकरणः छन्दः शास्त्रप्रणेता चासीदिति प्रसिद्धिः, परन्तु महाभाष्यमात्रस्यांशिकरूपेण किंचिद्विविच्य विरमामि।

वररुचिः

डॉ श्री महाप्रभुलाल गोस्वामी,
एम० ए०, पी-एच्० डी०, डी० लिट्०, न्यायव्याकरणसाहित्यवेदान्ताचार्यः मीमांसाशास्त्री (लब्ध स्वर्णपदकः)

संस्कृतसाहित्ये वररुचिः भगवत्या भारत्या वरदपुत्रः। एष वररुचिरेव कात्यायनः सोमदेवविरचितकथासरित्सागरे वररुचिः कात्यायनो वा संस्कृतगोत्रोत्पन्नस्य सोमदत्तस्य पुत्रः जुम्नागर्भजः कौशाम्ब्यां जनिं लेभे। प्रसिद्धवैयाकरणेन पाणिनिना सह उपवर्षसकाशात् पाटलिपुत्रे विद्यां प्राप। उपवर्षकन्यया उपकोशया सह उद्वाहः सञ्जातः। पाणिनिसूत्रोपरिवार्तिकरचनया पाणिनिव्याकरणस्यापूर्णतां प्रकाशितवान् यस्य च समाधानं पतञ्जलिना कृतम्, पाणिनिव्याकरणस्यानर्थक्यदोषश्च निराकृतः। न केवलं कथासरित्सागरे एव वररुचिविषयिणी एतादृशी चर्चा, अपितु भोजविरचिते शृङ्गारप्रकाशेऽपि अयमेव वृत्तान्तः समर्थितः। शृङ्गारप्रकाशस्य दूताध्याये प्रणयिनां वृत्तान्तेषु वररुचिगुरुः उपवर्षाचार्यः स्वपुत्र्या उपकोशया सह तस्य पाणिग्रहणं कारयामासेत्युक्तम्।

अवन्तिसुन्दरी कथासारे उक्तम्, यत् अयं वररुचिः बर्हिन्कलापीपुत्र्या विर्गिन्कात्यायन्याः पुत्रः इति। अग्निसम्पर्कात् सा गर्भवती जाता किन्तु व्यभिचारिणीयमिति सर्वैः स्थिरीकृतम्। वररुचिः गोदावरीतटे जनिं लेभे। अनन्तरञ्चायं व्याडेः इन्द्रदत्तस्य उपवर्षस्य च सान्निध्यं पाटलिपुत्रे प्राप्तवान्।

मिथिलाङ्के[1] वररुचिचर्चा वर्तते। तत्रत्यलेखेन एतदेवावगम्यते यत् अयं वररुचिः विक्रमस्य नवरत्नेषु आसीत्। पद्मनाभमिश्राख्यः कश्चित् वैयाकरणः समभवत्। यस्य व्याकरणादर्शनामा प्रसिद्धो ग्रन्थो वर्तते। वैयाकरणोऽयं वंशपरिचयप्रसङ्गे तस्मिन् ग्रन्थे लिखति—

चञ्चलाऽप्यचला लक्ष्मीर्वाणीयस्य गृहे गृहे।
विषुवन्तमहं वन्दे विक्रमो यत्र भूपतिः॥
कालिदासादयोऽप्यन्ये संख्यावन्तः सहस्रशः।
तेषामेको वररुचिः सर्वशास्त्रविशारदः॥
तत्सुतो न्यासदत्तश्च फणिभाष्यार्थतत्त्ववित्।
जयादित्यस्तत्सुतो मीमांसाशास्त्रपारगः॥

१. मिथिलामिहिर १९३६।

श्री पतिस्तत्सुतश्च सांख्यशास्त्रविशारदः ।।

× × ×

× × ×

भानुदत्तस्तत्सुतो रसमञ्जरिकाकरः ।

दामोदरस्तत्सुतश्च काव्यालङ्कारकारकः ।

तत्सुतः पद्मनाभोऽहं मयैवैतन्निरूप्यते ।।

हलायुधस्तत्सुतश्च वेदशास्त्रार्थतत्त्ववित् ।।

एतत्पद्यैः पद्मनाभमिश्रस्य एकादशः पूर्वपुरुषः वररुचिरस्ति ।

वररुचेः वंशपरम्परा निम्नलिखिता--

१. वररुचिः, २. न्यासदत्तः (फणिभाष्यार्थतत्त्ववित्), ३. जयादित्यः (मीमांसकः), ४. श्रीपतिः (सांख्यशास्त्रविशारदः), ५. गुणेश्वरः (काव्यतत्त्ववेत्ता) ६. भानुमिश्रः (प्रसिद्धः कविः) ७. हलायुधः (वेदशास्त्रार्थतत्त्ववित्), ८. श्रीदत्तः (धर्मशास्त्री), ९. भवदत्तः (वेदान्ती) १०. दामोदरः (काव्यालंकारकारकः), ११. पद्मनाभः (व्याकरणादर्शकारः) ।

पद्मनाभमिश्रः मैथिल आसीत् । एतस्य वंशजः सुरेश्वर मिश्रः सोदरपुर ग्राममुपार्जितवान् । सोदरपुरीय मैथिलवंशस्यायमेव संस्थापको विद्यते । पञ्जीप्रवन्धे चैतस्योल्लेखः वर्तते ।

अस्मिन् प्रवन्धे वररुचिकृतस्य लिङ्गवृत्तिग्रन्थस्य चर्चा विद्यते । लिङ्गवृत्तिग्रंथो मया उपलब्धः, नातिविस्तृतोऽयं ग्रंथः । तस्य ग्रन्थस्य ५५५ लक्ष्मण वर्षे लिखिता मातृका उपलभ्यते । अस्मिन् ग्रन्थे महाभाष्ये लिखितस्य जातिगुणक्रियायदृच्छा शब्दानां निर्देशो विद्यते । उदाहरणमपि ततोऽभिन्नमेव । अतः एतस्य ग्रन्थस्य रचयिता वररुचि-र्नूनमेव कात्यायनाद्भिन्नो नवीनश्च । एवमेव भानुमिश्रस्य वंशीयोवररुचिरपि समुद्रगुप्तात् परवर्तीत्यत्र नास्ति सन्देहः ।

मिथिलायां वररुचि-सम्बन्धे एका कथापि सुप्रसिद्धाऽस्ति । कदाचिन्मिथिलाधिपस्य राज्ञः समीपवर्ती धूर्तः कश्चित् ब्राह्मणो राज्ञः समीपमुक्तवान्—एकं पद्यं वर्तते तस्यार्थः सभायां वर्तमानः कोऽपि विद्वान् वक्तुं नार्हति । पद्यस्य अर्थश्च दधिशर्कराचिपटान्नमिति । पद्यञ्च—

सा ते भवतु सुप्रीता देवी शिखरवासिनी ।

उग्रेण तपसा लब्धो यथा पशुपतिः पतिः ।।

---

१. भानुदत्तमिश्र विरचितरसमञ्जरी भूमिकायां कविशेखरेणाचार्यवदरीनाथ झा शर्मणा वंशवृक्षे उक्तं यत् महादेवस्य पुत्रः गणपतिमिश्रः एतस्य पुत्रः भानुमिश्रः इति । र० म० मू० पृ० ४ ।

गतवतिकाले राजा सभायाम् उपस्थितानां विदुषां समक्षं पद्यमेतदकथयदर्थ जिज्ञासाञ्चाकरोत्। किन्तु, तादृशः न कोऽप्यन्यः मूर्खः सभायामासीत् यः तदवगतमर्थं प्रकाशयितुं समर्थो भवेत्। अनन्तरं राज्ञा उक्तं यत् षण्मासाभ्यन्तरे कोऽप्ये तस्यार्थस्य प्रकाशने समर्थो न भवेच्चेत् सर्वेषां पण्डितानां मृत्युदण्डोऽवश्यम्भावीति। धूर्तोऽसौ पण्डितानां निधनचिन्तां मनसि स्मारं-स्मारं नितान्तं सन्तुष्ट आसीत्। एतेषामभावे राजपण्डितोऽहं भविष्यामीति सञ्चिन्त्य प्रसन्नतां प्राप।

सोऽपि दिवसः श्व एव वर्तते इति कश्चिद् गृध्रः स्वभार्यां प्रत्युवाच। श्वोऽस्माकं भोजनसमारोहो भवितेति। सा पृष्टवती कथमिति? तेनोक्तम्-दैवदुर्विपाकात् कश्चिच्छ्रोष्यति, तदा महान् अनर्थो भवेत्। आग्रहविशेषवशात् स पूर्वोक्तां घटनां पद्यार्थञ्चोवाच। भाग्यात् महान् पण्डितः पक्ष्यादिभाषाऽभिज्ञो वररुचिः तस्यैव वटवृक्षस्य तले उपस्थित आसीत्। तयोः वार्तामाकर्ण्य प्रातरेव पद्यार्थं राजसभायामुक्तवान्। तद्दिनादेव एतस्य तस्य श्लोकस्य अत्र प्रसिद्धिर्वर्तते—

दिवा निरीक्ष्य वक्तव्यं रात्रौ नैव च नैव च।
सर्वत्र सञ्चरते धूर्तः वटे वररुचिर्यथा॥

अस्माकमेतस्यां जनश्रुतौ न महानादरः, परम् एतत्तु सत्यं यत् कश्चित् वररुचिः पण्डितः महान् धूर्तश्च अस्यां मिथिलायां कदाचिदवश्यमेवासीदिति।

नात्र संदेहो यत् वररुचिरेव वार्तिककारः कात्यायन[1] नाम्ना प्रसिद्ध आसीत्। स्वरचितत्रिकाण्डशेषे पुरुषोत्तमदेवः निम्नलिखितानि नामानि अपरपर्यायभूतान्यलिखत्। १. कात्यः, २. कात्यायनः, ३. पुनर्वसुः, ४. मेधाजित्, ५. वररुचिः।[2]

कात्य इति गोत्रप्रत्यान्तप्रयोगः। महाभाष्ये वार्तिककारस्य एतन्नाम्ना निर्देशो वर्तते। संस्कृतव्याकरणे एको गोत्रप्रत्ययः अपरो युवप्रत्ययः। कात्यायन इति युवप्रत्ययान्तप्रयोगः—यथा दाक्षिः, दाक्षायणश्च।

पुरुषोत्तमदेवविरचितभाषावृत्तिग्रन्थे पुनर्वसुशब्दः वररुचेरपरपर्यायः उक्तः—पुनर्वसुर्वररुचिः (भा० वृ० ४-३-३४) मेधाजित् इति शब्दस्य वररुच्यर्थे प्रयोगस्त-

---

१. न स्म पुरानद्यतन इति ब्रुवता कात्यायनेनेह। स्मादिविधिः पुरान्तो यद्यविशेषेण भवति, किं वार्तिककारः प्रतिषेधेन करोति—न स्म पुरानद्यतन इति। ३।२।११८। सिद्धयत्येवं यत्त्विदं वार्तिककारः पठति, विप्रतिषेधाट्टापोवलीयस्त्वम्, इति एतदसंगृहीतं भवति। ७।१।१।

—सं० व्या० शा० इ०, पृ० २८४।

२. मेधाजित् कात्यायनश्च सः पुनर्वसुर्वररुचिः।

तत्रैव पृष्ठ २८५।

द्व्यतिरिक्तस्थले नोपलभ्यते। महाभाष्यस्य ४-३-१०१ सूत्रे वाररुचकाव्यस्य चर्चा विद्यते। महाराजसमुद्रगुप्तविरचिते कृष्णचरिते वररुचेः स्वर्गारोहणकाव्य-निर्मातृत्वेन प्रसिद्धिरस्ति[1]। एकएवपुरुषः स्वर्गारोहणस्य कर्त्ता प्रसिद्धो वैयाकरणश्च।

कथासरित्सागरे वार्निककारः, कात्यायनः, वररुचिश्च एक एवासौ एव श्रुति-धरः। यतोऽसौ एकदा श्रवणेनैव सर्वमपि धारयति।

अनेकेषु वररुचिनाम्ना प्रसिद्धेषु एकः याज्ञवल्क्यपौत्रकात्यायनस्य पुत्रः वर-रुचिरस्ति। स्कन्दपुराणे लिखितं यत्—

कात्यायनाभिधश्च यज्ञविद्याविचक्षणः।
पुत्रो वररुचिर्यस्य बभूव गुणसागरः॥[2]

याज्ञवल्क्यं प्रति वररुचेर्महान् आदरः अस्ति। याज्ञवल्क्यादिभ्यः प्रतिषेध-स्तुल्यकालत्वात्" (म० भा० ४।२।६६) इति वार्तिकेन याज्ञवल्क्यप्रोक्तस्य शतपथ-ब्राह्मणस्यान्यब्राह्मणसमकालिकत्वमुक्तम्। कात्यायनस्य विहारप्रदेशे स्थितावपि महाभाष्ये प्रियतद्धिताः दाक्षिणात्याः" इति कथनमपि नासङ्गतं यतः कात्यायन-शाखायाः प्रचारः दाक्षिणात्येषु एव। किञ्च स्कन्दपुराणोक्तविवरणानुसारं याज्ञ-वल्क्यस्य गुर्जरेऽप्याश्रमः आसीत्। मिथिलायां यदा याज्ञवल्क्यः समागतः तदा कात्यायनः गुर्जरे गतवान् इत्यपि संभाव्यते। अतस्तत्पुत्रविषये मालवार प्रसिद्धा जनश्रुतिरपि साधु संघटते।

मालवार-देशस्य जनश्रुत्यनुसारं वररुचिः अष्टादशजातीयकन्याभिः सहोद्वाहं कृतवान्—तथाहि—

धूर्तैर्यत् श्वपचीकृतो वररुचिः सर्वज्ञकल्पोऽपि सन्
जीवन्नेव पिशाचतां च गमितो भर्त्तुर्यदभ्यर्च्यधीः।
छन्दोगोऽयमिति प्रभाकर गुरोर्देशाच्च निर्वासितः
यद्वृत्तान्तविजृम्भितेन महता तत्सर्वमल्पीकृतम्॥
(शृ० पु० ११)

मन्ये, यत् तामेव प्रसिद्धिमाश्रित्य श्लोकमिमं उद्धृतवान् भोजः। परमयं

---

१. यः स्वर्गारोहणं कृत्वा स्वर्गमानीतवान् भुवि।
काव्येन रुचिरेणैव ख्यातो वररुचिः कविः॥
न केवलं व्याकरणं पुपोष दाक्षीसुतस्येरितवार्तिकैर्यः।
काव्येऽपि भूयोऽनुचकार तं वै कात्यायनोऽसौ कविकर्मदक्षः॥
—कृष्ण-चरितम्।

२. एक० पु० अ० १३१, श्लो० ४८-४९।

वररुचिर्नैव वार्तिककारः कात्यायनः, यतः परवर्ती एव। न च कात्यायनविषये कोऽप्यन्यथाभावः उपलभ्यते महाभाष्यादिषु।

कात्यायनस्य प्रामाणिकत्वे तु न कस्यापि विवादः, यतः प्रोवाच भगवांस्तु कात्यः (म० भा०, ३।२।३) इत्यत्र भगवच्छब्दप्रयोगात्। "एतच्च कात्यायनप्रभृतीनां प्रमाणभूतानां वचनाद् विज्ञायते" (न्यासः ६।३।५०) इत्यादि कथनं च तस्य भगवतः कात्यायनस्य विषये एव वर्तते।

कात्यायन एव वररुचिरित्यत्रापि नास्ति काचिद् विप्रतिपत्तिः, यतः ऋग्वेद-भाष्यभूमिकायां सायणेनोक्तम् तस्यैतस्य व्याकरणस्य प्रयोजनविशेषो वररुचिना वार्तिके दर्शितः "रक्षोहाऽऽगमलघ्वसन्देहाः प्रयोजनम्" इति। एतानि रक्षादीनि प्रयोजनानि प्रयोजनान्तराणि च महाभाष्ये पतञ्जलिना स्पष्टीकृतानि। ऋ० भू०, पृ० २६।

पाश्चात्त्याः अत्रत्याश्च पण्डिताः कात्यायनस्य समयं खृष्टपूर्व चतुर्थशताब्दीं स्वीकुर्वन्ति। कात्यायनः पाणिनिव्याकरणे वार्तिकं विरचय्य चिरप्रसिद्धिं प्राप। गोल्ड्स्टुकरप्रभृतयः कथयन्ति यत् पाणिनेः समर्थनार्थं पोषणार्थं वा वार्तिकस्य रचना नैव जाता, अपितु पाणिनेः दोषोद्घाटनार्थमेव कात्यायनस्य प्रयासः, किन्तु, पाणिनेः विवरणं वार्तिकेन कृतं कात्यायनेनान्यथा तस्य वार्तिकत्वमेव न संघटते। यतः, सूत्रेऽनुक्तदुरुक्तचिन्ताकरत्वमेव वार्तिकत्वम्। तथा च सूत्रोक्तविषयाणां सारल्येन बोधनमेव वार्तिके जायते। वार्तिकेन पाणिनेः दोष-प्रदर्शनं तु व्यज्यते, यतः पाणिनिकालात् कात्यायनकाले भाषायां महान् भेदः संजातः—

पाणिनि-समये प्रचलिता व्याकरणसम्बन्धिनियमाः कात्यायन-समये अप्रचलिता अशुद्धाश्च स्वीकृताः।

पाणिनिना व्यवहृता अनेके शब्दार्थाः कात्यायनसमये अप्रचलिता आसन्।

पाणिनि-समये प्रचलितार्थस्य एतत्समये महान् मतभेदः समभवत्।

पाणिनि-समये अध्ययनार्थं प्रचलितं शब्दशास्त्रं कात्यायनकालेऽपरिचितमासीत्।

परं कथासरित्सागरादिकथायास्तु उभयोः समकालिकत्वं सूच्यते।

श्रीमहामाहेश्वर जयद्रथनिर्मितहरचरितचिन्तामणेः शब्दशास्त्रावतारनामके सप्तविंशप्रकाशे तु एवमुक्तम्—

कदाचित् पुष्पदन्तनामा महेश्वरस्नेहास्पदीभूतः गणः भाग्यवशादद्रिजयाशप्तः कौशाम्ब्यां सोमदत्तशर्म-द्विजपत्न्यां वसुदत्तायां जनिं लेभे। स च बालकः वररुचि-नाम्ना ख्यातिङ्गतः। दिव्यधिषणाधिष्ठितस्वान्तं तमिन्द्रदत्तव्याडिनामानौ पितृ-विहीनौ जनन्येकशरणौ विद्याभिलाषया तपसा तोषितकार्तिकेयौ स्वप्ने—

नन्दस्य नृपतेरस्ति पुरं पाटलिपुत्रकम् ।
वर्षाख्यस्तत्र विप्रोऽस्ति तस्माद्विद्यामवाप्स्यथ ॥

इति लब्धवरौ द्विजन्मानौ पाटलिपुत्रनिवासिशङ्करस्वामितनूजात् बाल्यावस्थायां बालिशादपि स्वामिकुमार-प्रसादेन प्राप्तसकृद्ग्राहित्वात् अप्राप्तसकलविद्याच्च वर्षनामकाचार्याल्लब्धविद्यौ कदाचित्सङ्गतौ । वररुचेरपि सकृद्ग्राहित्वमवेक्ष्य वर्ष गुरोरशेषविद्याशिक्षणाय तन्मातरमभ्यर्थ्य मात्रा—

अयं श्रुतधरो लब्ध्वा विद्यावर्षादशेषतः ।
लोके व्याकरणं दिव्यं प्रतिष्ठां प्रापयिष्यति ॥
रोचते हि वरं यस्मान्नाम्ना वररुचिः सुधीः ।
प्रतिपाद्येति सा वाणी व्यरमच्च नभस्तलात् ॥

इत्याकाशवाचमुक्त्वा दत्तं तमवाप्य सर्वज्ञवर्षगुरोः सविधे नीतवन्तौ । सकृच्छ्रुतग्राहिवररुचिम्, द्विःश्रुतग्राहिव्याडिम्, त्रिःश्रुतग्राहीन्द्रदत्तमवाप्यातीव ख्यातिङ्गतस्य वर्षाचार्यस्य समीपे बहवः शिष्याः समागताः । तेष्वेकः पणिनाम्नः ऋषेस्तनयात् पाणिनाद् दाक्ष्यामवाप्तजनिः पाणिनिरपि समायातः । स च जडबुद्धितमः तत्रत्यच्छात्रैरुपहसितः हिमगिरिं गत्वा तपसाऽऽराधितमहेश्वरो दिव्यं व्याकरणमवाप्य सर्वान् वादायाऽऽजुहाव । वररुचिना कात्यायनापरनाम्ना वार्तिककारेण साकं सप्तदिनानियावद् वृत्ते शास्त्रार्थे जितकल्पे पाणिनौ नभस्तलाद्घोरशङ्करहुङ्कारतः पाणिनिर्वररुचिं जिगाय । जितो वररुचिर्विस्मृतशास्त्रो मूर्खतामापन्नः पुनस्तपसेश्वरं सन्तोष्याशेषपाणिनीयशास्त्रमवाप्य पाणिन्युक्तार्थपूरकं तद्दुरुक्तनिरासकं वार्तिकनामकं ग्रन्थं व्यरचयत् । तेन खिन्नः पाणिनिस्तं शशाप 'अचिरात्त्वं पतिष्यसि' इति । वररुचिरपि तं तथैव शप्तवान् । ततोऽरण्ये गच्छन्तं पाणिनिं त्रयोदश्यां व्याघ्रोहतवान्, तस्यामेव तिथौ वार्तिककारोऽपि तनुं त्यक्तवान् । ततोऽध्यापनद्वारेण पाणिनिशिष्येण व्याघ्रभूतिना पाणिनिव्याकरणम्, कात्यायनशिष्येण श्वोभूतिना च सवार्तिकं तत् प्रकाशितं सज्जगति विख्यातिमाजगाम । व्याडिरपि पाणिनीयव्याकरणेऽतिविस्तृतसङ्ग्रहाख्यं ग्रन्थमभ्यधात्, परमद्यापि सनोपलभ्यते । एते सर्वेऽपि ईशवीयवर्षात् प्रागासन् इत्यत्र नास्ति सन्देहः । परमिमे समकालिका इत्यत्र वर्तते महान् मतभेदः ।

वार्तिककारस्य सूत्रकाराऽपेक्षयापि वैशिष्ट्यमासीदित्यत्र "न बहुव्रीहौ" इति सूत्रस्थं शब्दरत्नमेव प्रमाणम् । यथोत्तरं मुनीनां प्रामाण्यमित्येतस्य वचनस्याशय वर्णन-प्रसङ्गे उक्तं हरिदीक्षितेन "सूत्रकृत्खण्डितप्राचीनऋषिवाक्यानामप्रामाण्यवत्सूत्रकारवचः खण्डनप्रवृत्तभाष्यवार्तिकवचनैस्तदंशे सूत्रकारवचसोऽप्यप्रामाण्यकल्प-

नैवोचिता"[1] एतत्कथनेनैतदपि सिद्धं भवति यत् वार्तिककारः सूत्रकारस्य वचनं खण्डितवान्। परन्तु कात्यायनकालिकप्रयोगस्य अर्थस्य च भेदादेव कुत्रचित् सूत्रकारस्य खण्डनं कृतं वार्तिककारेण। नात्र सन्देहो यत् सूत्रकारोऽपि "तदशिष्यं संज्ञाप्रमाणत्वादिति[2] सूत्रेण प्राचीनवैयाकरणोक्तानां लुपियुक्तवद्व्यक्तिवचने (१-२-५१) इत्यादिसूत्राणां प्रत्याख्यानं कृतवान्। तत्त्वबोधिन्यामुक्तम्—"पूर्वाचार्यानुरोधेन कृतं सूत्रं सम्प्रति प्रत्याचष्टे—तदशिष्यमिति। पञ्चालाः, अङ्गाः, वङ्गाः, कलिङ्गाः—इत्यादयो जनपदस्य यथायथं बहुवचनाद्यन्ता एव संज्ञा, नत्वत्र यत्नेन लिङ्गसंख्ये प्रतिपादनीये; 'आपः' 'दाराः' इत्यादिषु यथा। नहि तत्र शास्त्रेण लिङ्गसंख्ये प्रतिपाद्येते इति भावः। उपजीवकं प्रत्ययोपजीव्यं प्रात्याचष्टे लुव्योगेति। इत्यादयः। तथा च सूत्रकारेण प्राचीनसूत्राणां व्याख्यानपूर्वकं यथा तेषामनावश्यकत्वन्तथा सूचितम्। कात्यायनस्य कीदृशं वैशिष्ट्यमिति तु "यथोत्तरं मुनीनां प्रामाण्यम्" इति वचनेनैत्र सूचितं भवतीत्यलं बहुविज्ञेषु।

१. श० २०, पृ० ३५२।
२. पा० सू० १-२-५३।

आचार्यव्याडिः

डा० वाचस्पति द्विवेदी, एम० ए० (संस्कृत हिन्दी), एम० एड०, पी-एच०
डी०, साहित्याचार्य, अध्यक्ष—संस्कृत-विभाग, महाराजा कालेज, आरा

महाकवि-सोमदेवविरचितकथासरित्सागरे वर्णितेषु शिक्षाकेन्द्रेषु पाटलिपुत्रं प्रमुखं स्थानं भजते। नालन्दा, तक्षशिला-वलभी प्रभृति-प्रदेशाः यथा जिज्ञासमानानां शास्त्राध्येतॄणां जनानां स्पृहणीयतां गताः, तथैव पाटलिपुत्रं न केवलं शिक्षाकेन्द्रमपितु समधिगतशास्त्राणां विदुषां परीक्षास्थलमपि आसीत्।

कथासरित्सागरे वर्णितेषूपाख्यानेषु एतस्य वैशिष्ट्यं सातिशयेन चित्रितम्। कालनेमि नामधेयः पुरुषः पितरि स्वर्गते विद्याध्ययनाय मालवतः पाटलिपुत्रमागच्छति।[1] एवमेव वेदकुम्भाभिधेयादध्यापकादध्ययनाय छात्राः पाटलिपुत्रमेवाभिगच्छन्ति।[2] काश्मीर-निवासी विद्वान् पाटलिपुत्रमागत्य वादाय पण्डितानामन्त्रयति।[3] एवं नात्र सन्देहलेशोऽपि यत् प्राचीनसमये पाटलिपुत्रं शिक्षाकेन्द्रेषु परमपदवीमारूढं सर्वजनाभिनन्दितं दूरतः आगतान् शास्त्राध्येतॄन् तोषयतिस्म। अपर्णा चट्टोपाध्यायः उपर्युक्ताभिमतं समर्थयति।[4]

काव्यमीमांसाकारः राजशेखरः सविशेषं वर्णयति। "शास्त्रेषु भ्रष्टाः कवयो भवन्ति" इत्यनुचिन्त्य ज्ञायते यत् शास्त्रेषु व्याकरणाध्ययनमेव सर्वप्रधानम्। उक्तं च दण्डिना—

इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥

---

१. क० स० सा० २।२।८ "विद्याप्राप्त्यै प्रययतुः पुरं पाटलिपुत्रकम्"

२. क० स० सा० १।७।५६ ततः स गत्वा विद्यार्थी पुरं पाटलिपुत्रकम्"

३. क० स० सा० १०।१०।६६-६७

४. "Some Aspects of Social lise Aparna Chattopadhyaya.
"Pataliputra though no longer a recognised centre of learning, had still its fame well Remembered as we find in kathasarit sagar."

यतः उज्जयिन्यां केवलं काव्यकारा एव परीक्षिताः, पाटलिपुत्रे तु शास्त्रकाराः विशेषतः वैयाकरणाः परीक्षिताः । एवं ते अस्योत्कर्षमेव उच्चावचमावहन्ति । सर्वे प्रमुखाः वैयाकरणाः अत्रैव परीक्षिताः ख्यातिमुपजग्मुः ।

उक्तं च काव्यमीमांसायाम्—"अत्रोपवर्षवर्षाविह पाणिनि पिङ्गलाविह व्याडिः ।
वररुचिपतञ्जली इह परीक्षिताः ख्यातिमुपजग्मुः ।।

महावैयाकरणव्याडिः पाटलिपुत्रादभिन्नतया सम्वद्ध आसीत् । वररुचिः व्याडिश्च सहैव पाटलिपुत्रमागत्य वर्षाख्योपाध्यायात् व्याकरणशास्त्रं गृहीतवन्तौ । श्रुतधरः वररुचिः सकृत् कृतोच्चारणेन धारयतिस्म व्याडिस्तु द्विःश्रुतेन ।[1] निश्चितमिदं यदध्ययनानन्तरमत्रैव परीक्षितश्च, यथा वर्णितं काव्यमीमांसायाम् । एतयोर्मण्डितं पाटलिपुत्रं पौरलोकमिव समजनि,[2] सरस्वत्याः लक्ष्म्याश्च निवासभूमिरभवत् ।

राजशेखर-कृतगणनायां व्याडिस्तु पञ्चमे स्थाने निर्दिष्टः । यदि समयानुसारमयं क्रमः तर्हि पाणिनेरनन्तरं व्याड़िः समायाति । "आपिशलि-पाणिनीय-गौतमीयाः" इतिमहाभाष्य-निर्दिष्ट-क्रमेणापि व्याडिः पाणिनेरनन्तरमेव गण्यते । अतः गोल्डस्टुकर महोदयः निश्चिनोति यत् पाणिनेः किञ्चित् कालानन्तरं व्याडिः समजायत ।[3] कथा-सरितसागरे पाणिनिः वर्षस्य शिष्य-मध्ये तिष्ठति । तत्र व्याडिः वररुचिश्च पाणिनेः सहाध्यायी वर्णितः ।[4] एतेनावगम्यते यत् व्याडिः पाणिनेः समकालमेवासीत् ।

भर्तृहरि-मतानुसारं पतञ्जलिः व्याडिमनुगच्छति । तस्य संग्रहमनुसृत्य पतञ्जलिना भाष्यरचना कृता । सतु संग्रह-प्रतिकुंचकः "इत्युक्तम् ।

वैयाकरणःव्याडिः प्राचीन-वैयाकरणानां मध्ये परंप्रसिद्धि प्राप्तः । आचार्य-शौनकेन ऋक्प्रातिशाख्ये एतेषां मतानि समुद्धृतानि । पुरुषोत्तमदेवः भाषावृत्तौ एतेषां मतं विशदयति गालवेन सह । महाभाष्येऽपि "आपिशलि-पाणिनीय-व्याडीय-गौतमीयाः "निर्दिष्टः । ऋक्प्रातिशाख्येऽपि एवं निर्देशः" व्याडि-शाकल्यगार्ग्यः ।" त्रिकाण्डशेषे पुरुषोत्तमदेवेन व्याडेः त्रीणि पर्यायनामानि, विन्ध्यस्थ, नन्दिनीसुत, मेधावीति गृहीतानि । एवं काशिकावृत्तौ भाषावृत्तावपि नाम-निर्देशः प्राप्यते । अतोऽसन्दिग्धमेतेषां प्राचीनत्वम् ।

व्याडिनाम्ना बहवः आचार्याः समुत्पन्नाः किम् ? नचाश्रद्धेयमेतत् । एकः

---

१. क० स० सा० १।२।४२ ।

२. क० स० सा० १।३।३ ।

3. 'Panini' Eold Stucker Page 320.

४. क० स० सा० १।४।२ एवं व्याडीन्द्रदत्ताभ्यां सह तत्रवसन् क्रमात् ।

दाक्षायणः व्याडिः पाणिनिसमकालिक आसीत् । वामनेन[1] काशिकायां दाक्षिनाम्ना-स्मृतः । पाणिनिः क्रौड्यादिगणे निर्दिशति ।[2] युधिष्ठिरमीमांसकमहोदयः व्याडे-र्भगिनीसुतः पाणिनिः इत्यवगच्छति ।[3] केचित् पाणिनेः मातुलपुत्रः व्याडिरिति वदन्ति ।[4]

अन्यदपि कात्यायन ऋक्सर्वानुक्रमण्याः व्याख्याता षड्गुरुशिष्यः वेदार्थदीपिकायां छन्दः शास्त्रकर्ता पिङ्गलः पाणिनेः अनुज इत्यवधारयति ।[5] आधुनिकपाणिनीयशिक्षायाः 'शिक्षा-प्रकाश नामटीकायाः कर्त्तापि एवं मतं स्थापयति ।[6]

"अत्रोपवर्पवर्षाविह पाणिनिपिङ्गलाविह व्याडिः" इत्यस्मिन् पद्येऽपि पाणिनिः पिङ्गल-व्याडिभ्यां सहैव प्रोक्तः । पर्यालोचनेन प्रतिभाति यत् पाणिनेः रचनाकाले एव एतेषां समयः स्वीकर्तव्यः । "संस्कृत व्याकरणस्योद्भवः विकास श्चेति पुस्तकस्य लेखकः सत्यदेव वर्माऽपि उक्ताभिमतं समर्थयति ।

आश्चर्यमेतत् यत् पाणिनिः यथा शाकल्य-गार्ग्यप्रभृतीनां वैयाकरणानां नाम निर्देशं करोति न तथा व्याडेः ।

संग्रहकारव्याडिः परं प्रसिद्धिं प्राप्तः । महाभाष्यकारः एवं प्रशंसति । "शोभना खलु दाक्षायणस्य संग्रहस्य कृतिः ।"[7] संग्रहस्य व्याकरणग्रन्थेषु प्रतिष्ठा-न्यतमा । "कुमारी दाक्षाः" इति काशिका-वचनात् प्रतीयते यत् कुमारीं कामयमानाः जनाः आत्मानं दाक्षिग्रन्थज्ञातारः इत्युक्त्वा गौरवं प्रकाशयन्तिस्म ।

वाक्यपदीयटीकाकारः पुण्यराजः संग्रहं लक्षश्लोकात्मकं कथयति । इह पुरा पाणिनीयेऽस्मिन् व्याकरणे व्याड्युपरचितं लक्ष-ग्रन्थपरिमाणं संग्रहाभिधानं निबन्धमासीत् ।[8]

नागेशोऽपि एवं समर्थयति ।[9] लक्षश्लोकात्मकः एषः संग्रहग्रन्थः आसीत् इति भाष्यव्याख्यातृभिः उक्तम् । संग्रहनाम्ना च प्रतीयते यत् अस्मिन् ग्रन्थे न

---

१. काशिका ६।२।६७ "कुमारी दाक्षा" अष्टाध्यायी ४।१।८० ।
३. 'संस्कृत व्या. शा. का इतिहास' यु. मीमांसक पृ० १९६. ४ वही पृ० ९२ ।
५. तथा श्रूयते भगवता पिङ्गलेन पाणिन्यनुजेन................पृ० ९७ ।
६. ज्येष्ठभ्रातृभिर्विहितो व्याकरणेऽनुजस्तत्र भगवान् पिङ्गलाचार्यस्तन्मतमनुभाव्य शिक्षां वक्तुं प्रतिजनाते । शिक्षा संग्रह का. संस्क. पृ० ३८५ ।
७. म. भा. २।३।६६ ८. वाक्यपदीय टीका काशी संस्करण पृ० ३९३ ।
९. नवाह्निकः निर्णय सागर संस्करण पृ० ५५ ।
"संग्रहो व्याडिकृतो लक्ष श्लोक संख्यो ग्रन्थ इति प्रसिद्धिः ।"

केवलं व्याकरणस्य विचार एव अपितु बहूनां विषयाणां तत्र विचार: कृतः। एतस्य ग्रन्थस्य कियत् वैशिष्ट्यं कीदृशं च प्रामाण्यमासीत् इति पतञ्जलिवचनेनैवावगम्यते व्याडिविचारादग्रे सोऽपि किमपि वक्तुं नेच्छति अपितु तत एव सिद्धान्तभूमिमधिगन्तुमादिशति आचार्यः।

पद्यैः सिद्धान्त-निरूपणादपरः कृष्णद्वैपायन इव आसीत्। निश्चप्रचमेतत् यत् सर्वेषामपेक्षितानां विषयाणां तादृशं वर्णनं तत्र वर्तते येन भरतमपि जिगाय। महाराजसमुद्रविरचितकृष्ण-चरितकाव्येनापि ज्ञायते संग्रहस्य वैशिष्ट्यम्।

"रसाचार्यः कवि व्याडिः शब्दब्रह्मैकवाङ्मुनिः।
दाक्षीपुत्र वचो व्याख्यापटुर्मीमांसकाग्रणीः॥
बल-चरितं कृत्वा यो जिगाय भरतं व्यासं च।
महाकाव्य-विनिर्माणे तन्मार्गस्य प्रदीपमिव॥

एतेन तु एतदपि सूच्यते यदनेन काव्य-रचनाऽपि कृता। कारिका-शैली-प्रवर्तकश्चायमेव आचार्यव्याडिः। नात्र सन्देहः यत् व्याकरणसिद्धान्तस्य आधारभूमिः संग्रह एव। स्वीक्रियते च वाक्यपदीय-स्वोपज्ञटीकायां यदयं श्लोकः संग्रहादेव गृहीतः।" सम्बन्धस्य न कर्त्तास्ति शब्दानां लोक-वेदयोः।

शब्दैरेव हि शब्दानां सम्बन्धः स्यात् कृतः कथम्"[1]

एतादृशस्यापूर्वग्रन्थस्य कस्मादेव विलोपः सञ्जातः? एतस्य कारणं भर्तृहरिणा प्रोक्तम्।

प्रायेण संक्षेपरुचीन् अल्पविद्यापरिग्रहान्।
संप्राप्य वैयाकरणान् संग्रहेऽस्तमुपागते॥
कृतेऽच पतञ्जलिना गुरुणा तीर्थदर्शिना।
सर्वेषां न्याय-बीजानां महाभाष्ये निबन्धने॥

अत्र च एतदेव कारणमाभाति यत् तत्र संङ्गृहीतानां विषयाणामन्यत्रपरवर्तिभिराचार्यैः ग्रन्थविशेषे ग्रहणात् विस्तृतस्यास्य ग्रन्थस्य विलोपः समभवत्। महाकवि बाणभट्ट-वचनात् प्रतीयते यत् तत्कालेऽपि एतस्य प्रसिद्धिरासीत्।[2]

अतः नास्ति सन्देहः यत् वैयाकरणेषु व्याडिः मुख्यतमः आचार्यः तस्यैव व्याख्यानोपाख्यानमधुनाप्युपलभ्यते। पतञ्जलिः भर्तृहरिश्च यस्य प्राधान्यं स्वीकुरुतः, तद्विषये किमन्यत् वक्तव्यम्।

१. वाक्यपदीय स्वोपज्ञ टीका लाहौर पृ० ४२।
२. 'हर्ष चरितम् "३ उच्छ्वास" सुकृतं संग्रहाभ्यासगुरवो....'

पाटलिपुत्रे परीक्षितः शास्त्रकारः

आचार्यं पिङ्गलः, तदीयं 'छन्दःसूत्र'ञ्च

डॉ० रामनाथ पाठकः 'प्रणयी' एम्० ए० (द्वयम्), पी-एच० डी०, साहित्य-व्याकरणायुर्वेदाचार्यः, प्राध्यापकः, आरास्थ एच्० डी० जैनकालेजीय संस्कृत-प्राकृत-विभागस्य

ज्ञान-विज्ञानयोः प्रतीकस्वरूपाऽन्तः सलिला सरस्वती भारतभूमिं चिरकालतः सिञ्चन्ती समायातास्ति । महर्षिवाल्मीकि-वेदव्यासाविहावतीर्णाविभवताम्, इहाश्वघोप कालिदास श्रीहर्षादयश्चावतीर्य भारतभूमिमिमां पावनीं कृतवन्तः । कदाचिद्वि-क्रमस्योज्जयिन्यां काव्यकार-कालिदास-मेण्ठ-अमर-रूप-आर्यसूर-हरिश्चन्द्र-चन्द्रगुप्तानां परीक्षाऽभवत् तथा कदाचित् सम्राजश्चन्द्रगुप्तस्य पुष्पपुरे शास्त्रकारोपवर्प-वर्प-पाणिनि-पिङ्गल-व्याडि-वररुचि-पतञ्जलयोऽपि परीक्षिताः सन्तः ख्यातिमुपजग्मुः—

इहकालिदासमेण्ठावत्रामररूपसूरभारवयः,
हरिश्चन्द्रचन्द्रगुप्तौ परीक्षिताविह विशालायाम् ।
अत्रोपवर्पवर्षाविह पाणिनि-पिङ्गलाविह व्याडिः,
वररुचिपतञ्जली इह परीक्षिताः ख्यातिमुपजग्मुः ॥

पाणिनिकाले पाटलिपुत्रं विद्याकेन्द्र आसीत् । तत्कालीनाः शास्त्रकाराः पाटलिपुत्रे परीक्षिताः सन्त एव प्रतिष्ठाधिकारिणो मन्यन्ते स्म । तदानीं चत्वारो वेदाः, पडङ्गानि, मीमांसा, न्यायः, धर्मशास्त्रम्, पुराणानि—इमाः चतुर्दशविद्याः स्व-चरमोत्कर्षोपरि समासीनाः आसन् । वेदानां पडङ्गेपु छन्दसो विशिष्टा प्रतिष्ठासीत्—

'चतुर्दशसु विद्यासु छन्दः शास्त्रं चैका विशिष्टा विद्या'

पाणिनीयशिक्षायां छन्दः वेदाना पादाविति प्रकीर्तितमस्ति । यथा पादौ विना मानवगतिः दुरवस्था जायते, तथैव छन्दो विना वेदस्य दशा दयनीया भवति । वस्तुतः छन्दो विना वेदार्थ-ज्ञानमप्यसम्भवमस्ति । छन्दोविपये विभिन्नधर्ममार्गेपु परस्परं विवदमानानां मुनीनामपि मतभेदोनास्ति—

"यो ह वा अविदितार्पेयच्छन्दो दैवतब्राह्मणे न मन्त्रेण
याजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्त्तं वा पद्यति,
प्र वा मीयते पापीयान् भवति"

अर्थात् विना छन्दोज्ञानं मन्त्राणां पठन-पाठने मन्त्राणां स्वयमुच्चारणं वा पापकारणं भवति। एतादृशाः याजकाः अध्यापकाः वा मरणानन्तरं वृक्षादिस्थाणु-योनिपूत्पद्यन्ते।

पाणिनि-शिक्षायां पाणिनिनोक्तं यत् वेदाध्यायिभिः आर्षंछन्दः, दैवत्यं विनि-योगश्च प्रयत्नपूर्वकं वेदितव्याः। तथाहि—

आर्षं छन्दश्च दैवत्यं विनियोगः पुनः पुनः,
वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः।

यतः छन्दसो देवतायाः विनियोगस्य च ज्ञानं विना वेदाध्यायी, वेदाध्यापकश्च पापिनौ भवतः—

अविदित्वा ऋषिच्छन्दो दैवतं योगमेव च,
योऽध्यापयेज्जपेच्चापि पापीयान् जायते तु सः। बृहद्देवता

छन्दः पाठकं याजकञ्च पापान्निवारयति—'छादयति ह वा एवं छन्दांसि पाप-कर्मणः' (ऐ० आ० २।१।६)

मन्त्राणां देवता-छन्दो-निरुक्त-ब्राह्मणर्षि-कृत्तद्धितादिज्ञानहीनाः याजकाः याग-कण्टकाः तथा मन्त्राणामृषिच्छन्दो देवता-ब्राह्मणार्थस्वरादिज्ञानशून्याः पाठकाः मन्त्रकण्टकाः भवन्ति। कथितम्—

मन्त्राणां दैवतं छन्दो निरुक्तं ब्राह्मणानृषीन्,
कृत्तद्धितादींश्चाज्ञात्वा यजन्तो यागकण्टकाः।
ऋषिच्छन्दो दैवतानि ब्राह्मणार्थं स्वराद्यपि,
अविदित्वा प्रयुञ्जानो मन्त्रकण्टक उच्यते।

अतश्छन्दोज्ञानमनिवार्यतामावहतीति नात्र सन्देहलेशः। वस्तुतः छन्दोज्ञानं वेदे लोके च नितान्तमावश्यकम्।

अस्तु, पाटलिपुत्रे परीक्षितः शास्त्रकारः पिङ्गलाचार्यः छन्दः शास्त्रस्य विश्रुत-कीर्त्तिः विद्वानासीत्। यद्यप्येतत्पूर्वमपि क्रौष्टुकि-यास्क-तण्डि-सैतव-काश्यप-रात-माण्डव्यादयः छन्दः शास्त्रस्य प्रणेतृ-विपश्चित्सु चर्चिता अभवन्, परं पिङ्गलाचार्यः छन्दः शास्त्रिषु यां प्रतिष्ठामधिगतवान्, तां नान्यः कश्चन लब्धवान्। महा-भाष्यस्य नवाह्निके समुपलब्ध 'पैङ्गल काण्व' (९।७३) शब्देन तथा भाष्यतोऽपि प्राचीनायाम् (ऋक् सर्वानुक्रमण्याम्) प्रदर्शितच्छन्दः शास्त्रीयसूत्राणामनुवादेन पिङ्गलस्य प्राचीनता तु सिद्ध्यत्येव, सहैवैतस्य पतञ्जलेरभिन्नतायाः चर्चा निरस्ता जायते। यतः वामनपुराणे तथा स्कन्दपुराणे विहितः पिङ्गल-प्रसङ्गः पतञ्जलेः पिङ्गलस्यैक्यसम्बन्धे न किमपि सामञ्जस्यं रक्षति। पिङ्गलो निश्चयतः पतञ्जलेः भिन्नं व्यक्तित्वमावहति—

"सनत्कुमारः सनकः सनन्दनः सनातनोऽप्यासुरि-पिङ्गलौ च",

—वामनपुराणम् ।

"गणेन पिङ्गलाख्येन पिङ्गलेशाख्यसंज्ञितम् ।
लिङ्गं प्रतिष्ठितं शम्भोः कपर्दीशादुदग्दिशि ।

पिङ्गलः पाणिनेः भिन्नः पाणिनेरनुज आसीत् । केचन पिङ्गलं नागजातीयं ब्राह्मणं मन्वते । अयं पिङ्गलः क्वचित् पिङ्गलः, क्वचित् पिङ्गलाचार्यः, क्वचित् पिङ्गलमुनिश्च कथ्यमानोऽस्ति ।

एककिम्वदन्त्यनुसारं पिङ्गलनागः पाताललोकान्निःसृत्य पर्वतोद्यान-दरी-वन-नगरादिषु परिभ्रमन् पुनः पातालतलं गच्छन्नन्तकसदृशेन वैनतेयनागान्तकेन विलोकितः । ततश्च जीवनान्निराशो भयाकुलः कम्पमानोऽतिष्ठत् । किन्तु भक्षणप्रवृत्तं विवृतमुखं वैनतेयं विलोक्य पिङ्गलोऽब्रवीत्—'हते मयि वेदस्य विशिष्टाङ्गं छन्दः शास्त्रं विनष्टं भविष्यति । अतः प्रथमं मर्मकं छन्दः शास्त्रं श्रुत्वा पश्चान्मां जहि, एषैव मम प्रार्थनास्ति ।'

पिङ्गलनागस्योपर्युक्तां कुतूहलमिश्रितां वाणीं निशम्य गरुडः छन्दः शास्त्र-श्रवणाय मतिं चकार । पिङ्गलनागो भावाविष्टो भूत्वा छन्दः शास्त्रं वर्णयितुं प्रारब्धवान् । गरुडः छन्दः शास्त्रं श्रावंश्रावं मुग्धोजातः । एतदन्तर एव पिङ्गलनागः समुद्र-तटमुपेत्य 'चतुर्भिर्यकारैः भुगंगप्रयातम्' कथयित्वा विहसन् समुद्रपथेनानायासमेव पातालतलं प्रविष्टवान् । निराशोवैनतेयोऽपि स्वाध्वानं जग्राह ।

पिङ्गलस्य 'पिङ्गलच्छन्दः सूत्रम्' छन्दः शास्त्रस्यानिर्वचनीयोपलब्धिर्वर्तते । तस्याष्टावध्यायाः सन्ति, तेषु प्रारम्भिकेषु त्रिष्वध्यायेषु गायत्र्युष्णुगनुष्टव्बृहती पंक्ति-त्रिष्टुब्जगत्यश्छन्दांसीति—सप्तच्छन्दांसि विवेचितानि सन्ति । इमानि वैदिकच्छन्दांसि विद्यन्ते । एतेषु प्रत्येकं कतिपयभेदविशिष्टमस्ति । चतुर्थादध्यायात् अष्टमाध्यायपर्यन्तं लौकिकच्छन्दसां चर्चाऽऽयाता विद्यते । पिङ्गलः प्रथमाध्याय एव कथितवान् यत्—'म, य, र, स, त, ज, भ, न, ग, लाक्षराण्येव दश सम्पूर्णच्छन्दः शास्त्रस्य मूलानि सन्ति—

मयरसतजभनलग सम्मितं भ्रमति वाङ्मयं जगति यस्य,
स जयति पिङ्गलनागः शिवप्रसादाद् विशुद्धमतिः ।

—पिङ्गलछन्दः सूत्रम् ।

त्रीणि त्रीण्यक्षराणि विधायैकत्र छन्दसां व्यवस्था क्रियते । एतेषां गणसंज्ञा भवति । छन्दः शास्त्रे मान्तपर्यन्तमष्टौ गणाः विद्यन्ते । ग-लाभ्यां गुरुलघ्वोः केवलं बोधो जायते।

मान्न पर्यन्तं त्रयाणामक्षराणामष्टगणाः स्वरूपतः परस्परं भिन्नाः सन्ति। यथा 'म' गणस्य त्रीण्यप्यक्षराणि गुरूणि सन्ति—'धी श्री स्त्रीम्'। यगणेआद्यक्षरं लघु तथा मध्यान्ताक्षरे गुरुणी स्तः—वरासाय्। रगणस्याद्यन्तेऽक्षरे गुरुणी मध्यमाक्षरं लघु विद्यन्ते—का गुहार्। स गणस्यादिमध्याक्षरे लघुनी तथान्ताक्षरं गुरु वर्त्तन्ते वसुधास्। तगणस्यादिमध्याक्षरे गुरुणीतथान्त्याक्षरं लघुसन्ति—सातेक्वत्। जगणस्याद्यन्ते लघुनी तथा मध्याक्षरं गुरु सन्ति—कदासज्। भगणस्यादि गुरु मध्यान्तेऽक्षरेलघुनी सन्ति—किं वदम् तथा नगणस्य त्रीण्यप्यक्षराणि लघून्येव विद्यन्ते—न हसन्।

एवं प्रकारेणाक्षरेषु नियमितच्छन्दसां संख्याऽपरिमेया विद्यते। अत एव पिङ्गलेन यथासम्भवं छन्दसा नाम-गणनां कुर्वता कथितं यच्छन्दःशास्त्रेषु यस्य नामोल्लेखो नास्ति, परन्तु यदि तस्य प्रयोगो दृश्यते तदा तस्मै 'गाथा' संज्ञा दीयते—

"अत्रानुक्तं गाथा"

पिङ्गलद्वारा परिगणितलौकिकच्छन्दःसु आर्यायाः कतिपयभेदातिरिक्तानि निम्नांकितानि महत्त्वपूर्णच्छन्दांसि प्राप्यन्ते। तानि यथा—

वैतालीयम्, पथ्या, चपला, मंजरी, लवली, अमृतधारा, केतुमती, हरिणप्लुता, पुष्पिताग्रा, माणवकाक्रीडितकम्, चित्रपदा, विद्युन्माला, हंसरुतम्, भुजगशिशुभृता, हलमुखी, पणवम्, रुक्मवती, उपजातिः इन्द्रवज्रा, उपेन्द्रवज्रा, दोधकम्, शालिनी, भ्रमरविलसिता, रथोद्धता, स्वागता, वृन्ता, श्येनी, विलासिनी, वंसस्था, इन्द्रवंशा, द्रुतविलम्बितम्, त्रोटकम्, पुटम्, जलोद्धतगतिः, भुजंगप्रयातम्, स्रग्विणी, प्रमिताक्षरा, कान्तोत्पीडा, वैश्वदेवी, वाहिनी, नवमालिनी, प्रहर्षिणी, रुचिरा, मत्तमयूरम्, गौरी, असम्बद्धा, अपराजिता, प्रहरणकलिता, वसन्ततिलका, सिंहोन्नता, उद्धर्षिणी, चन्द्रावर्त्ता, मणिगुणनिकरम्, ऋषभगजविलसितम्, मालिनी, हरिणी, पृथ्वी, वंशपत्रपतितम्, मन्दाक्रान्ता; शिखरिणी, कुसुमलतावेल्लिता, शार्दूलविक्रीडितम्, स्रग्धरा, भद्रकम्, मत्ताक्रीडा, तन्वी, क्रौंचपदा, भुजङ्गविजृम्भितम्, अपवाहकम्, दण्डकम्, चण्डवृष्टिः, प्रपाता, प्रचितवरतन्तु, गौरी, जलधरमाला, ललना, कनकप्रभा, कुटिलगतिः, कुटिला, शैलशिखा, वरयुवतिः, अतिशायिनी, वर्द्धमानम्, अवितथम्, कोकिलकम्, विबुधप्रिया, विस्मिता, शशिवदना, पञ्चकावली, मयूरसारिणी प्रभृतीनि।

पिङ्गलस्य छन्दसामुदाहरणानि परमसरसानि हृदयस्पर्शीनि च सन्ति। तानि च तच्छन्दसामर्थगर्भाण्यपि विद्यन्ते। प्रसङ्गेऽस्मिन् 'पुष्पिाग्रा' छन्दस उदाहरणं विलोकनीयम्—

समसितदशना मृगायताक्षी स्मितसुभगा प्रियवादिनी विदग्धा,
अपहरति नृणां मनांसि रामा भ्रमरकुलानि लतेव पुष्पिताग्रा ।

समानैः श्वेतैः दन्तैः युक्ता, मृगनयनसदृशैः विशालैः नयनैः सम्पन्ना, सुस्मितेन मनोहरा, प्रियवादिनी चतुरा नारी, मानवमनांसि तथैव हरति, यथा पुष्पावनम्रा लता भ्रमर-कुलानि वशीकरोति ।

'रुक्मवती'—छन्दस उदाहरणे सामुद्रिकमुद्रा दर्शनीया विद्यते—

पादतले पद्मोदरगौरे राजति यस्याः ऊर्ध्वग-रेखा,
सा भवति स्त्री लक्षणयुक्ता रुक्मवती सौभाग्यवती च ।

यस्याः नार्याः कमलवर्णे पादतले उद्धर्वगा रेखा गता दृश्यते, सा नार्याः अनेक शुभलक्षणैः सम्पन्ना स्वर्णसौभाग्यवती जायते ।

'दोधक' वृत्तस्योदाहरणस्वरूपेसमागते श्लोके राजनीतिं निभाल्य चेतः परमाँ मुदमावहति—

दोधकमर्थ-विरोधक मुग्रं-
स्त्रीचपलं युधि कातरचित्तम्,
स्वार्थपरं मतिहीनममात्यं
मुञ्चति यो नृपतिः स सुखीस्यात् ।

येन केन प्रकारेण राजशोषणे संलग्नं स्त्री-लम्पटं, युद्धे भयाविष्टं, स्वार्थिनं बुद्धिहीनञ्चामात्यं परित्यज्य राजा कल्याणाभिनिवेशी भवति ।

एवमेव 'स्वागता' छन्दसः शकुननिर्देशकमेकमुदाहरणं परमप्रीतिदमस्ति । नयनपथे तदानीयताम्—

आहवं प्रविशतो यदि राहुः,
पृष्ठतश्चरति यदि वायुसमेतः ।
प्राणवृत्तिरपि यस्य शरीरे-
स्वागता भवति तस्य जयश्रीः ।।

युद्धे प्रवृत्तस्य राज्ञो यदि राहुः अनुकूलो भवेत्, पृष्ठवर्ती वातश्च चलन् स्यात्, तदा तस्य शरीरे प्राणमात्रे शेषे सत्यपि, तदन्तिके जयश्रीः स्वयमायाति ।

'श्येनिका' छन्दसि निन्दितायाः नार्याः लक्षणानां निर्देशः न कम्रतां भजति न-

क्रूरदृष्टिरायताग्रनासिका,
चञ्चलकठोरतीक्ष्णनादिनी ।

युद्धकांक्षिणी सदामिषप्रिया,
श्येनिकेव सा विगर्हिताङ्गना ॥

क्रूरदृष्टियुक्ता, आयतया नासिकयाऽश्लिष्टा, चंचलकठोरतीक्ष्णस्वरसहिता, कलहकारिणी, सदामांसाभिलाषिणी नारी श्येनप्रियासदृशी निन्दनीया भवति ।

पिङ्गलस्यैतिहासिके 'भुजङ्गप्रयात'स्योदाहरणे भुजङ्गप्रयातमित्रस्य श्लिष्टा परिभाषा न कदापि विस्मरणीया विद्यते—

पुरः साधुवद् भाति, मिथ्या विनीतः,
परोक्षे करोत्यर्थनाशं हताशः,
भुजङ्गप्रयातोपमं यस्य चित्तम्,
त्यजेत्तादृशं दुश्चरित्रं कुमित्रम् ।

प्रत्यक्षतः साधुदर्शनं, मिथ्याविनम्रतांभजन्तं, परोक्षे कार्यविनाशकं सर्पगतिवत् कुटिलचित्तं दुश्चरित्रं कुमित्रं परित्यजेत् ।

'ललना' छन्दस उदाहरणे ललनायाः शृङ्गारसिक्तं वपुः दर्शनीयं विद्यते—

या कुचगुर्वी मृगशिशुनयना पीननितम्बा मदकरिगमना,
किन्नरकण्ठी सुरुचिरदशना सा तव सौख्यं वितरतु ललना ।

कुचयोः गुरुतां वहन्ती, मृगशिशोः नयनसुषमया सम्पन्ना, नितम्बपीनतय चाऽदीना, गजगामिनी, किन्नरस्वरलसितकण्ठाभरणा, सुदशनसुदर्शना सुभगा नारी तव सौख्यं तनोतु ।

एवमेव 'कनकप्रभा' छन्दस उदाहरणमधीत्याङ्गनायाः रूपदर्शने न कस्य प्रवृत्तिः जायते—

कनकप्रभापृथुनितम्बशालिनी,
विपुलस्तनी हरिणशावकेक्षणा ।
इयमङ्गना नयनयोः पथि स्थिता,
कुरुते न कस्य मदनातुरं मनः ।

पृथुनितम्बरमणीया, गौरांगी, स्तनयोः विशालतया विशालसौभाग्या, हरिणाक्षी नयनयोरवतीर्य न कस्य मनः कामाकुलं करोति ?

अनयैव रीत्या पिंगलेन समस्तच्छन्दसां यान्युदाहरणानि प्रदत्तानि, तानि परममनोहराणि सन्ति । पिंगलस्यच्छन्दः परम्परा संस्कृतसाहित्येऽद्यापि जीविता विद्यते । संस्कृतसाहित्यस्य वर्त्तमानयुगेऽपि पिंगलनिर्दिष्टच्छन्दसां पथि विलसितानां काव्यानां नाभावो वर्तते । परं दुर्भाग्यमस्ति तेषां, येषां न तेषु प्रवृत्तिर्जायते ।

तथ्यन्त्वेतदस्ति यत् पिङ्गलस्यच्छन्दः सूत्रे समस्त संस्कृतसाहित्ये संस्कृतेतर-साहित्येषु चोपलब्धच्छन्दसां स्रोतांसि विद्यमानानानि सन्ति। पिङ्गलस्य विषम-वृत्तानां विधाने तु निःशेषच्छन्दः प्रवृत्तीनामद्यतनानामपि समावेशः सुतरामेव सम्पत्स्यते।

पाटलिपुत्रस्य सौभाग्यमेतदस्ति, यदेतादृशः विद्वान् पाटलिपुत्रे परीक्षितोऽ-भवत्। जय पिङ्गल, जय छन्दः शास्त्र !

✪

उपसम्पादकीयम्

'मागध' शोधपत्रस्य प्रकाशनं कालिदासाङ्कात्प्रारब्धम् । एतत्प्रवर्त्तनस्य संपूर्णं श्रेयः तत्कालीनः प्राचार्य डॉ० परमहंसरायो विभर्त्ति । तदारभ्याद्य यावत् मागधस्य षड् विशेषाङ्काः प्रकाशिताः । तेषां सम्मानं संस्कृतविद्वज्जगता परमादरैः कृतम् । विश्वविद्यालयानां संस्कृतविभागाध्यक्षा अप्येतद्विशेषाङ्कान् भूरिशः प्रशंसितवन्तः ।

आचार्य श्रीजगदीश पाण्डेय: प्राचार्यकार्यं विगतकतिपयमासेभ्यः कुर्वन्नागच्छति । एतस्य नवीनप्राचार्यस्य कार्यभारग्रहणं 'मागधम्' सहर्षमभिनन्दयति । मागधम् विश्वसिति यत्पाण्डेयमहोदयस्य कार्यकाले मागधस्य विशेषा प्रगतिर्भविष्यति । मागधं प्रारम्भादेवार्थचिन्ताग्रस्तमस्ति । अतएव तद्विशेषाङ्कप्रकाशनेऽपि यदा कदा समयातिक्रमणमनिवार्यं जायत एव । पाण्डेयमहोदयः स्वयं विद्वान् त्वस्त्येव, सहैव 'मागध' सदृशसंस्कृतशोधपत्रस्योपयोगितामपि जानाति । स हि नियमपूर्वकं मागधमधीते तथा तस्य सुपाठ्यसामग्र्याः प्रशंसकोऽस्ति । स एकः ख्यातिलब्धलेखकः, चिन्तकः, साहित्यमनीषीति नात्र वैमत्यम् । अतएव 'मागधम्', पाण्डेयमहोदयं विपुलाशया निरीक्षमाणमस्ति ।

पाटलिपुत्रे परीक्षितानवलम्ब्य प्रकाश्यमानस्य प्रस्तुताङ्कस्याप्यात्मकथा वर्त्तते । एतदङ्कसामग्रीसञ्चये मागध-परिवारेण महानायासो विहितः । विशेषाङ्क-सम्बन्धिनी सामग्री नैकत्रोपलब्धा, न वा क्वचिदेतत्संदर्भ-स्रोतसोः प्राप्तिरेव जाता, यथैतदङ्क सम्पादनं सुलभमभविष्यत् । अनेकविद्वद्भ्यो निबन्धार्थमनुरोधाः कृताः, परं विषयस्य दुरूहताकारणात् सामग्री नावाप्ता । यैः विपश्चिद्भिः निबन्धाः प्रहिताः, तैरपि पर्याप्तकालोगृहीतः । निरन्तरं स्मारण-प्रवृत्तैरप्यस्माभिः समये नाधिगताः निबंधाः। फलतः विशेषाङ्कप्रकाशने विलम्बाधिक्यं न संशयास्पदमिति क्षम्यमेव ।

अपरञ्च, ये पत्रपत्रिकादीनां सम्पादनं प्रकाशनञ्च कुर्वन्ति, तेषां नाविदितानि काठिन्यादीनीमानि । एतन्मार्गे पर्याप्तार्थाभावस्तु प्रमुखं प्रबलकारणमेकमस्ति, परं पारिश्रमिकदानाभावे विद्वद्भ्यो रचनाप्राप्तिरपि सुलभा नास्ति । अतः मागधस्य मार्गे सहस्राधिकानि कष्टानि वर्तन्ते ।

'मागध'—परिवारस्यापि सदस्याः महाविद्यालयकार्यातिरिक्तकार्येषु व्यस्ततया स्वकीयं पूर्णसमयं स्वकीयां पूर्णां शक्तिञ्च 'मागध'–कार्ये नैव संयोजयन्ति ।

यदि विश्वविद्यालयानुदानायोगः मगधविश्वविद्यालयोवाऽतोऽधिकामार्थिकसहायतां प्रयच्छेत्तदा मागधस्य प्रकाशनमतोऽपि सुन्दरतरं स्यात्, गौरवपूर्णञ्च । इदानीं यावत् संस्कृत-प्राकृत-विभागे वयं पञ्चैव प्राध्यापकाः स्मः । परं कार्यभारानुसारमस्मिन्विभागे सप्तप्राध्यापकानामावश्यकता विद्यते । विश्वविद्यालयः एतदर्थं बहुशः प्रार्थितः, ततश्च विहारसर्वकारस्यापि ध्यानमावर्जितं प्राध्यापकानां न्यूनतापूर्त्त्यर्थं, परंतत्पूर्त्तिर्न जाता । यदि विश्वविद्यालयात् प्राध्यापकानां व्यवस्थाऽभविष्यत्, मागधस्य प्रकाशनेऽतोऽप्यधिकं सौकर्य्यमागमिष्यत् ।

नात्र सन्देहोयत् पाटलिपुत्रमुज्जयिनी च चन्द्रगुप्तमौर्यकाले राजधानिके समास्ताम् । नन्दकालेऽपि पाटलिपुत्रं यशस्विआसीत् । अत्रत्य राजसभायां महान्तोविद्वांसः सम्मिलिता अभूवन्, स्वविद्वत्तया च पुरस्काराण्याप्नुवन् ।

कथ्यते यत्, अजातकुणिकः स्वपितरि दिवंगते, परमसंतप्तोऽभवत् तथासौ राजगृहतः स्वराजधानीं चम्पापुरेऽनयत्, प्रतिष्ठापितवाँश्च । कुणिकः चम्पापुरे निवसन्नेव सम्पूर्णं मगधमङ्गञ्च शासितवान् । कुणिके परलोकवासिनि जाते, तत्पुत्र-उदायी चम्पायाः शासकोऽभवत् । स स्वपितुः सभास्थानं, क्रीडास्थलं, शयनस्थानादीन् वीक्ष्य पितुः स्मृतौ उद्विग्नोऽभवत् । अतएव तेन निश्चयः कृतः, यदतः परं मगधस्य राजधानी राजगृहतः, चम्पातो वाऽन्यत्रोचिता । फलतः तेन स्वामात्यैः सह परमार्शोऽकारि तथा नूतननगर-निर्माणार्थं प्रवीणनैमित्तिकानादिष्टवान् । नैमित्तिकाश्च भ्रमन्तः गङ्गातटमुपागताः, तत्र ते पाटलसज्जितान् सुषमायुतान् पाटलिवृक्षान् विलोक्याश्चर्यिता अभवन् । एकस्य वृक्षस्य शाखायां चासनामकः पक्षी विवृतमुखः उपविष्ट आसीत् । क्रिमयः स्वयं तन्मुखेऽपतन् । घटनामिमां विलोक्यामात्याः विचारितवन्तोयत् अत्र नगरनिर्माणेन राज्ञे लक्ष्मीप्राप्तिर्भविष्यति । भौगोलिक दृष्ट्यापि नगरमेतत् मगधाङ्गाभ्यां समानदूरेऽवस्थितमस्ति । अतएवात्र राजधानी निर्माणेन मगधस्याभ्युदयो निश्चयतः भविष्यति । फलतः नैमित्तिकानामादेशेन तत्स्थाने नगर-निर्माणं विहितम् ।

यस्मिन् स्थाने नगरवसतिर्जाता । तस्य स्थानस्य प्राचीनं नाम 'पाटलिग्राम' आसीत् । एतस्यैव परिवर्तितं नाम पाटलिपुत्रमभवत् । पाटलिपुत्रेणानेनानेकोत्थान-पतनानि विलोकितानि । शिशुनागवंशात्तस्य नगरस्येतिहासः प्रारब्धः । मौर्यकाले त्वेतन्नगरं सम्पूर्णभारतस्य राजधानी सौभाग्यमलभत । नन्दयुगेऽत्रानेकविद्वांस आगच्छन्, सर्वैश्च राजसदसि स्वविद्वत्ताप्रदर्शनमकारि । फलतः पाणिनिसदृशा-अप्याचार्याः पाटलिपुत्रे सम्मानिता अभवन् ।

नात्र सन्देहोयन्नन्दमौर्ययुगयोः विद्वत्तानिकषः पाटलिपुत्रमासीत् । अत्रत्यायां राजसभायां यः विद्वान् सम्मानितोऽभवत् । स एवाखिलभारतवर्षीयं यश अप्रा-

त्नोत् । अतएव शास्त्रकारपरीक्षायै पाटलिपुत्रनगरं कवीनां परीक्षार्थञ्चोज्जयिनी-नगरं प्रसिद्धेऽभवताम् । वर्षोपवर्षपाणिनि-पतञ्जलिवररुचिव्याडिपिङ्गलानां सप्तानामपि परीक्षा पाटलिपुत्रेऽभवत्—

> अत्रोपवर्ष वर्षाविह पाणिनिपिङ्गलाविह व्याडिः,
> वररुचिपतंजली इह परीक्षिताः ख्यातिमुपजग्मुः ।[1]

एतत्सार्वजनीनं सत्यमस्ति यत् पाणिनिः तक्षशिलायाः पार्श्ववर्तिप्रदेशस्यैव-कस्यचन निवास्यासीत् । स स्वपूर्ववर्तिसमस्तव्याकरणशास्त्रस्य ज्ञातासीत् । स समस्तव्याकरणान्यधीत्य एतन्निष्कर्षं निष्कासितवान् यत् नैतादृश एकोऽपि व्याकरणग्रन्थो विद्यते, यः संस्कृतभाषायाः पूर्णनियामकोभवेत् । एतस्याः न्यूनतायाः पूर्त्यर्थं स स्वाष्टाध्यायाः रचनामकरोत् । एतस्यैकस्यैव ग्रन्थस्याध्ययनेन पूर्ववर्तिनां समस्तव्याकरणशास्त्राणां सारतत्त्वानि ज्ञायन्ते । यदा पाणिनिः स्वग्रंथं प्रणीतवान्, तदा तस्य प्रामाणिकतायै तं पाटलिपुत्रस्य सभायां प्रेषितवान् । एककिम्वदन्त्यनु-सारमेतदपि कथ्यते यत् पाणिनिः स्वयं स्वग्रन्थमिममादाय पाटलिपुत्रस्य पण्डित-सभायामुपस्थितवान् । तत्र तद्ग्रन्थस्य समीक्षा जाता, जातायां च समीक्षायाम-सौग्रन्थः सर्वोत्कृष्टः घोषितोऽभवत् । एतदपि चोक्तं यत् घटेसागरं निवेश्य संस्कृत-भाषायै ग्रन्थेनानेनैकरूपता दत्ता ।

नात्र मतभेदोऽस्ति यत् हिमालयात् कन्याकुमारीं यावत् अटकात् कटकपर्यन्तञ्च संस्कृतभाषाया एकरूपतायामेतस्यैव ग्रन्थस्य प्रणेतुः पाणिनेः श्रेयोऽस्ति । यदि पाणिनिसदृशोवैयाकरणः संस्कृत-क्षेत्रे नावतीर्णोऽभविष्यत्तदा संस्कृतभाषाया अपि रूपं लोकभाषायाः रूपसदृशं न स्थिरमभविष्यत् । प्राकृतभाषायाः व्याकरणा-भावेन प्राकृते देश-विदेशस्य च प्रभावात् महाराष्ट्रीसौरसेनी-मागध्यर्धमागधो पैशाच्यवन्तिकासदृशा अनेकभेदाः प्रस्फुटिता अभूवन् । पाणिनेः व्याकरणस्याभावे संस्कृतेऽप्यनेकभेदप्रभेदाः प्रस्फुटिता अभविष्यन् । अतः संस्कृतभाषायाः एकरूप-प्रदानस्य कार्यन्तु पाणिनेरस्त्येव परमत्र पाटलिपुत्रस्यापि नाल्पं योगदानमस्ति । एतदेव एतादृशं नगरमासीत्, येन समस्तशास्त्राणां विकासे योगदानं कृतम् । वात्स्यायनः पाटलिपुत्रे स्थितः सन्नेवस्वशास्त्राय प्रौढ़तां प्रदत्तवान् । आर्यभट्ट-सदृशः प्रकाण्डदैवज्ञः पाटलिपुत्रस्य गौरवे परांवृद्धिमानयत् ।

जैनदर्शनशास्त्रस्य विकासे महत्त्वपूर्णयोगदातोमास्वात्याचार्यः पाटलिपुत्र एवाऽभवत् । श्रुतकेवली भद्रबाहुः पाटलिपुत्रे निवसन् चन्द्रगुप्तमौर्यं जैनधर्मे दीक्षितमकरोत् ।

---

१. काव्यमीमांसा, दशमाध्यायः, उपान्त्यश्लोकः ।

श्वेताम्बर-ग्रन्थानां प्रथमा वाचनाऽपि पाटलिपुत्रे, तत्रैवाऽभवद्यत्रेदानीमगम (कुआँ) कूपोऽस्ति। एषोऽगम आगमस्यैवापभ्रंशो विद्यते। ज्ञानस्य वाङ्मयस्य च संवर्धने पाटलिपुत्रस्य महत्त्वपूर्णं योगदानमासीत्। यदीदानीं पाटलिपुत्रस्य संस्कृतसेवानां, संस्कृतवाङ्मयतः पृथक्करणं स्यात्तदा संस्कृतवाङ्मयं रिक्तं भवेत्।

सर्वैः तथ्यमिदं ज्ञायते यत् संस्कृतस्य प्रसिद्धगद्यकारः बाणभट्टोऽपि मगध-जनपदस्यैव निवास्यासीत्। हर्षसमये पाटलिपुत्रस्य गौरवं भूलुण्ठितमभवत् तथा मगधे कोऽप्येतादृशः शक्तिशाली, वैभवसम्पन्नो नृपो नासीत्, यः बाणभट्टसदृश-प्रसिद्धगद्यकारं राज्याश्रयं दातुं प्रभवेत्। फलतः बाणभट्टः कान्यकुब्जे हर्षस्य राज्य-सभायामाश्रयम् गृहीतवान् तथा हर्षचरितस्य रचनां विधाय कान्यकुब्जस्य मगध-स्य चोभयोरपि संस्कृत्यादेः विवेचनां कृतवान्। प्रीतिकूटस्य समृद्धेः चित्रणं मगधस्य पूर्णगौरवस्य सूचकमस्ति।

बाणभट्टेन यस्या विन्ध्याटव्याश्चित्रणमकारि, साटवी मगधसीम्नोऽनतिदूर-एवासीत्। एवं प्रकारेण पाटलिपुत्रस्य गौरवं शिशुनागवंशतएव प्रारभ्यते। अनया-नगर्यानेकविद्वांसः सम्मानिताः प्रोत्साहिताश्च तथा वाङ्मयस्य संरक्षणेऽनयापूर्वं योगदानं विहितम्।

अद्य शोकेन पश्चात्तापेन च सह लिख्यते यत् यः बिहारप्रदेशः जगद्गुरोः गौरवमधिगतवान्, तथा प्राचीनभारतीयभाषाणां वाङ्मयं समृद्धं कृतवान्, तस्यैव बिहारप्रदेशस्य सर्वकारः (सरकार) प्राचीनभारतीसंस्कृति-संरक्षणविषये-मौन्यस्ति। नात्र संस्कृतज्ञानां किमपि विशेषं सम्मानमस्ति, न वा किमपि प्रोत्सा-हनं विद्यते, येन संस्कृत-साहित्यस्य सम्प्रत्यपि निर्माणकार्यं चलेत्।

'पाटलिपुत्रे परीक्षितानां' सामग्री पाठकानां समक्षमस्ति। वयं तद्गुणदोषाणां विषये न किमपि लिखित्वा, पाठकानां सम्मतिविषयमेवतद्गुणदोषविवेचनं विधाय, तत्परित्यजामः, यतः पाठकानामभिप्रायः सर्वोत्तमा समीक्षा भवति। एतदनुष्ठाने योगदानां सर्वेषामेव बन्धूनामाभारं स्वीकुर्मः। एतत्स्वीकरणे परमाह्लादो जायते यत् अस्माकं विश्वविद्यालयस्योपकुलपतिः मान्यवरश्रीसच्चिदानन्दसिनहा संस्कृत-वाङ्मये परां रुचिं रक्षति। एषविश्वासोप्यस्त्यस्माकं यन्मागधस्यप्रकाशनेऽद्ययाव-दनुपलब्धमपि प्रोत्साहनमिदानीमस्य संरक्षकः श्री सिनहामहोदयोऽवश्यं प्रदास्यति।

—रामनाथपाठकः 'प्रणयी'